   समावेशिशिक्षायाः आलोके NEP 2020 इत्यस्याः सन्दर्भस्य विश्लेषणम्।

प्रवचनप्रक्रिया (Mode of Transaction)

- बहुमाध्यमेन/पावरप्वाइंटप्रस्तुतीकरणेन नियोजितं व्याख्यानम्।
- लघुसमूहचर्चा, परिसंवादः, लघुविषयाधारिता संगोष्ठी, समूहचर्चा, सहयोगात्मकशिक्षणम्, दलशिक्षणम्, सैद्धान्तिकपाठनात् चयनम्, व्यक्तिवृत्ताध्ययनम्, शैक्षिकसांख्यिकीनां विश्लेषणम्, वञ्चितसमूहैः सह व्यक्तिगतक्षेत्रयोजनं, समूहकेन्द्रितचर्चा, सर्वेक्षणं, अल्पकालिकप्रायोजनाकार्यम्।

- विविधसमुदायैः बालकैः, विद्यालयैश्च सह योजनस्य व्यावहारिकानुभवः।

आकलनप्रक्रिया (Mode of Assessment)

इदं मूल्याङ्कनं परीक्षणेषु सत्रीयकार्येषु च आधारितं भविष्यति।

सन्दर्भग्रन्थाः (Reference Books)

- मिश्रः, लोकमान्यः,(2024) समावेशात्मिका शिक्षा, मृगाक्षीप्रकाशनम्, 5/113,विकासखण्ड, गोमती नगर,लखनऊ।
- सक्करवालः, लीना प्रो, समावेशात्मकशिक्षा, केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली 2022
- विर्क, जसवन्तः, अलका अरोड़ा, समावेशी शिक्षा के आधार, टी.एफ.सी. पब्लिकेशन्स, पटियाला।
- यादव, एस.एस., यादव, सुधा, समावेशी शिक्षा, टण्डन पब्लिशर्स, लुधियाना।
- अरविन्द कुमार, समावेशित शिक्षा, सोमदत्त पब्लिकेशन्स, 2017।
- भारतस्य संविधानम्।
- अधिनियमाः(RPWD 2016)।
- भारतीय-पुनर्वासपरिषदधिनियमः,1992।
- निशक्त-जनाधिकार-अधिनियमः,1995।
- Vijayan, P and Geetha (Ed. By Mittal, S.R., 2006) Integratd and Inclusive Education: DSE (vi) Manual, New Delhi.
- Jha, M., (2002) Inclusive Education fof all : Schools without Walls, Chennai, Heinemann Educational Publishers, Multivista Global Ltd.
- Sharma, P.L., (2003) Planning Inclusive Education in Small Schools, R.I.E. Mysore.
- Bhargav, Mahesh, Exceptional Children, H.P. Bhargav Book House. Agra.

2.6 विद्यालयनेतृत्त्वं तथा प्रबन्धनपरिप्रेक्ष्यञ्च

सत्रार्द्धः – 7 **श्रेयोऽङ्काः 02**

पाठ्यपरिचयः (About the course)

नीतिपरिवर्तनपरिप्रेक्ष्ये परिवर्तितानाम् अपेक्षाणां मैत्रीपूर्णाय सन्निवेशाय अनुकूलनाय च परिवर्धितानाम् आकाङ्क्षाणाञ्च समाधानाय नूतनपाठ्यक्रमस्य रूपरेखायाः प्रदर्शनयोग्यतायाः संस्कृत्या सहकृता प्रकल्पिता वर्तते। विद्यालयप्रमुखाः अनुदेशनामकरूपेण समागतानां समस्यानां विद्यालयपरिवेशे व्यवस्थापनम् एवं च प्रगतिमार्गे नेतुम् उत्तरदायिनः भवन्ति। विद्यालयव्यवस्थानामवगमनं, विद्यालयस्य सामाजिक-सांस्कृतिक- राजनैतिक-सूक्ष्मतायाः ज्ञानम्, विद्यालयनेतृत्वादिविषयाः प्रगतिमार्गे समायोजयितुं सफलविद्यालयानां नेतृत्वकरणाय च ज्ञानराशेः दृढतापूर्णरूपेण भूमिकारूपेण च अपेक्ष्यन्ते। विद्यालयनाम् उचितरूपेण परिवर्तनाय, प्राथमिकतास्थापनार्थं, कर्त्तव्यानाम् उन्नत्यर्थं हितैषिणां साहाय्यार्थञ्च नानाक्षमताभिः समायोजयितुं विद्यालयनेतृत्व-प्रबन्धपरिप्रेक्ष्ये पाठ्यक्रमः परिकल्पितः विद्यते।

अधिगमपरिणामः (Learning Outcomes)

अस्य पाठ्यक्रमस्य पूर्त्यनन्तरम् छात्राध्यापकाः अधोलिखितेषु समर्थाः भवेयुः –

- भारतीयविद्यालयानां संरचनायाः, प्रशासनस्य, समस्यानाम्, आह्वानानां विद्यालयनेतृत्वावश्यकतानां च वैविध्यमुपस्थापयितुं समर्थाः भविष्यन्ति।
- नानानेतृत्वसिद्धान्तानां प्रशासनसंरचनाभिः स्वायत्तता, प्रतिबद्धतातन्त्रेण, विस्तृतशैक्षिकनीतीनां विषयैः सह सम्बन्धानां समीक्षणं कर्तुं समर्थाः भविष्यन्ति।
- शैक्षिकनेतृत्वस्य विभिन्नविषयान् प्रति सम्भावितानां प्रयोगाणाञ्च विषये गभीरै चिन्तने समर्थाः भविष्यन्ति।
- विद्यालयाधारितानाम् आकलितानां सामग्रीणामाधारेण विकासाय च समीक्षणं कर्तुं समर्थाः भविष्यन्ति।
- सहयोगेन, संयुक्ततत्त्वावधानेन, सामूहिककानां क्रियाणां विकासं कर्तुं समर्थाः भविष्यन्ति।
- शिक्षाक्षेत्रे आकर्षणीयानां सुसङ्गततानां च विचाराणां प्रभावपूर्णविकासाय परस्परं समायोजनं कर्तुं समर्थाः भविष्यन्ति।
- विद्यालयस्य दृष्टेः, लक्ष्यम्, उद्देश्यानि, विकासात्मकयोजनादीनां विकसने समर्थाः भविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	विद्यालयनेतृत्त्वं तथा प्रबन्धनपरिप्रेक्ष्यञ्च	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) -1

भारतीयविद्यालयप्रणाल्याः अवबोधः

1. प्रबन्धनम् - सम्प्रत्ययः, तत्त्वानि, शिक्षाप्रबन्धनम्।
2. भारते विद्यालयानां वैविध्यस्य अध्ययनम्।
3. विद्यालयभवनं स्थितिः प्रकाराश्च।
4. शिक्षानीतीनां प्रस्तावेषु विद्यालयप्रबन्धनप्रस्तावाः।

पाठ्यांशः(Unit) -2

विद्यालयनेतृत्वस्य अवबोधः भूमिकाश्च

1. विद्यालयनेतृत्वम् स्वरूपं कार्याणि च।
2. बहुमुखभूमिकानिर्वहणम्, उत्तरदायित्वस्वीकरणम् च।
3. विद्यालये पाठ्यसहगामिगतिविधयः।
4. विद्यालयस्य विकासार्थं छात्र-अधिगम-गतिविधि-समता-आदीनां
5. विद्यालयाभिलेखानां स्वरूपं विविधानां च प्रपत्राणां प्रारूपम्।
6. विद्यालये समयविभागचक्राणां स्वरूपम्।
7. अध्यापकाभिभावकसंघः।

प्रवचनप्रक्रिया (Mode of Transaction)

- विद्यालयनेतृत्वस्य प्रबन्धनस्य च उद्देश्यमस्ति भाव्यध्यापकानां निर्माणमिति। पाठ्यक्रमे प्रबन्धनस्य समावेशनस्य दृष्टिरस्ति यत् सैद्धान्तिकप्रबोधनम्, सामूहिककार्यम्, व्यक्तिवृत्ताध्ययनम्, पृच्छाधिगमः।अनया दृष्ट्या परिचर्चा परियोजना वा।
- छात्राधिगमविकासाय विद्यालयविकासार्थं च योजनानां निर्माणं वित्तसम्बन्धितव्ययानां च पूर्वानुमानञ्च।
- विद्यालय-वृत्तानाम् उपयोगः ,अनुभवाधारितं प्रस्तुतीकरणम्।
- सर्वेषु स्तरेषु विद्यालयानां प्रोन्नत्यर्थं विभिन्ननेतृत्वस्वरूपस्य प्रकाराणां च प्रस्तुतिः।
- विद्यालयस्य विकासार्थं विभिन्नानां प्रतिमानानां प्रस्तुतीः।

प्रायोगिकम् (Mode of Assessment)

1. प्रबन्धनस्य तत्त्वानां प्रदर्शनपुरस्सरं प्रस्तुतीकरणम्।

   अथवा

   विद्यालयभवनप्रकाराणाम् आरेखनिर्माणम्।
2. नेतृत्वस्वरूपम् प्रकाराणां च प्रदर्शकं प्रस्तुतीकरणम्।

   अथवा

   विद्यालये पाठ्यसहगामिक्रियाणाम् आयोजनम्।

स्वाध्यायसामग्रीः(Study Material) -

अध्यापकाः उचितग्रन्थानाम् छात्राणामावश्यकतां एवञ्च विषयानुगुणं चयनं करिष्यन्ति।

सन्दर्भग्रन्थाः (Reference Books)

- विद्यालयप्रबन्धनम् - चन्द्रकान्तपण्डितः।
- विद्यालयप्रबन्धनम् - श्री गोविन्दपाण्डेयः।
- नूतनपुस्तकानि ।
- आलेखा।
- प्रबन्धप्रतिमानानि।
- Bhatnagar (1988) : Educational administration - Loyals.
- Aggarwal J.C. (1988) : Teacher Role, Status, Service Conditions and Education in India (Doaba House)
- Coombs P.H. (1985) : World Crisis in Education : The view form Eighties, Oxford University Press, New York.
- Agarwal J.C. (1992) : Educational Planning in India, Vol. I, Agarwal, S.P. New Delhi, Concept publishing Co.
- Kochhar, S.K. (2000) : School Administration and organisation - Sterling Publishers Pvt. Ltd., New Delhi.

2.7 पाठ्यचर्यायोजना तद्विकासश्च
(पाठ्यपुस्तकम्, सामग्री विकासः, अन्यच्च)

सत्रार्द्धः – 7 **श्रेयोऽङ्काः – 2**

पाठ्यपरिचयः (About the course)-

पाठ्यचर्यायाः योजना विकासश्च इत्ययं पाठ्यक्रमः छात्रान् पाठ्यचर्यायाः रूपरेखानिर्माणस्य सङ्घटनस्य च प्रक्रियां परिचाययिष्यति। अर्थात् अवधानपूर्वकं क्रमीकृतानां सामग्रीणां विधानद्वारा अधिगमानुभवानां समग्रता, या अधिगन्तृभ्यः प्रकल्पिता (अधिगमनीयविषयाणां चयनं, अनुवर्तनीयशैक्षिकोपागमाः, प्रयोगाः, उपयुज्यमानग्रन्थाः, अन्यशिक्षणाधिगमसामग्र्यः, परीक्षादिविविधाधिगममुल्याकलनानि, विद्यालयसंस्कृतिः, प्रक्रिया इत्यादयः) सा ज्ञानांशानां योग्यतानां मूल्यानां गुणानाञ्च विकासे योगदानं विदधाति, या च राष्ट्रीयशिक्षानीतौ स्पष्टीकृतानां विद्यालयशिक्षायाः उद्देश्यलक्ष्ययोः परिपूर्तये साहाय्यं करिष्यति।

अधिगमपरिणामाः (Learning Outcomes)

पाठ्यक्रममधीत्य छात्राध्यापकाः अवगन्तुं समर्थाः भविष्यन्ति।

- शिक्षायाः लक्ष्यमवगच्छेयुः।
- पाठ्यचर्यायाः सम्प्रत्ययमवगच्छेयुः।
- अभिवाञ्छितमूल्यानि, गुणांश्च अभिज्ञातुं पारयेयुः।
- ज्ञानं योग्याताश्च विवरीतुं शक्नुयुः।
- पाठ्यचर्यायाः रूपरेखानिर्माणं जानीयुः।
- शिक्षणाधिगममूल्याकलनप्रक्रियां प्रकटीकर्तुं पारयेयुः।
- विद्यालयशिक्षायाः लक्ष्यप्राप्त्यर्थमुपादेयविषयान् अनुवर्तयेयुः।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	पाठ्यचर्यायोजना तद्विकासश्च	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) -1
शिक्षापाठ्यचर्याश्च

पाठ्यचर्यायाः सम्प्रत्ययः प्रकृतिश्च

1. पाठ्यचर्यायाः अर्थः, सम्प्रत्ययः, आवश्यकता, पाठ्यचर्यायाः विभिन्न परिप्रेक्ष्याणि, विद्यालये पाठ्यचर्यायाः आवश्यकता।
2. पाठ्यचर्यारूपरेखा-पाठ्यक्रमपाठ्यपुस्तकानां मध्यसम्बन्धः विभेदश्च।

3. पाठ्यचर्यायाः प्रकाराः – विषयकेन्द्रिता, क्रियाकलापकेन्द्रिता, पर्यावरणकेन्द्रिता, समुदायकेन्द्रिता तदुपादयेता च।

पाठ्यांशः(Unit) -2

1. पाठ्यचर्योपागमेषु अवगमनव्यतिचलनानि-विषयकेन्द्रितपाठ्यचर्यातः व्यवहारकेन्द्रितपाठ्यचर्यां प्रति, अधिगमकेन्द्रितात् दृष्टिकोणविकासाधारितसंयोजितोपागमं प्रति अपि च क्रियाकेन्द्रितां प्रति, ज्ञाननिर्मिति - अभिविन्यासपाठ्यचर्यां प्रति।
2. लक्ष्याणामुद्देश्यानाञ्च रूपीकरणम् :- (सामान्या, विशिष्टा, विषयाधारिता, स्तराधारिता) विषयवस्तुचयनम्, अधिगमानुभवाश्च। अन्तर्भूतसिद्धान्ताः विषयवस्तुनि अधिगमानुभवानां विन्यासः सिद्धान्ताश्च। नैरन्तर्यम् आनुपूर्निता एकता च विन्यस्तघटकानि सम्प्रत्ययः कौशलानिमूल्यानि च) क्षेत्रस्य विस्तृतिः तथा अवगमनस्य गभीरता, विद्यालयपाठ्यचर्यायोजनायाः अनुप्रयोगात्मकता प्रसक्तिश्च।
3. पाठ्यचर्याविकासचिन्तनानि :– विषयस्य स्वरूपं प्रकृतिश्च, सामाजिक-सांस्कृतिकदृष्टयः तथा सामाजिकवाञ्छाः मूल्यसङ्क्रमणं सामाजिकक्षमता आवश्यकता च, प्राविधिकविकासः प्रौद्योगिकविकासः च।

पाठ्यांशः(Unit) -3

1. अधिगमपरिस्थितिं प्रति पाठ्यचर्यायाः प्रचालनम् – पाठ्यचर्यायाः योजना पाठ्यक्रमत्वेन रूपान्तरणं पाठ्यचर्यायाः अनुप्रवर्तनक्रियाकलापाः च।
2. पाठ्यचर्यायाः क्रियान्वयने अध्यापकस्य पात्रम्। योजना अधिगमसंसाधनानि सामग्र्यः पाठ्यपुस्तकं शिक्षकहस्तपुस्तिका स्रोतसां पुस्तिका कार्यपुस्तिका तन्त्रांशसामग्र्यः मूल्याकलनयोजनाश्च।
3. पाठ्यचर्याक्रियान्वयनकार्याणि – प्रादेशिकस्तरे राज्यस्तरे राष्ट्रियस्तरे च विद्यालयस्य स्थानम्।

प्रायोगिकम् (Practicum)

- चर्चासत्रम्
  - संस्कृतायोगः 1956
  - राष्ट्रियपाठ्यचर्याप्रारूपाणामाधाराः (1975, 1988, 2000 And 2005)
  - अभिलेखाः 'Learning without burden' by Prof. Yashpal.
- वर्तमानपाठ्यचर्यायाः क्रियान्वयनाय सुविधानां भौतिकसंसाधनानां च निरीक्षणं विधाय प्रतिवेदननिर्माणम्।
- पाठ्यचर्यायाः क्रियान्वयने मूल्याकलने च अध्यापकानां भूमिकावगमनाय तेषां साक्षात्कारः।
- पाठ्यचर्याविकाससिद्धान्तसन्दर्भे अधोनिर्दिष्टानां विश्लेषणम्।
  - राष्ट्रियशिक्षानीतेः (2020) मार्गदर्शिका।
  - Learning without Burden, MHRD
  - संस्थितिपत्रम् – 2006 पाठ्यचर्यायां, पाठ्यक्रमे, पाठ्यपुस्तके च राष्ट्रिय-अवधानसमूहः NCERT
  - NCERT (1988) पूर्वमाध्यमिक-माध्यमिकशिक्षयोः राष्ट्रियपाठ्यचर्या – प्रारूपम्
  - NCERT (2000) विद्यालयशिक्षायाः राष्ट्रियपाठ्यचर्याप्रारूपम्।

- NCERT (2005) राष्ट्रियपाठ्यचर्याप्रारूपम् (NCERT प्रकाशनानि)

प्रवचनप्रक्रिया (Mode of Transaction)

पाठ्यवस्तुसंङ्क्रामणे अधोनिर्दिष्टांशाः अन्तर्भवन्तिः-

- दृश्यश्रव्यमाध्यमसहकृतं नियोजितमध्यापनम्।
- लघुसमूहचर्चा, पैनल चर्चा, लघुविषयाधारितसङ्गोष्ठी, समूहचर्चा, सहकारात्मकशिक्षणम्, समूहशिक्षणम्, सिद्धान्तग्रन्थेभ्यः चयनं, व्यक्तिवृत्ताध्ययनं, शैक्षिकसांख्यिक्याः विश्लेषणं, लक्ष्यीकृतसमूहचर्चाः, सर्वेक्षणेन लघुकालिकप्रायोजनया च शैक्षिकदृष्ट्या वञ्चितसमूहानाम् अध्ययनम्।
- वैविध्यपूर्णसमाजैः, छात्रैः, विद्यालयैः च सह सम्बन्धेन सुस्पष्टानुभवः।

आकलनप्रक्रिया (Mode of Assessment)

- दत्तकार्याणां परीक्षाणां च आधारेण मूल्याकलनं भविष्यति।

सन्दर्भग्रन्थाः (Reference Books)

- पाठ्यक्रम विकास एवं विद्यालय – डॉ. सियाराम यादव, प्रकाशक – विनोद पुस्तक मंदिर, आगरा।
- पाठ्यक्रम विकास – डॉ. देवेन्द्रसिंह चम्याल, प्रकाशक - प्राची डिजिटल पब्लिकेशन।
- ज्ञान और पाठ्यक्रम – डॉ. राजेश वसिष्ठ, लक्ष्मी पब्लिकेशन।
- पाठ्यक्रम का विकास – श्रीमती राजवन्त कौर, प्रकाशक - विनोद पब्लिकेशन।
- विद्यालय पाठ्यक्रम विकास – प्रो. विजय जायसवाल डॉ. प्रियंका गुप्ता।
- पाठ्यक्रम अध्ययन – डॉ. रेणु सिंह, डॉ. मनोज चन्द्र काण्डपाल, डॉ. रश्मि शर्मा, प्रकाशक - आर. लाल पब्लिशर्स एण्ड डिस्ट्रीब्यूटर्स।
- शैक्षिकयोजना और प्रबन्धन – प्रो. रमन प्रीत, प्रकाशक - विनोद पब्लिकेशन।
- Curriculum Development: Practices & Perspectives, Pub - S.K. Panda, Niharika Panda, Shipra Publication.
- Curriculum: Perpectives, Construction and Development, Hoovin Bhavi, B.L., Pub - Current Publication.
- Principles of Education and Curriculum Development – Dr. Seema Sethi, Pbu - Khel Sahitya Kendra.
- Knowledge and Curriculum – M. Sen Gupta, Pub - PHI Learning.
- Foundation & Curriculum Devlopment – Dr. Vijay Kumar Gupta, Dr. Anjali Dutta, Pub - R. Lall Publication.
- शैक्षिकप्रशासनप्रबन्धयोजनानां सम्प्रत्ययः, - प्रो. चन्द्रकान्त, प्रकाशनम् - जगदीश संस्कृतप्रकाशनम्, जयपुर।

2.8 शिक्षायाः दार्शनिकं सामाजशास्त्रीयं परिप्रेक्ष्यम् - II

(Philosophical and sociological Perspectives of Education)

सत्रार्द्धः – 8 **श्रेयोऽङ्काः– 4**

पाठ्यपरिचयः (About the Course) –

शिक्षायाः समाजशास्त्रीयपरिप्रेक्ष्याणाम् अध्ययनस्य लक्ष्यमस्ति यदस्य अध्येतारः सामाजिकसंरचनायाः सामाजिकप्रावधानानां च मध्ये सम्बन्धान्वेषणं कुर्युः इति। अयं पाठ्यक्रमः व्यक्तिः, समाजः समूहश्च इत्येतेषां सामाजिकव्यवहारस्य अध्ययने केन्द्रितः अस्ति। पाठ्यक्रमः प्रशिक्षणार्थिनां तथैव च व्यक्तिसमाजयोः पारस्परिकसामाजिकव्यवहारस्य परीक्षणे आधारितः अस्ति।

अधिगमपरिणामाः (Learning Outcomes) –

अमुं पाठ्यक्रमं पठित्वा अध्येतारः समर्थाः भविष्यन्ति –

- शिक्षायाः सामाजिकसन्दर्भाणां प्रत्यभिज्ञानार्थम्,
- शैक्षिकसमाजशास्त्रस्य अर्थः, प्रकृतिः सीमाविस्तारः च इत्येतेषाम् अवगमनार्थम्,
- शिक्षा समाजश्च इत्यनयोः मध्ये सम्बन्धस्थापनार्थम्,
- समाजीकरणस्य प्रमुखघटकानां यथा परिवारः, विद्यालयः, समुदायः सब्रह्मचारिसमूहः च इत्यादीनां विश्लेषणार्थम्,
- संस्कृतेः आयामानां तेषां शैक्षिकाभ्यासानां च महत्तायाः शिक्षायां संस्कृतेः प्रभावशीलतायाः च विश्लेषणार्थम्,
- सामाजिकस्तरीकरणस्य विभिन्नानां पक्षाणां प्रत्यभिज्ञानार्थम्,
- शिक्षा आधुनिकीकरणं च इत्यनयोः मध्ये निकटसम्बन्धः, आधुनिकीकरणे शिक्षायाः भूमिका, सामाजिकपरिवर्तनस्य तत्त्वानि अवरोधकानि च इत्येतेषां विषये ज्ञाने।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	शिक्षायाः दार्शनिकं सामाजशास्त्रीयं परिप्रेक्ष्यम् - II	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) -1

शिक्षा समाजः च

1. शिक्षा समाजः च इत्यनयोः सम्प्रत्ययस्पष्टता मध्ये च सम्बन्धः।
2. औपचारिकी अनौपचारिकी शिक्षा।
3. त्रिध्रुवी-प्रक्रियारूपा शिक्षा।
4. सामाजिकसन्दर्भे शिक्षायाः प्रकार्याणि।

पाठ्यांशः(Unit) -2

शिक्षा सामाजिकपरिवर्तनञ्च

1. सामाजिकपरिवर्तनस्य अर्थः, सम्बन्धः दिशाश्च।
2. शिक्षा सामाजिकपरिवर्तनानि च प्रभावकानि तत्त्वानि।
3. शिक्षा आधुनिकता च।
4. सामाजिकपरिवर्तने शिक्षायाः भूमिका।
5. संवैधानिक भारतीय शिक्षा।

पाठ्यांशः(Unit) -3

शिक्षा संस्कृतिः समाजीकरणं च

1. शिक्षा संस्कृतिः च इत्यनयोः मध्ये सम्बन्धः।
2. सामाजीकरणस्य प्रक्रियारूपेण शिक्षा।
3. भारतीयसंविधानसन्दर्भे सामाजिकसमरसता शिक्षा च।
4. संस्कृत्य शिक्षाप्रक्रियाश्च प्रभावः – समाजकल्याणम्, बालविवाह निषेधः तथा बालश्रमनिषेधाधिनियमः, शैक्षिकनीतयः तथा शैक्षिकाधिनियमाः, प्रौढसाक्षरता, सम्प्रेषणे नूतनप्रविधिः समानता।

पाठ्यांशः(Unit) -4

शिक्षा मूल्यानि च

1. मूल्यानां सम्प्रत्ययः, अर्थः, सम्बन्धः सार्थकता च।
2. मूल्यानां प्रकाराः।
3. संवैधानिकमूल्यानि शिक्षायां च तेषां प्रभावः।
4. मूल्यानां शिक्षणशास्त्रीयाः सन्दर्भाः।
5. मानवाधिकाराः मूल्यानि च।
6. पर्यावरणं शिक्षा च

प्रायोगिकम् (Practicum) –

1. शिक्षायाः समाजस्य च समालोचनात्मकमध्ययनम्।

   अथवा

   शिक्षायाः प्रकार्याणां महत्त्वस्यापनाय चर्यायाः प्रवर्तनम्।

2. सामाजिकपरिवर्तने शैक्षिकभूमिकायाः आलेखलेखनम्।

   अथवा

   आधुनिकतायां शिक्षायाः भूमिकाविषये परिचर्चा।

3. संस्कृतेः संरक्षणार्थं संवैधानिकानि प्रावधानानि।

   अथवा

   राष्ट्रीय-शिक्षा-नीतिः, 2020 इत्यनुगुणं सामाजिकोत्थानविषयकसन्दर्भाणां विश्लेषणात्मकालेखलेखनम्।

4. समाजे शैक्षिक मूल्यानां स्थितिं ज्ञातुं जनसामान्यस्य साक्षात्कारः।

अथवा

निकटस्थसमाजमवलोक्य (लघुलघुसमूहे) चितानां सामाजिकसमस्यानां समालोचनात्मक सर्वेक्षणं प्रतिवेदनलेखनञ्च।

प्रवचनप्रक्रिया (Mode of Transaction) –

प्रस्तुतपाठ्यविषयस्य प्रवचनप्रक्रिया अधोलिखितरूपेण भविष्यति –

- पावर पाइण्ट/बहुसंसाधनयुक्तेन प्रस्तुतिः, व्याख्यानम्, भाषणगोष्ठीनाम् आयोजनम्।
- लघुसमूहचर्चा, समूहचर्चा, समूहान्तःक्रिया, लघुविषयेषु संगोष्ठी, सहकारिशिक्षणम्, दलशिक्षणम्, उच्चस्तरीयसामाजिकसन्दर्भपुस्तकानां चयनम्, व्यक्तिवृत्ताध्ययनम्, मुख्यधारातः वञ्चितसमुदायानां/समूहानाम् अन्तःक्रियात्मकं सर्वेक्षणं प्रतिवेदनलेखनं लघुपरियोजनाः च।

आकलनप्रक्रिया (Mode of Assessment) –

आकलनप्रक्रिया परीक्षां प्रदत्तकार्याणां च आधारेण भविष्यति।

सन्दर्भग्रन्थाः (Reference Books)

- गौतम, सत्यपालः समाज दर्शन, पंचकुला, हरियाणा साहित्य अकादमी।
- जायसवालः शैक्षिक समाजशास्त्र, आगरा, विनोद पुस्तक मन्दिर।
- पाठक, आर.पी. (2006) : भारतीय समाज में शिक्षा, नई दिल्ली, पियर्सन एज्यूकेशन।
- पाठक, दातारामः शैक्षिक दर्शन एवं समाजशास्त्र, भाग-1, नई दिल्ली, मान्यता प्रकाशन।
- पाण्डेय, के.पी. : शिक्षा के दार्शनिक एवं समाजिक आधार, वाराणसी, विश्वविद्यालय प्रकाशन।
- पाण्डेय, रामशकलः शिक्षा की दार्शनिक एवं समाजशास्त्रीय पृष्ठभूमि, आगरा, विनोद पुस्तक मन्दिर।
- पाणिग्राही, निर्मलाः शिक्षायाः सामाजिकाधाराः, भुवनेश्वरम्, दिव्य प्रकाशनम्।
- माथुर, आर.एस. : शिक्षा के दार्शनिक एवं सामाजिक आधार, आगरा, अग्रवाल पब्लिकेशन।
- रुहेला, एस.पी. : शिक्षा के दार्शनिक एवं समाजशास्त्रीय आधार, आगरा, अग्रवाल पब्लिकेशन।
- शर्मा, रामनाथ (1999) : शैक्षिक समाजशास्त्र, नई दिल्ली, अटलांटिक पब्लिशर्स।
- सक्सेना, एन.आर. स्वरूप एवं संजय कुमार (2006) : शिक्षा के दार्शनिक एवं समाजशास्त्रीय आधार, मेरठ, आर. एल. बुक डिपो।
- सच्चिदानन्द ए.पी. : शिक्षायाः सामाजिकाधाराः, श्रृङ्गेरी, गौरीश प्रकाशनम, जी.के. विलास।
- सिकरवारः, प्रेमसिंहः शिक्षायाः दार्शनिकसामाजिकाधाराः, जयपुरम्, ए.बी. पब्लिशर्स एण्ड डिस्ट्रीब्यूटर्स।
- चान्दकिरणः, शिक्षा सामाजिक परिप्रेक्ष्य, दिल्ली विद्यालय, दिल्ली।
- Repoot, यथा , 1964-66,
- 1990, शिक्षा बिना बोझ के,

- भारत का संविधान
- अध्यापक और शिक्षा (1983-85)
- डेलोर्स आयोग प्रतिवेदन
- साहित्य (कथा)
- Mathur, S.S.: A Sociological Approach to Indian Education, Agra, Vinod Pustak Mandir.
- Report of New Education Policy, 2020, New Delhi, Ministry of Education, Govt. of India.

2.9 शिक्षानीतिविश्लेषणम्

सत्रार्द्धः - 8 **श्रेयोऽङ्कः - 2**

पाठ्यपरिचयः (About the course)-

शिक्षानीतिसमीक्षणमित्यस्य पाठ्यक्रमस्य सैद्धान्तिकरूपरेखायां कार्यप्रणाल्याञ्च छात्राध्यापकानाम् उन्मुखीकरणमेव लक्ष्यमस्ति यच्च राष्ट्रस्तरे, राज्यस्तरे, कार्यक्रमस्तरे च नीतीनां प्रभावशीलताम् आकलयितुं, निश्चेतुञ्च साहाय्यमाचरिष्यति।

अधिगमपरिणामाः (Learning Outcomes)-

अस्य पाठ्यक्रमस्य पूर्त्यनन्तरं छात्राध्यापकाः अधोलिखिते समर्थाः भविष्यन्ति :-

- शिक्षानीतीनां समीक्षणं, प्रभावशीलतायाः मूल्याङ्कनं, ज्ञानस्य समायोजनं कर्तुं समर्थाः भवेयुः।
- सन्दर्भाधिग्रहणस्य समीक्षणे, अनुसन्धाने, नीतीनां समीक्षणे, सम्बद्धपद्धतीनां व्याख्याने च समर्थाः भवेयुः।
  - सम्भाव्यमाननीतिविकल्पानां परिचयने तथा विशदीकरणे समर्थाः भवेयुः।
  - सम्भाव्यमाननीतिविकल्पानां परस्परं तुलनात्मकदृष्ट्या अवलोकने समर्थाः भवेयुः।
  - सम्भाव्यमाननीतिविकल्पान् वर्गीकर्तुं समर्थाः भवेयुः।
  - विद्यालयीयशिक्षापद्धतौ सम्भाव्यमानसमस्यानामाविष्करणाय उत्तमानां प्रभावशीलविकल्पानां चयने समर्थाः भवेयुः।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	शिक्षानीतिविश्लेषणम्	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) -1

शिक्षानीतिनाम् योजना (Planning An Educational Policy)

1. शिक्षानीतेः अर्थः सार्थकता च।
2. राज्ये, राष्ट्रे तथा विश्वस्तरे शिक्षानीतेः प्रयोजनानि विस्तारश्च।
3. दार्शनिक तथा सामाजिकपरिप्रेक्ष्ये शिक्षानीतियोजना।
4. भारतेशिक्षानीतिनाम् ऐतिहासिकविकासः।
5. योजनायाः आधारभूतसोपानानि।
6. शिक्षानीत्यै संवैधानिकप्रावधानानि (Provisions)
7. शिक्षानीतेः विश्लेषणार्थम् आधारभूतसिद्धान्ताः।

पाठ्यांशः(Unit) -2

भारते शिक्षानीतयः :-

1. स्वातन्त्र्याद् आरभ्य शिक्षानीतेः विवेचनात्मकं समीक्षणम् "1968, 1986, (1992 परिवर्तितम्) तथा 2020" सन्दर्भे :- आवश्यकताः सार्थकता लक्ष्याणि। शिक्षानीतेः रूपरेखा, विषयवस्तु, नीतिगतसमस्याः, संवैधानिकप्रावधानानि (Provisions), विशिष्टसन्त्रासः च (प्रामुख्यम्) (Stress)। नीतीनां मध्ये परिवर्तनं तथा कार्यान्वयनव्यूहरचनाः।
2. समयानुगुणं शिक्षानीतिमध्ये संशोधनस्य परिष्करणस्य (Modification) आवश्यकताः।

पाठ्यांशः(Unit) -3

शिक्षानीतिनाम् कार्यान्वयनम्

1. अर्थः, आवश्यकता तथा सार्थकता (Significance)।
2. नीतेः कार्यान्वयनतन्त्रम्।
3. शिक्षानीतेः क्रियान्वयने व्यूहरचनाः।
4. कार्यक्रमाणां क्रियान्वयनम् :- संप्रत्ययाणां स्पष्टीकरणं सार्थकता च। (वैचारिकस्पष्टीकरणम्)
5. विविधसमूहनां भूमिका :- विधानमण्डलम्, न्यायतन्त्रम्, राजकीयाधिकारपक्षसमर्थकाः, स्वैच्छिकसंस्थाः(NGOS), सर्वकारेतरसंस्थाः/प्रभावपूर्णसमूहः/नागरिकाः।
6. क्रियान्वयने आह्वानानि उपहुतयः (Challenges) ।

प्रायोगिकम् (Practicum)

- राष्ट्रियशिक्षानीतिसन्दर्भे (NEP-2020) नीतेः क्रियान्वयनदृष्ट्या समीक्षा तथा प्रस्तुतिः।
- 1987 कार्यक्रमाणां क्रियान्वयनस्य सक्रियसमीक्षणस्य (1992) प्रस्तुतिः।
- राष्ट्रियशिक्षानीतेः (2020) क्रियान्वयने राज्यस्तरे जायमानसमस्यानां सूची निर्माणम्।
- राष्ट्रियशिक्षानीतेः (2020) क्रियान्वयनाय (उपायानां) उपायसूच्याः निर्माणम्।

प्रवचन प्रक्रिया (Mode of Transaction)

पाठ्यक्रमसाग्रीव्यवहारे निम्नलिखितम् अन्तर्भवति ।

- प्रविध्याधारेण(बहुमाध्यम् /पावर-पाइण्ट)युक्ताः व्यवस्थितं व्याख्यानम्।
- समूहचर्चा, परिचर्चासत्रद्वारा, लघुविषयाधारितसंगोष्ठीनां द्वारा, सहयोगात्मकशिक्षणेन, समूहशिक्षणेन, सैद्धान्तिकाऽध्ययनसामग्रीणां संग्रहणेन, सर्वेक्षणेन, व्यक्तिवृत्ताध्ययनेन शिक्षणसांख्यिकीय विश्लेषणेन, न्यूनशिक्षितसमूह समावेशेन अल्पकालिकप्रायोजनादि द्वारा सम्पादनम्।
- विविधसमुदायस्यसमाजस्य विद्यालयस्य छात्राणां च अनुभवाधारितः समावेशः।

आकलनप्रक्रिया (Mode of Assessment)

परीक्षाणां तथा सत्रीयकार्याणां, नियतकार्याणां द्वारा आकलनम्।

सन्दर्भग्रन्था: (Reference Books)

- Report of the Education Commission (1964-66).
- Report of the Delors Commission, UNESCO, 1996
- National Policy of Education 1986/1992.
- National Curriculum Framework on school education, 2005.
- Govt. of India, MHRD (2005). Universalization of Secondary Education : Report of the CABE Committee, New Delhi
- Chopra, R.K.(1993) Status of Teachers in India NCERT, New Delhi.
- Govt. of India (1953) Report of Secondary Education Commission, New Delhi.
- Govt. of India (1966) Indian Education Commission (1964-66) Report. New Delhi.
- Govt. of India (1986/1992) National Policy of Education, 1992, Modification and their POA's MHRD, Deptt. of Education.
- Smt. Indra Sharma & N.R. Sharma : History and problems of Indian Education, Vinod Pustak Mandir, Agra.
- Mukherjee, R.K. : Ancient Indian Education, Motilal Banarsi Das Publishers.
- Mukharjee, S.N. : History of Education in India Acharya Book Dep- Baroda.
- Nurullah and Naik : A students History of Education in India.
- Syed Nurullah & J.P. Naik (1943) : History of Education in India. During British period Bombay, Mac Millan and Co., Ltd.
- Prof. Raman BehariLal & Dr. Krishna Kant: Contemporary India and Education (2016) R.Lall Book Depot, Meerut.

2.10 किशोरावस्था शिक्षा च -1

सत्रार्द्धः - 8 **श्रेयोऽङ्कः - 4**

पाठ्यपरिचयः About the Course

अयं पाठ्यक्रमः भारतस्य विद्यालयस्तरे किशोरशिक्षाकार्यक्रमाणां विशेषसन्दर्भे किशोरावस्थायाः किशोरशिक्षायाः च व्यापकज्ञानं दातुं विनिर्मितो विद्यते। बौद्धिक-संवेगात्मक-शारीरिक-सामाजिक-सांस्कृतिक-वृद्धिप्रक्रियाभिः सह सम्बद्धाः पारस्परिकविषयाः तथा च लिङ्गं यौनसम्बन्धं च प्रति स्वस्थदृष्टिकोणं, विषमलिङ्गस्य सम्माननम्, उत्तरदायिसामाजिकव्यवहारस्य अवगमनार्थञ्च अयं पाठ्यक्रमः उपकरोति। अयं पाठ्यक्रमः मूलजीवनकौशलं किशोरावस्थायां तेषां महत्त्वं च इत्यनेन सह भारते किशोरावस्थायाः कृते प्रचलितानां विविधानां किशोरावस्थाशिक्षाकार्यक्रमाणाम् विषये प्रकाशपातं करोति।

अधिगमपरिणामाः (Learning Outcomes)

अस्य पाठ्यक्रमस्य अध्ययनानन्तरं छात्राध्यापकाः -

- किशोरावस्थायाः किशोरावस्थाशिक्षायाः च विषये संवेदनशीलतां, अवगमनं, ज्ञानञ्च प्राप्स्यन्ति।
- भारते किशोरशैक्षिककार्यक्रमस्य ऐतिहासिकविकासं ज्ञास्यन्ति।
- किशोरशैक्षिककार्यक्रमस्य स्थानीयसंस्थानां अन्तर्राष्ट्रीयसंस्थानां च भूमिकां ज्ञास्यन्ति।
- विद्यालयस्तरस्य किशोरावस्थाशिक्षाकार्यक्रमाणां महत्त्वं प्रति सकारात्मकदृष्टिकोणं स्थापयिष्यन्ति।
- प्रजननस्वास्थ्य-लिङ्ग-कामुकता-सम्बद्धेषु विषयेषु ज्ञानं संवेदनशीलतां च विकासयितुम् एतेषु विषयेषु प्रभाविरूपेण संवादञ्च कर्तुं प्रभविष्यन्ति।
- विकासप्रक्रियाभिः सह सम्बद्ध-बौद्धिक-संवेगात्मक-शारीरिक-सामाजिक-सांस्कृतिक-अन्तर्वैयक्तिकविषयेषु च अवगमनं परस्परसम्बन्धञ्च ज्ञास्यन्ति।
- यौन-स्वास्थ्यं प्रति स्वस्थदृष्टिकोणं, विषमलिङ्गस्य सम्माननम्, उत्तरदायित्वपूर्णस्य यौनव्यवहारस्य अवगमनञ्च करिष्यन्ति।
- वाञ्छितजीवनकौशलानां विकासं करिष्यन्ति।
- किशोरावस्थाशिक्षाकार्यक्रमेभ्यः शैक्षणिकसम्बद्धकौशलानि प्राप्स्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	किशोरावस्था शिक्षा च	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) – 1
किशोरावस्था किशोरावस्थाशिक्षा च

1. किशोरावस्थायाः अवगमनम् : किशोरावस्थायाः बौद्धिक-संवेगात्मक-सामाजिक-शारीरिकपक्षाः, किशोरावस्थासमये विशेषांशाः उपहूतयः च, मिथ्याः यथार्थाश्चधारणाः।
2. किशोरशिक्षा : भारतीयसन्दर्भे किशोरशिक्षायाः अवधारणा, प्रकृतिः सार्थकता, किशोरशिक्षायाः लक्ष्याणि उद्देश्यानि च।
3. किशोरशिक्षायां सामाजिकसंस्थारूपेण विद्यालयस्य परिवारस्य विविधमाध्यमानां समुदायस्य च भूमिका।
4. किशोरशिक्षायाः उपहूतयः।

पाठ्यांशः(Unit) – 2

जीवनकौशलानि किशोरशिक्षा च

1. किशोरशिक्षायाः कृते जीवनकौशलस्य अवधारणा, प्रकृतिः, सार्थकता (Significance)।
2. जीवनकौशलस्य किशोरावस्थाशिक्षायाः च सम्बन्धः।
3. मूलजीवनकौशलानि तेषां सार्थकता (Significance)।
4. यौन-प्रजनन-स्वास्थ्यस्य अवगमनम्।
5. SIT तथा HIV/AIDS कारणानि, निवारणं, चिकित्सा समायोजनकौशलञ्च।

पाठ्यांशः(Unit) - 3

भारते किशोरशिक्षाकार्यक्रमः (AEP)

1. भारते किशोरशिक्षाकार्यक्रमस्य ऐतिहासिकविकासः।
2. भारते किशोरशिक्षाकार्यक्रमस्य लक्ष्यं सार्थकम् (Significance)।
3. भारते किशोरशिक्षाकार्यक्रमेषु (AEP) शिक्षकाणां भूमिका।
4. भारते शैक्षिककार्यक्रमाणां कृते उपहूतयः ।
5. मिथ्याः / दुर्धारणाः।

पाठ्यांशः(Unit) - 4

शिक्षाशास्त्रीयविशेषांशाः

1. अर्थः लक्ष्यं सार्थकता (Significance)।
2. किशोरशिक्षाध्यापनम् उपहूतयः - छात्रव्यवहार-अवगमने, वैयक्तिकावरोधैः सह समव्यवहारः(Dealing), सामाजिक-सांस्कृतिकविषये, कक्षा-कक्षविषये उपहूतयः च, सामग्री-उत्पादने, शिक्षणविधिषु शिक्षकाणां सज्जता।
3. किशोरशिक्षायाः उपागमाः – वैयक्तिकाध्ययनानि(व्यक्तिकं सामूहिकं वा) तथा संकट-घटनाः, मस्तिष्क-मन्थनम्, भूमिका-निर्वाहः, क्रीडनम्, मूल्य-स्पष्टीकरणं, प्रश्नपेटी, चर्चाः परिसंवादाश्च, अध्ययनपाञ्चालिका प्रदर्शनं, भूमिका-विपर्ययः, चित्र-प्रदर्शनम्, क्षेत्रसर्वेक्षणम् अथवा भ्रमणं समस्यानाम् अवबोध्यः समाधानानि च।

प्रायोगिकम् (Practicum)

1. क्षेत्रभ्रमणं कृत्वा दुर्व्यवहारपीडित बालकानां प्रकरणाध्ययनम् (Case Study)

अथवा

क्षेत्रभ्रमणं कृत्वा समस्यानाम् अवबोधनं समस्या समाधानं च ।

2. सर्वकारीय-असर्वकारीय शैक्षिकसंस्थाभिः कृतकार्यस्य समीक्षा विश्लेषणञ्च।

अथवा

शिक्षाक्षेत्रे राष्ट्रीय-अन्ताष्ट्रीयस्तरस्य असर्वकारीयसंस्थानाम् (NGO) अध्ययनम्।

3. भारते विभिन्नेषु सामाजिक-आर्थिक-परिवेशेषु किशोरव्यवहारस्य अध्ययनम्।

अथवा

मादकद्रव्य-पुनर्वासकेन्द्राणि गत्वा किशोराणां प्रकरणाध्ययनम्।

4. भारते किशोराणां शिक्षायां समागतानाम् उपहूतिनां विमर्शनम्।

अथवा

किशोरशिक्षायां समुचितोपागमस्य परिचर्चां विधाय सर्वोतमस्य निर्धारणम्।

शोधाध्ययनम् अथवा विस्तृत-व्यक्तिवृत्ताध्ययनम् विभिन्नेषु सामाजिक-आर्थिक-परिवेशेषु किशोरव्यवहारः, दुर्व्यवहारपीडित बालकानां, मादक-द्रव्यपुनर्वास-केन्द्रेषु किशोराणां, औद्योगिक क्षेत्रे यन्त्रागारपरिसरेषु च निवसन्तः किशोराः, शैक्षिकक्षेत्रे किशोराणाम् उच्चतरं अथवा निम्नप्रदर्शनम्। विद्यालयमध्यत्यागानुपातेः किशोरवयस्काः येषु समुदायेषु सन्ति यत्र बालविवाहादिसामाजिकदोषाणां प्रभावः। विद्यालये किशोरशिक्षासत्राणां सञ्चालनम् ।

प्रवचनप्रक्रिया (Mode of Transaction)

पाठ्यक्रमप्रवचनप्रक्रियायां निम्नलिखितानि अन्तर्भवन्ति।

- बहुमाध्यम /पावर-पॉइण्ट् प्रस्तुतिभिः युक्ताः नियोजिताः व्याख्यानानि।
- लघुसमूहचर्चा, सामूहिकचर्चाः (Panel Interactions), लघुविषयाधारितगोष्ठ्यः, समूहचर्चा, सहकारिशिक्षणं दलशिक्षणं च, सैद्धान्तिकपाठानां चयनं, व्यक्तिवृत्ताध्ययनं, शैक्षिकसांख्यिकीयविश्लेषणं शैक्षिकरूपेण च वञ्चितसमुदायैः समूहैः च सह व्यक्तिगतक्षेत्रसङ्गतिः, लक्ष्यकेन्द्रितचर्चाद्वारा सर्वेक्षणम् अल्पकालिकपरियोजनाकार्याणि च।
- विविधसमुदायैः, बालकैः, विद्यालयैः च सह संलग्नतायाः व्यावहारिकानुभवः।

आकलनप्रक्रिया (Mode of Assessment)

आकलनं परीक्षणानाम् दत्तकार्याधारेण भविष्यति।

सन्दर्भग्रन्थाः (Reference Books)

- डॉ. संजय टिक्कु, बाल अवस्था एवं किशोर अवस्था शिक्षा, विनोद पब्लिशर्स।
- ए. टी. जरशिल्ड., किशोर मनोविज्ञान, बिहार हिन्दी ग्रन्थ अकादमी, पटना।
- Sibnath Deb., Subhasis Bhandra., Aleena Maria sunny., Seema Sahay., Childhood to Adolescence, Pearson Publications.

2.10 मानसिकस्वास्थ्याय शिक्षा -2

सत्रार्द्धः - 8 **श्रेयोऽङ्कः - 4**

पाठ्यपरिचयः (About the course)

अयं पाठ्यक्रमः मानसिकस्वास्थ्यशिक्षायाः अर्थः निर्धारकाणाञ्च विषये व्यापकबोधं दास्यति। अयं पाठ्यक्रमः छात्राध्यापकाय तन्यताप्रबन्धनं तथा समायोजनविधिविषये अधिकं ज्ञानं ददाति। अस्य पाठ्यक्रमस्य उद्देश्यं भारतीयवैश्विकदृष्टिकोणेषु मानसिकस्वास्थ्यशिक्षाकार्यक्रमस्य ऐतिहासिकसमकालिकविकासानां परिचयोऽस्ति।

अधिगमपरिणामाः (Learning Outcomes)

अस्य पाठ्यक्रमस्य अध्ययनानन्तरं छात्राध्यापकाः -

- मानसिकस्वास्थ्यस्य अर्थं महत्त्वं च प्रकटीकर्तुं प्रभविष्यन्ति।
- मानसिकस्वास्थ्यस्य सामाजिकं मनोवैज्ञानिकञ्च निर्धारकाणां वर्णनं कर्तुं प्रभविष्यन्ति।
- तन्यतायाः कारणानां तथा तन्यताप्रबन्धनस्य प्रक्रियायाः विश्लेषणं कर्तुं प्रभविष्यन्ति।
- जीवने समायोजनमहत्त्वस्य विश्लेषणं कर्तुं प्रभविष्यन्ति।
- वैश्विकमानसिकस्वास्थ्यशिक्षाकार्यक्रमाणाम् आवश्यकताया महत्त्वस्य च विश्लेषणं कर्तुं प्रभविष्यन्ति।
- बालकानाम् उत्तममानसिकस्वास्थ्यं निर्वाहयितुं शिक्षकाणां पित्रोश्च विशिष्टभूमिकायाः निर्धारणं कर्तुं प्रभविष्यन्ति।
- समाजस्य उत्तममानसिकस्वास्थ्यनिर्वहणं मानसिकरोगाणां च निवारणप्रचारप्रसारञ्च कर्तुं प्रभविष्यन्ति।
- वैश्विकरूपेण स्वास्थ्यनीतीनाम् आवश्यकतां व्यक्तीकर्तुं प्रभविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	मानसिकस्वास्थ्याय शिक्षा - 2	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) - 1

मानसिकस्वास्थ्यम्

1. मानसिकस्वास्थ्यस्य सम्प्रत्ययः निर्धारकाश्च।
2. मानसिकस्वास्थ्यं मानसिक-आरोग्यता च।

3. मानसिकविकाराः - लक्षणानि प्रकाराश्च।
4. मानसिकदुर्बलतायाः कारणानि।
5. मानसिकस्वास्थ्यविषये मिथ्याः धारणाः तद्विरुद्धे वास्तविकतथ्यानि च।
6. भारते मानसिकस्वास्थ्यस्य न्यायिकदृष्टिकोणाः।

पाठ्यांशः(Unit) - 2

तन्यता, तन्यताप्रबन्धनं समायोजनं च

1. तन्यता सम्प्रत्ययः लक्षणानि च, तन्यतायाः प्रकाराः, सामाजिकाः मनोवैज्ञानिकाः च दृष्टिकोणाः।
2. तन्यताप्रबन्धनं-तन्यताप्रबन्धनस्य अर्थः महत्त्वं तन्यतायाः समायोजनं, निवारणं प्रचाराश्च, समायोजने पित्रोः अभिभावकानां सहपाठिसमूहस्य शिक्षकाणाञ्च च भूमिका।

पाठ्यांशः(Unit) - 3

मानसिकस्वास्थ्यशिक्षायाः कार्यक्रमाः

1. मानसिकस्वास्थ्यशिक्षाकार्यक्रमस्य अर्थः महत्त्वञ्च।
2. भारते मानसिकस्वास्थ्यशिक्षाकार्यक्रमस्य आयामाः।
3. भारते मानसिकस्वास्थ्यशिक्षाकार्यक्रमाणाम् ऐतिहासिकविकासः।
4. मानसिकस्वास्थ्यशिक्षाकार्यक्रमस्य स्थानीयवैश्विकदृष्टिः।
5. स्थानीये अन्ताराष्ट्रियस्तरे च मानसिकस्वास्थ्यविकासाय प्रचलिताः संस्थाः।
6. उत्तममानसिकस्वास्थ्यशिक्षाकार्यक्रमस्य लक्षणानि।

पाठ्यांशः(Unit) - 4

शिक्षणशास्त्रसम्बद्धप्र याह्वानानि

1. गृहं तद्विरुद्धे विद्यालयः च।
2. विद्यालयवैरुध्यं गृहस्य च सन्दर्भाः।
3. शिक्षकाणां मातापित्रोः च जीवनशैली।
4. रूढिवादि-प्रकारस्य भूमिकाः।
5. शिक्षकाणाम् अभिभावकानाञ्च मानसिकस्वास्थ्यस्य चिन्ता।
6. मार्गदर्शनं परामर्शकार्यक्रमः च।
7. अवधारणा, आवश्यकता प्रविधिः च।
8. परामर्शदातृरूपेण शिक्षकः।
9. मानसिकस्वास्थ्यकार्यक्रमस्य परिकल्पना मूल्याङ्कनञ्च।

प्रायोगिकम् (Practicum)

1. मानसिकचिकित्सालये भ्रमणं कृत्वा विद्यालये प्रवेशयोग्यानां चतुर्णां रोगाणां पट्टिकानिर्माणम्।

अथवा

असामान्येन व्यवहारं कुर्वता छात्राणां व्यक्तिवृत्तस्य (Case History) निर्माणम्।

2. भारते न्यायिक-जनस्वास्थ्यनीतीनाञ्च समीक्षात्मकं विश्लेषणम्।

अथवा

विद्यालये छात्राणां तन्यतायाः निवारणाय शिक्षकाणां भूमिकायाः विमर्शनम् ।

3. विद्यालये बालकानां मानसिकस्वास्थ्यस्य सन्दर्भे राष्ट्रीयशिक्षानीतिः 2020 इत्यस्य समीक्षात्मकविश्लेषणम्।

अथवा

भारते मानसिकस्वास्थ्यशिक्षायाः उत्तमस्य कार्यक्रमस्य समीक्षात्मकं विश्लेषणम्।

4. भारते मानसिकस्वास्थ्यशिक्षाकार्यक्रमस्य व्यापकप्रतिवेदनस्य निर्माणम्।

अथवा

मानसिकस्वास्थ्यकार्यक्रमे वैयक्तिकनिर्देशनस्य विमर्शनम्।

प्रवचनप्रक्रिया (Mode of Transaction)

पाठ्यक्रमप्रवचनप्रक्रिया निम्नानुसारेण भवति।

- बहुमाध्यम /पावर-पॉइण्ट् प्रस्तुतिभिः युक्तानि नियोजिताव्याख्यानानि।
- लघुसमूहचर्चा, सामूहिकचर्चाः (Panel Interactions), लघुविषयाधारितगोष्ठ्यः, समूहचर्चा, सहकारिशिक्षणं दलशिक्षणं च, सैद्धान्तिकपाठानां चयनं, व्यक्तिवृत्ताध्ययनं, शैक्षिकसांख्यिकीयविश्लेषणं शैक्षिकरूपेण च वञ्चितसमुदायैः समूहैः च सह व्यक्तिगतक्षेत्रसङ्गतिः, लक्ष्यकेन्द्रितचर्चया सर्वेक्षणम् अल्पकालिकपरियोजनाकार्याणि च।
- विविधसमुदायैः, बालकैः, विद्यालयैः च सह संलग्नतायाः हस्तगतः अनुभवः।

आकलनप्रक्रिया (Mode of Assessment)

परीक्षामाध्यमेन तथा च दत्तकार्याधारेण भविष्यति।

सन्दर्भग्रन्थाः (Reference Books)

- डॉ. अनिल कुमार अग्रवाल., स्व. डॉ. विजय नारायण., मानसिक स्वास्थ्य, उत्तर प्रदेश हिन्दी संस्थान, लखनऊ
- आशीष महावर., मेन्टल हेल्थ एन्ड साइकियाट्रिक नर्सिंग, वर्धन पब्लिशर्स एण्ड डिस्ट्रीब्यूटर्स।
- विकास कुमार., स्वास्थ्य मनोविज्ञान, मोतीलाल बनारसीदास, दिल्ली।

- William Dikel., Student Mental Health – A Guide For Teachers, School and District Leaders, School Psychologists and Nurses, Social Workers, Counselors, and Parent: W. W. Norton & Company
- e-GyanKosh, Post Graduate Diploma in Mental Health (PGDMH) https://egyankosh.ac.in/handle/123456789/39704
- Abnormal Psychology, SWAYAM Platform, https://onlinecourses.swayam2.ac.in/cec21_hs12/preview

2.10 सन्धारणीयविकासाय शिक्षा - 3

सत्रार्द्धः - 8 **श्रेयोऽङ्कः - 4**

पाठ्यांशपरिचयः (About The Course)

संयुक्तराष्ट्रसंघस्य UNESCO इति संस्थायाः कार्यसूच्यनुसारेण समाकलितानां 17 सन्धारणविकासलक्ष्याणाम् अर्थः, स्वरूपं च तेषां शिक्षायां स्थानं कथमिति अनेन पाठ्यांशेन ज्ञास्यते। सन्धारणविकासस्य लक्ष्यानुगुणं NEP 2020 अनुसारेण गुणवत्ताशिक्षायाः परिचयं दातुम् एतत् पत्रं प्रवर्तते। अनेन सर्वकारस्य राजनीतिः तथा च राष्ट्रनीत्यां सन्धारणविकासस्य उपरि कथं परामृष्टमिति अवगमनं भविष्यति।

अधिगमपरिणामः (Learning Outcomes)

- एतेषां पाठ्यांशानाम् अध्ययनेन छात्रः सन्धारणविकासस्य अर्थं प्राधान्यं च ज्ञास्यति।
- शिक्षासन्धारणयोः च परस्परसम्बन्धः कथमिति वक्तुं दक्षः भविष्यति।
- शिक्षासन्धारणविकासस्य वैशिष्ट्यं वक्तुं प्रभविष्यति।
- सन्धारणविकासदृष्ट्या शिक्षायाः अर्थः प्राधान्यं च किमिति वक्तुं प्रभविष्यति।
- सन्धारणविकासानाम् उद्देश्यप्राप्तये शिक्षायाः योगदानं कथमिति वक्तुं प्रभविष्यति।
- सन्धारणविकासस्य बोधनशास्त्रस्य समस्यायाः परामर्शने दक्षतां प्राप्स्यति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	सन्धारणीयविकासाय शिक्षा	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) – 1
शिक्षा सन्धारणविकासः च

1. सन्धारणविकासस्य अर्थः, सम्बन्धः, लक्ष्याणि सार्थकता च।
2. शैक्षिकसन्धारणविकासस्य वैशिष्ट्यानि च।
3. शिक्षासन्धारणविकासाय ऐतिहासिकपरिप्रेक्ष्यम्।
4. दार्शनिकं, सामाजिकं तथा च मनोवैज्ञानिकपरिप्रेक्ष्यम्।
5. सन्धारणविकासाय शिक्षायाः भूमिका।
6. सन्धारणविकासाय उपनिवेशविमुक्त्यनन्तरज्ञानम्।
7. सन्धारणविकासाय शैक्षिकाह्वानानि।

पाठ्यांशः(Unit) -2
सन्धारणविकासस्य लक्ष्यानि

1. समेषां कृते 17 सन्धारणविकासलक्ष्याणि – (UNESCO Agenda).
2. सन्धारणविकासलक्ष्याणि सामाजिकरूपान्तरणीयता अन्ताराष्ट्रियप्रतिबद्धतायै।
3. सन्धारणविकासाय शिक्षा मानवानामवकाशः च।
4. सन्धारणविकासः शान्तिः च।
5. शैक्षिकसंस्थानानां सन्धारणविकासाय भूमिका, सन्धारणविकासाय आह्वानानि च।

पाठ्यांशः(Unit) – 3

सर्वेभ्यः गुणवत्ताशिक्षा

1. गुणवत्तापूर्णशिक्षायाः अर्थः प्रकृतिः सार्थकता च। राष्ट्रियशिक्षानीतिः गुणवत्तापूर्णशिक्षा च। NEP 2020, On SDG – 4 सन्धारणजीवनरीतिः, लैङ्गिकसमानता, शान्तेः प्रचारः, अहिंसा, वैश्विकमानविकता, समीचीनमानसिकस्वास्थ्यं, सम्यग्जीवनं, समाजे नीतिः।
2. शिक्षणशास्त्रविषयः – सन्धारणविकासस्य चतुर्लक्ष्यानुगुणं शिक्षणशास्त्रविषयः।

पाठ्यांशः(Unit) – 4

सन्धारणविकासः – राजनीतिः नीतिः च।

1. नीतिनिर्माणप्रक्रियावबोधः।
2. नीतिविश्लेषणम्।
3. विज्ञानस्य प्रोद्यौगिक्याश्च लोकतन्त्रीकरणं। वैश्वीकरणं, पर्यावरणपुञ्जीवादः परिस्थितिकीसत्ता च।
4. परिप्रेक्ष्यं, रीतिः, कौशलानि च।
5. सन्धारणीयतायै नवाचाराः।
6. वैश्विकपरिप्रेक्ष्ये मुख्यविषयाः।
7. सन्धारणे स्वाधीनानां विमर्शनात्मकविषयाः। सन्धारणीयतया सह संलग्नाः समीक्षणविषयाः।

प्रायोगिकम् (Practicum)

1. सन्धारणीयविकासलक्ष्यानां सन्दर्भे राष्ट्रियशिक्षानीति 2020 विषये समीक्षात्मकसर्वेक्षणस्य प्रस्तुतिः।

   अथवा

   सन्धारणीयविकासाय शैक्षिकाह्वानानां विमर्शनम् ।

2. Delors (1996) आयोगस्य सन्दर्भे प्रतिवेदनस्य 'Learning the treasure within' इत्यस्य समीक्षात्मकमध्ययनम्।

   (अथवा)

   सन्धारणीयविकासस्य विश्वे शान्तिस्थापनाय विमर्शनम्।
3. सन्धारणीयविकासलक्ष्यानां सन्दर्भे अवलोकनात्मकपत्रप्रस्तुतीकरणम्।

   (अथवा)

   सन्धारणीयविकासस्य शैक्षिकाणां लक्ष्याणां प्रामुख्यनिर्धारणाय वादविवादस्पर्द्धायाः आयोजनम्।

4. शैक्षिकसन्धारणविकासाय शैक्षिकमञ्जूषानां निर्माणम्।

(अथवा)

सन्धारणविकासाय अध्यापकानां सर्वस्तरीयानां परिचर्चा, संगोष्ठी, इत्यादीनां समायोजनं तथा कार्ययोजनायाः निर्माणं च।

प्रवचनप्रक्रिया (Mode of Transaction)

पाठ्यवस्तूनां प्रवचनप्रक्रियायाम् अधोविद्यमानानि निर्दिष्टानि भवन्ति।

- PPT माध्यमेन प्रवचनम्।
- लघुसमूहचर्चा, अन्तक्रिया, लघुविषयस्योपरि संगोष्ठी, सामूहिकचर्चा, सहकरणाध्यापनं दलाध्यापनं व्यक्तिवृत्ताध्ययनम्, शैक्षिकसांख्यकीनां विश्लेषणम् अविकसितानुसूचितजानानां जीवनचर्यायाः ज्ञानाय क्षेत्रीयभ्रमणम्, अल्पकालिकप्रदत्तकार्यम्।
- वैविध्यसमूहानां जीवनानां कार्यानुभवः।

आकलनप्रक्रिया (Mode of Assessment)

- प्रदत्तकार्यम्।
- परीक्षा।

सन्दर्भग्रन्थाः (Reference Books)

1. वाचनाय अध्यापकेन पुस्तकानि निर्देष्टव्यानि।
2. डेलोर्स आयोगस्य प्रतिवेदनम्।
3. यूनेस्को इत्यस्य मानवाधिकारमानवाधिकारायोगस्य प्रतिवेदनम्।

2.10 शिक्षायाम् उदीयमाना प्रौद्योगिकी – 4

सत्रार्द्धः – 8

श्रेयोऽङ्काः – 4
सैद्धान्तिकम् 2.2
प्रायोगिकम् 1.8

पाठ्यपरिचयः (About the course)-

पाठ्यमिदं कक्षायां सूचनासम्प्रेषणप्रौद्योगिक्याः उपयोगं कर्तुं विनिर्मितम्। एतत् 21 शताब्द्याः महत्त्वपूर्णं कौशलं तथा च देशे सूचनाप्रौद्योगिकी-समर्थितशिक्षायै महत्त्वपूर्णं सोपानं वर्तते। पाठ्यमिदं विभिन्नान् सूचनाप्रौद्योगिकीसम्बद्धोपागमान् तथा च शिक्षणशास्त्रे मूल्याङ्कने प्रबन्धने च तेषाम् एकीकरणम् प्रतिपादयति। पाठ्यमिदम् ऑनलाइन-ऑफलाइन-तन्त्रांशानुप्रयोगाणां ज्ञाने प्रयोगे च छात्राध्यापकानां साहाय्यं करोति अथ च प्रौद्योगिकीसम्बद्धसामाजिक-आर्थिक-नैतिकविषयाणाम् अवबोधसंवर्धने अपि साहाय्यं करोति।

अधिगमपरिणामः (Learning Outcomes)–

अस्य पाठ्यविषयस्य अध्ययनानन्तरं छात्राध्यापकाः समर्थाः भविष्यन्ति –

- शिक्षाक्षेत्रे प्रौद्योगिक्याः आवश्यकतायाः उपयोगानां च वर्णने,
- संसाधनानां निर्माणाय विविधानां डिजिटलप्रौद्योगिकीनाम् उपयोगे,
- दिव्याङ्गैः सह सर्वप्रकारकच्छात्रेभ्यः अधिगमानुभवप्रदाने,
- कक्षायाम् अधिगमवातावरणनिर्माणे,
- छात्राणां सर्जनशीलतां वर्धयितुं सूचनाप्रौद्योगिक्याः भूमिकावगमने,
- व्यापक-मुक्त-ऑनलाईन-पाठ्यक्रमाणाम् (MOOCs) उपयोगे,
- प्रामाणिके वैकल्पिके च आकलने सूचनाप्रौद्योगिकीनां भूमिकायाः व्याख्यायाम्,
- सूचनाप्रौद्योगिक्या उपयोगेन सह सम्बद्धसामाजिक-आर्थिक-नैतिक-विषयेषु चर्चायाम्,

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	शिक्षायाम् उदीयमाना प्रौद्योगिकी	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) - 1

शिक्षा प्रौद्योगिकी च

1. शिक्षायां प्रौद्योगिक्या अर्थः प्रकृतिः महत्त्वं च।
2. शिक्षायाः प्रौद्योगिकी शिक्षायां प्रौद्योगिकी चेत्यनयो अवधारणात्मस्पष्टता।

3. शिक्षाप्रौद्योगिक्योः सम्बन्धः।
4. शिक्षायां प्रौद्योगिक्या उपयोगस्य ऐतिहासिकविकासः।
5. शिक्षायां प्रौद्योगिक्या उपयोगस्य सिद्धान्ताः।
6. शिक्षायां प्रौद्योगिक्या उदीयमानाः प्रवृत्तयः।

पाठ्यांशः(Unit) - 2

सूचनासम्प्रेषणप्रौद्योगिकी

1. सूचनासम्प्रेषणप्रौद्योगिक्या अर्थः प्रकृतिः प्रकाराश्च ।
2. सूचनासम्प्रेषणप्रौद्योगिक्या आधाराः।
3. सूचनासम्प्रेषणप्रौद्योगिक्या उपकरणानि अनुप्रयोगाश्च।
4. यन्त्रांशः तन्त्रांशश्च - अर्थः भेदाः प्रकाराश्च ।
5. ङ.प्रणालीतन्त्रांशाः अनुप्रयोगतन्त्रांशाः।
6. च.सूचनासम्प्रेषणप्रौद्योगिक्या अनुप्रयोगः बहुविधबुद्धिः च।
7. छ.सूचनासम्प्रेषणप्रौद्योगिक्या सह सम्बद्धाः सामाजिक-आर्थिक-नैतिकविषयाः।

पाठ्यांशः(Unit) - 3

शिक्षायां शिक्षणशास्त्रे च प्रौद्योगिकी

1. शिक्षणाधिगमयोः प्रौद्योगिक्याः एकीकरणोपागमाः।
2. अधिगमनिर्माणाय सौविध्याय च विषयविशिष्टानि सूचनासम्प्रेषणप्रौद्योगिक्योपकरणानि।
3. विषयविशिष्टानि ऑनलाइनसंसाधनानि पाठयोजनायां तेषाम् उपयोगश्च।
4. प्रौद्योगिकी-एकीकृताधिगम-अनुभवः अधिगमवातावरणस्य निर्माणञ्च।
5. विशिष्टावाश्यकतायुक्तानां बालानां कृते प्रौद्योगिक्याः उपयोगः- साधनानि प्रक्रियाश्च; अधिगमाय सार्वभौमिकाभिकल्पः।
6. व्यापक-मुक्त-ऑनलाइन-पाठ्यक्रमाणाम् (MOOC)-अवधारणा उपयोगश्च।
7. मूल्याङ्कनाय प्रबन्धनाय च सूचनासम्प्रेषणप्रौद्योगिकी।

पाठ्यांशः(Unit) - 4

ऑनलाइन- ऑफलाइनतन्त्रांशानामानुप्रयोगः अनुदेशनं च

1. शब्दसंसाधनं, स्प्रेडशीट्, प्रस्तुतिश्च - विशेषताः शैक्षिकप्रयोगाश्च।
2. रेखाचित्रणोपकरणानि- आकृतयः, सम्प्रत्ययमानचित्रणं, समयरेखा, प्रवाहचित्रम्- इत्येतेषां शैक्षिकानुप्रयोगः।
3. ब्लॉग् सूक्ष्मब्लॉग् च – चिन्तनात्मकपत्रिकाकरणम् अन्ये च शैक्षिकप्रयोगाः।
4. अनुदेशात्मकमाध्यमानाम् अभिकल्पनं मूल्याङ्कनं वितरणस्य आव्यूहाश्च।
5. अन्तःक्रियात्मकसामग्रीनिर्माणं - कथाफलकं, वै-पाठ्यस्य रूपरेखा, अन्तःक्रियात्मकगतिविधयः, अन्तःफलकं च
6. बहुमाध्यमोपकरणानि - श्रव्यसम्पादनं दृश्यसम्पादनं स्क्रीनकास्टिंग् ग्राफिकसम्पादनम्
7. एनिमेशन् इत्यस्य आधाराः अन्तःक्रियात्मकमाध्यमानां निर्माणं च।

8. वै-सामग्रीलेखनोपकरणानि – मुक्तस्रोतांसि स्वामित्वविकल्पाश्च।

प्रायोगिकम् (Practicum)-

1. विकिस्पेस्/संस्कृतविकिपीडिया/मीडियाविकि इत्यत्र स्वकीयं वै-कोषं निर्माय सामग्रीयोजनं सम्पादनं वा।

   अथवा

   www.blogger.com, www.wordpress.com इत्यत्र कस्यचिदेकस्य सन्दर्भे शैक्षिकब्लॉग इत्यस्य विकासः।
2. सम्बद्धस्य विषयस्य कृते बहुमाध्यम-ई-सामग्रीविकासः।

   अथवा

   कस्यापि एकस्य विषयस्य कृते डिजिटल-रूब्रिक इत्यस्य योजना तन्निर्माणं च।
3. Skype/Yahoo/ Messenger/ Google+ इत्युपयोगेन जालसम्मेलनस्य आयोजनम्।

   अथवा

   यन्त्रांशयोजनायाः विषये संगणकयन्त्रांशाभियन्तुः ICT विशेषज्ञस्य वा साक्षात्कारः। मूल्याङ्कनम् अनुरक्षणम् अद्यतनीकरणं च।
4. शिक्षायां प्रौद्योगिकीसन्दर्भे राष्ट्रियशिक्षानीतेः२०२० राष्ट्रीय सूचनाप्रौद्योगिकीनीते, पाठ्यचर्यायाः समीक्षणम्।

   अथवा

   प्रचलितस्य EDUSAT इति केन्द्रस्य क्षेत्रभ्रमणं दूरसम्मेलने च भागग्रहणम्।

प्रवचनप्रक्रिया (Mode of Transaction) - पाठ्यप्रवचनप्रक्रियायाम् अन्तर्भवन्ति -

- बहुमाध्यमोपकरणप्रयोगेण व्याख्यानानि।
- लघुसमूहचर्चा, विषयाधारिता लघुसंगोष्ठी, परिसंवादः, समूहचर्चा, दलशिक्षणमं, सहकारी अधिगमः, सिद्धान्तपठनेभ्यः चयनं, प्रकरणविश्लेषणं, व्यक्तिवृत्ताध्ययनम् इत्यादयः
- शिक्षावञ्चितसमुदायेन वा समूहेन साकं क्षेत्रानुभवं सम्प्राप्य अवधानसमूहचर्चया, सर्वेक्षणेन अल्पकालिकपरियोजनाभिः प्राप्तशैक्षिकसांख्यिक्याः विश्लेषणम्।
- विविधसमुदायैः छात्रैः विद्यालयैश्च साकं संलग्नं भूत्वा अनुभवाधारप्रकल्पनम्।
- प्रयोगशालागतिविधयः

आकलनप्रक्रिया (Mode of Assessment)- आकलनप्रक्रिया परीक्षणाधारिता प्रदत्तकार्याधारिता च भविष्यति।

सन्दर्भग्रन्थाः (Reference Books)

- मिश्रः, रमाकान्तः - शैक्षिकप्रविधिः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी।
- पाण्डयेः सोहनलाल, शिक्षणस्य आयोजनप्रविधिः, अक्षर प्रकाशनम्, जयपुरम्।
- कुलश्रेष्ठ, एस. जी., शैक्षिक तकनीकी के मूलाधार, विनोद पुस्तक मन्दिर, आगरा।

- शर्मा, सुदेश कुमारः - शैक्षिकप्रविधिशास्त्रम्, दीपमाधव प्रकाशनम्, जयपुरम्।
- मित्तलः सन्तोषः, शैक्षिक तकनीकी एवं कक्षा कक्ष प्रबन्धन, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर।
- तिवारी, नीलाभः - शिक्षणाधिगमप्रक्रियायै सूचनासम्प्रेषणप्रविधिः, राष्ट्रियसंस्कृतसंस्थान्, भोपालपरिसरः।
- Song, H. & (2010) - Handbook of Research on Human Performance and instructional technology, Information Science Reference, Hershey.
- Doering, A. & - Teaching with instructional software Pearson Education, NJ.
- UNESCO (2015) - Copyright. In open Accerr for Rerearchars: Intelleatual property rights unesco, Paris.

2.10 लैङ्गिकशिक्षा - 5

सत्रार्द्धः – 8 **श्रेयोङ्कः – 4**

पाठ्यपरिचयः (About the course)

लैङ्गिकशिक्षायाः अयं पाठ्यक्रमः लैङ्गिकता शिक्षा च इति द्वयोः मध्ये अन्तःसम्बन्धं विकासयति। अस्य पाठ्यक्रमस्य प्रारूपं सम्पूर्णत्वेन लैङ्गिकमवगन्तुं निर्मितमस्ति, विशिष्टरूपेण लिङ्गभेद-लैङ्गिकरूढिवादितयोः सन्दर्भे विद्यालयीयपाठ्यसामग्र्याः अवलोकनं महत्त्वपूर्णमस्ति। अथ च लैङ्गिकसमानता, यौनहिंसा, यौनशोषणं संवैधानिकप्रावधानानि च प्रतिपादितानि सन्ति।

अधिगमपरिणामः (Learning Outcomes)

अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापकाः अधोलिखितेषु समर्थाः भविष्यन्ति -

- लैङ्गिक-परिवर्तितलिङ्गम्/रूपान्तरितलिङ्गम् (Transgender) - यौन-पितृसत्ता-पुरुषत्व-स्त्रीत्व-इति एतेषां पदानां सम्प्रत्ययात्मकावगमने समर्थाः भविष्यन्ति।
- महिला-अध्ययनात् लैङ्गिकाध्ययनं प्रति व्याख्यानं कर्तुं समर्थाः भविष्यन्ति।
- विद्यालये, पाठ्यक्रमे च पाठ्यसामग्र्यां विभिन्नविषय-शैक्षणिकप्रक्रिया-वर्ग-जाति-धर्म-क्षेत्रैः सह अन्तर्सम्बन्धेषु लैङ्गिकसमस्यानां स्पष्टीकरणे समर्थाः भविष्यन्ति।
- लैङ्गिकसमस्यासन्दर्भे विद्यालयीयवातावरणं, पाठ्यक्रमं, शिक्षणञ्च परीक्षितुं समर्थाः भविष्यन्ति।
- यौनं, यौनहिंसां, यौनशोषणमिति एतेषां संबोधने समर्थाः भविष्यन्ति।
- कक्षाविद्यालयीयवातावरणे च लैङ्गिकसंवेदीकरणं सर्जने च समर्थाः भविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	लैङ्गिकशिक्षा	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) -1

लैङ्गिकं शिक्षा च

1. लैङ्गिकशिक्षायाः अर्थः, सम्बन्धः अध्ययनस्य सार्थकता च।
2. सम्बद्धपदानां सम्प्रत्ययात्मकस्पष्टता – लैङ्गिकं, लैङ्गिकपरिप्रेक्ष्यं, लैङ्गिकता (Sexuality), पितृसत्ता, पुरुषत्वं, स्त्रीत्वं, लिङ्गविभेदं, परलैङ्गिकं, लैङ्गिकरुढ़िवादिता, सशक्तता च।
3. विद्यालययीशिक्षायां आधारत्वेन लैङ्गिकम्।
4. बालिकानां समता-समानतयोः अधिकारस्य विशेषसन्दर्भे संवैधानिकप्रावधानम्।
5. शिक्षा स्त्रीसशक्तीकरणञ्च।
6. महिला-अध्ययनात् लैङ्गिक-अध्ययनं प्रति।

पाठ्यांशः(Unit) -2

लैङ्गिकभूमिकानाम् अधिगमनम्

1. सामाजिकसांस्कृतिकपरिप्रेक्ष्ये लैङ्गिकप्रत्यभिज्ञानम् परिवार-विद्यालय-जनसञ्चारमाध्यम-औपचारिक-अनौपचारिकसंस्थानां भूमिका।
2. समाजीकरणं लैङ्गिकभूमिकानाम् अधिगमनम् च।
3. लैङ्गिकरूढिवादिता/प्रेरणास्रोतांसि(Role Models)।
4. प्रतिबन्धस्योपायाः – विद्यालयस्य गृहस्य च भूमिका।

पाठ्यांशः(Unit) -3

लैङ्गिकं, यौनं, यौनोत्पीडनं शोषणं च

1. लैङ्गिक-दैहिक-प्रेरणास्रोतसां सन्दर्भे लैङ्गिकतायाः विकासः, बालेषु तस्य प्रभावश्च।
2. औपचारिक-अनौपचारिकसंस्थासु यौनोत्पीडनं तत्परिहारोपायाश्च।
3. पूर्वप्राथमिकस्तराद् माध्यमिकपर्यन्तं बालयौनोत्पीडनं, बालयौनोत्पीडनं प्रति समुचितसूचनाप्रदानम्। बालेषु यौनोत्पीडनस्य चिह्नानां प्रत्यभिज्ञानं, सहायता च।
4. यौनोत्पीडनं प्रति कर्त्तव्यम् अकर्त्तव्यं च।
5. संवैधानिकपरिप्रेक्ष्यं – महिलाबालिकानाञ्च सुरक्षा, संवैधानिकनियमाश्च, POSCO अधिनियमस्य क्रियान्वयनम्।

पाठ्यांशः(Unit) -4

शिक्षणशास्त्रस्य समस्याः

1. कक्षाशिक्षणाभ्यासस्य विश्लेषणम्।
2. विद्यालयीयवातावरण-लैङ्गिकमैत्रीपूर्णकक्षयोः सर्जनम्।
3. लैङ्गिकपरिप्रेक्ष्याधारे पाठ्यक्रमस्य विश्लेषणम्, अधिगमपरिणामः, पाठ्यसामग्री, शिक्षणाधिगमप्रक्रिया, प्रयुक्ताभाषा, सहायकसामग्री, आकलनरणनीतयः च।
4. लैङ्गिकसंवेदनत्वसम्पन्नः विद्यालयीयपाठ्यक्रमाय सूचनासञ्चाराधारितशिक्षणशास्त्रम्।
5. शिक्षणशास्त्रेषु उपहुतयः।

प्रायोगिकम् (Practicum)

1. शिक्षायां लैङ्गिकविषयाणां सन्दर्भे राष्ट्रियशिक्षानीतीनां (1986/1992/2020) प्रतिवेदननिर्माणम्।

परियोजनानां निर्माणम्

1. लैङ्गिकभेदं, लैङ्गिकरूढिवादिताञ्च प्रत्यभिज्ञानाय लैङ्गिकपरिप्रेक्ष्ये पाठ्यसामग्रीणां विश्लेषणम्।
2. महिलानां बालिकानाञ्च सशक्तीकरणाय आयोगानां नीतीनाञ्च संस्तुतयः।
3. महिला-समाख्य-कार्यक्रमः।
4. विविधक्षेत्रेषु महिलाप्रेरणास्रोतांसि मुख्यत्वेन अपरम्परागतभूमिकासु।
5. महिलानां निरूपणे दृश्याभिलेखः।

6. लोकथायां समाजीकरणस्य प्रक्रिया।

अथवा

छात्राः यौनसम्बधं स्वशरीरप्रतिमां च कथं गृह्णान्ति।

प्रवचनप्रक्रिया (Mode of Assessment)

- बहुमाध्यमेन/पावरप्वाइंट प्रस्तुतीकरणेन नियोजितं व्याख्यानम्।
- लघुसमूहचर्चा, परिसंवादः, लघुविषयाधारिता संगोष्ठी, समूहचर्चा, सहशिक्षणं, दलशिक्षणं, सैद्धान्तिकपाठनात् चयनं, व्यक्तिवृत्ताध्ययनं, शैक्षिकसांख्यकीनां विश्लेषणं च वञ्चितसमूहैः सह व्यक्तिगतक्षेत्रयोजनं, समूहकेन्द्रितचर्चा, सर्वेक्षणम्, अल्पकालिकप्रायोजनाकार्यम्।
- विविधसमुदायैः बालकैः विद्यालयैश्च सह योजनस्य व्यावहारिकानुभवः।

सन्दर्भग्रन्थाः (Reference Books)

- सलूजा, चाँद किरण, शिक्षाः सामाजिक परिप्रेक्ष्य, हिन्दी माध्यम कार्यान्वय निदेशालय, दिल्ली विश्वविद्यालय, दिल्ली।
- बिसवाल, तपन, मानवाधिकार जेन्डर एवं पर्यावरण, विवा बुक्स प्राइवेट लिमिटेड, नई दिल्ली।
- लोढा, महावीरमल, नैतिक शिक्षाः विविध आयाम, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर।
- Bhasin, Kamala, Understanding Gender, Kali for Women Publications, New Delhi.
- Menon, Nivedita, Gender and Politics in India, Oxford University Press, New Delhi.

2.10 निर्देशनं परामर्शनञ्च -6

सत्रार्द्धः – 8 **श्रयोऽङ्कः – 4**

पाठ्यपरिचयः (About the course)–

निर्दिष्टपाठयक्रमः चतुर्षु (भागेषु) पाठ्यांशेषु विभक्तोऽस्ति। अस्योद्दश्यमस्ति यत् छात्राः निर्देशनस्य उपबोधनस्य च मूलभूततत्त्वानां कक्षागतशिक्षणाधिगमप्रक्रियायाः च प्रयोगज्ञानं प्राप्नुयुः इति। अस्मिन् मनोवैज्ञानिकपरीक्षणविषये निदानात्मकपक्षे चापि चर्चितम्। नैतिकाधारेण तेषां कारकाणां (बाधककारकाणां) परामर्शस्य च लाभाः महत्वञ्चापि अस्मिन् पाठ्यांशे वर्णितमस्ति। श्रवण–दृष्टिबाधितानाम् अधिगमकष्टानां च छात्राणां निर्देशनविषये उपबोधनविषये च अवबोधः करणीयः इति हेतोः इदं पत्रं प्रवर्तते।

अधिगमपरिणामः (Learning Outcomes) –

पाठ्यक्रमस्य पूर्त्यनन्तरं छात्राः सक्षमाः भविष्यतिः-

- निर्देशनस्य उपबोधनस्य चार्थम् आवश्यकता–विशेषाणां सन्दर्भे व्याख्यानं कर्तुम्,
- निर्देशन–उपबोधनविषये विशेषतया प्रयोजनानां व्यूहानां च मध्ये भेदावगन्तुम्,
- सामाजिक–मनौवैज्ञानिक–ऐतिहासिकपरिप्रेक्ष्ये निर्देशन–उपबोधनविषये स्पष्टीकर्तुम्,
- छात्राणां विद्यालये च निर्देशनस्य अवबोधनस्य च विशेषतानां प्रतिपादने,
- उपबोधनकार्यक्रमाणामायोजने,
- शिक्षासम्बद्धनीतीनाम्, आयोगानां च निर्देशनतया, उपबोधनसन्दर्भे विश्लेषणे।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	निर्देशनं परामर्शनञ्च	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) -1

निर्देशनम् (Guidance)

1. निर्देशनस्य अर्थः, आवश्यकता, प्रकृतिः, क्षेत्रञ्च।
2. भारते निर्देशनस्य ऐतिहासिकपृष्ठभूमिः।
3. व्यक्तिगत–सामूहिकनिर्देशनम्।
4. निर्देशनसम्बद्धाः आधारभूतसिद्धान्ताः, मान्यताश्च।
5. व्यक्तिगत–सामूहिक–निर्देशनस्य आवश्यकतानाञ्च अवबोधः।
6. प्रभावपूर्णनिर्देशनार्थम् आवश्यकसूचनाः।
7. शैक्षिक–व्यावसायिकनिर्देशनम् अध्यापकानां भूमिका च।

पाठ्यांशः(Unit) – 2

उपबोधनम्। (Counseling)

1. अर्थः, महत्त्वम्, क्षेत्रम्, उपबोधनप्रकाराः:।
2. उपबोधनोपागमा: – निर्देशात्मकः, अनिर्देशात्मकः, उदारवादी, व्यवहाराधारितः, संज्ञानामकश्च।
3. उपबोधनस्य प्रक्रिया – उपबोधनस्य सज्जता, अन्तः सम्बन्धस्थापना (Rapport) ,प्रारम्भिक साक्षात्कार समाप्तिः प्रतिक्रिया च ।
4. संरचनाया: स्थापनाः – ध्यानाकर्षकव्यवहार:,अवलोकनम्, अशाब्दिकव्यवहार:, श्रवणम्, शाब्दिकाकृतिः, सम्प्रेषणप्रत्युत्तराणि, मौनम्, प्रश्नानामुपयोग:, स्थानान्तरणं, प्रतिस्थानान्तरणं, संक्रमणं, प्रतिसंक्रमणम्, उपबोधनसम्बन्धमर्यादा, आदरभाव इच्छुकानिच्छुकलाभार्थिनामपेक्षा।
5. परिवारस्य समाजस्य च भूमिका।

पाठ्यांशः(Unit) -3

प्रादत्तानां संकलनोपकरणानि प्रविधयश्च

1. मनोवैज्ञानिकपरीक्षणं निदानञ्च आवश्यकता प्रकृतिश्च।
2. परीक्षणस्य प्रयोग:विवेचना च,मूल्याङ्कन विधयः।
3. उपबोधनसाक्षात्कार: आवश्यकपक्षा:, आधारप्रक्रिया: समस्या:, समाधानानि च।
4. व्यक्तित्वमूल्यांकनम् : ऐतिहासिकपरिप्रेक्ष्यः।
5. उपयुज्यमानव्यक्तित्वसूचीनां प्रश्नावलीनां तथा प्रक्षेपीपरीक्षाणां सामग्रीप्रशासनम्, अंकनिर्धारणं विवेचनं,मूल्याङ्कनम् च।
6. व्यक्तित्वभिमुखीकरणं परीक्षणं निर्धारणमापनी च – व्यवहारस्य प्रकारा:, व्यवहारस्य नियन्त्रणस्थानम्(Locus of control), अभिवृत्तिमापनी, ST, AI, अन्या: नैदानिकनिर्धारणमापन्यश्च।
7. व्यक्तिवृत्ताध्ययनम् – आवश्यकता महत्वञ्च।

पाठ्यांशः(Unit) – 4

निर्देश–उपबोधनसम्बद्धा: समस्या:। (Issues Related Guidance and Counseling)

1. निर्देशने उपबोधने च जायमानानि बाधककारकाणि।
2. निर्देशने उपबोधने च जायमाना: नैतिकसमस्या:।
3. उपबोधनस्यविशेषसन्दर्भे निदानात्मकदृष्ट्या सीमाङ्कनम्।
4. विद्यालयेषु मार्गदर्शन-परामर्श कार्यक्रमाणां आयोजनार्थं उपहुतयः।
5. अधिगमाक्षमाणां , दृष्टिबाधितानां, श्रावणबाधितानाञ्च जनानां निर्देशनम् उपबोधनञ्च।
6. विद्यालयेषु उपबोधनसेवासम्बद्धानि आह्वानानि।

प्रायोगिकम् (Practicum) –

1. अधिगमे काठिन्यमनुभवतां छात्राणां व्यक्तित्वविधिमाध्यमेन व्यक्तित्वाध्ययनम्।
2. निर्देशन – परामर्श/उपबोधनकार्यक्रमाणाम् आयोजने जायमानानां समस्यानाम् आह्वानानां च प्रतिवेदनप्रस्तुतिः।

प्रवचनप्रक्रिया (Mode of Transaction)–

1. योजनानुसारेण व्याख्यानं, प्रविध्याधारितप्रस्तुतीकरणम्।
2. स्वल्पसमूहचर्चा, विशिष्टदलानाम् अन्त:क्रिया, विषयाधारितसंगोष्ठीनामायोजनं, समूहचर्चा, सहयोगशिक्षा, समूहशिक्षणञ्च। उचितसिद्धान्ताधारितपठनपाठनात् व्यक्तिवृत्ताध्ययनं, क्षेत्राधारितशैक्षिकसांख्यिकीविशलेषणम्, अधिगमाधिकाररहितसमूहेन आत्मन: नियोजनम्, अल्पकालिकपरियोजनादिद्वारा सर्वेक्षणम्। शैक्षिकदृष्टया अधिगमावसरैः वांछितसमुदायैः समूहैः सह व्यक्तिगत क्षेत्रसङ्गतिः केन्द्रियसमूहचर्चामाध्यमेन, सर्वेक्षणं अल्पकालिक परियोजना च।
3. विविधसमूहेषु, छात्रेषु, विद्यालयेषु, अनुभावाधारितक्रियाकलापा:।

आकलनप्रक्रिया (Mode of Assessment)–

परीक्षणम् (प्रदत्तकार्याणामाधारेण सम्पाद्यमानम्)

सन्दर्भग्रन्थाः (Reference Books)

2.10 मानवाधिकारशिक्षा -7

सत्रार्द्धः – 8 **श्रेयोऽङ्काः – 4**

पाठ्यपरिचयः (About the course)

मानवाधिकारः समानतायाः निष्पक्षतायाश्च सम्बन्धितानां सिद्धान्तां कश्चन समूहो वर्तते। मानवजीवने मनुष्यरूपे क्षमतानां विकासाय, आत्मनोऽवगमनाय च, तथा स्वतन्त्रविचारभिव्यक्तये भेदभावं विमुच्य समाजस्य कल्याणसाधनमेव मानवाधिकाराणां परमकर्तव्यं विद्यते। एते अधिकाराः प्रत्येकं व्यक्तेः शारीरिक-मानसिक-सामाजिक-आध्यात्मिक-आर्थिकोन्नतये स्वाधीनतायाः मर्यादाश्च संरक्षणाय पालनीयाः अंशाः विद्यन्ते।

मानवाधिकारः मानवसमाजस्य जातेश्च कृते कश्चन जन्मगताधिकारः मूल्यानां स्वरूपे जनेषु निहीतं भवतीति प्रशिक्षणार्थिनः जानीयुः, तथा च अधिकाराणां संरक्षणाय उद्यताः भवेयुः। समानतादीनाम् अधिकाराणां पालनेनैव सामाजिकव्यवस्था, आर्थिकव्यवस्था, राजनैतिकव्यवस्था, धार्मिकव्यवस्था, सांस्कृतिकव्यवस्था च प्रत्येकं राष्ट्रस्य सुदृढा आधारशिला भवतीति प्रशिक्षणार्थिनः अवगच्छेयुः। शिक्षकप्रशिक्षणकार्यक्रमेषु मानवाधिकारशिक्षायाः स्वरूपं, शिक्षायाः अधिकारः अधिनियमश्च चेत्यादिविषयाणामवगमने समर्थाः भवेयु। भारतीयशिक्षाशास्त्रीणां संविधाननिर्मातृसदस्यानां च मानवाधिकारसन्दर्भे अवदानेन सुपरिचिताः स्युः।

भारतीयसंविधानस्य वैशिष्ट्यं, तत्रैव महिलानां, बालकानां, बालिकानां, सामाजिकोपेक्षितानां च सन्दर्भे विशेषाधिकान् प्रति जागरूकतां सम्पाद्य विद्यालयशिक्षकयोः भूमिकायाः विषये ज्ञानमवाप्य मानवसमाजस्य विकासाय उन्नतये च आत्मनः योगदानं दद्युरिति।

अधिगमपरिणामाः (Learning Outcomes)

अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापकाः –

- मानवाधिकाराणां समानतायाश्च अवगमने समर्थाः भवेयुः।
- मानवाधिकाराणां सम्प्राप्तये राष्ट्रियम् अन्ताराष्ट्रियञ्च प्रयासानाम् अवगमने समर्थाः भवेयुः।
- मानवाधिकारशिक्षणविधीनाम् अवगमने योग्याः स्युः।
- मानवाधिकारजागरूकतायाः संवर्धने विद्यालयानाम् अध्यापकानाञ्च भूमिकायाः विषये अवगमने समर्थाः भवेयुः।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	मानवाधिकारशिक्षा	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) -1

मानवाधिकारः

1. मानवाधिकारशिक्षायाः सम्प्रत्ययः आवश्यकता च।
2. भारतीयसंविधाने मानवाधिकाराः।

3. मानवाधिकाराणां प्रकाराः-
    - समानतायाः अधिकारः
    - शिक्षायाः अधिकारः
    - संरक्षणस्य अधिकारः
    - सुरक्षायाः अधिकारः
4. बालानां विशेषसन्दर्भे – यौन-अपराधः बालसंरक्षण-अधिनियमः (पी.ओ.सी.एस्.ओ. अधिनियमः 2012)

पाठ्यांशः(Unit) - 2

विभिन्नस्तरेषु मानवाधिकारशिक्षा

1. प्राथमिकस्तरे, माध्यमिकस्तरे, उच्चस्तरे च।
2. मानवाधिकारशिक्षायाः पाठ्यक्रमः, संरचना स्वरूपञ्च।
3. शिक्षकप्रशिक्षणकार्यक्रमेषु मानवाधिकारशिक्षायाः स्वरूपम्।
4. शिक्षायाः अधिकारः अधिनियमः (आर.टी.ई)।

पाठ्यांशः(Unit) - 3

मानवाधिकारणां संरक्षणाय प्रयासाः

1. राष्ट्रियमानवाधिकारायोगः (एन्.एच्.आर्.सी.) तदुद्भवः प्रकार्याणि क्षेत्रञ्च।
2. राज्यमानवाधिकारायोगः (एस्.एच्.आर्.सी.) तदुद्भवः प्रकार्याणि क्षेत्रञ्च।
3. महिलानां, बालकानां सामाजिकोपेक्षितानाञ्च विशेषाधिकाराः।
4. भारते मानवाधिकारान्दोलनानां स्वरूपं महत्त्वञ्च।

पाठ्यांशः(Unit) - 4

मानवाधिकारशिक्षा

1. बालकानां विशेषसन्दर्भे अधिगन्तृशिक्षकयोः कर्तव्याधारिताधिकाराः।
2. सूचनायाः अधिकारः अधिनियमः (आर्.टी.आई.)।
3. अधिकाराः कर्तव्यानि च, विशेषसन्दर्भे मानवाधिकारान् प्रति जागरूकतायाः विकासे प्रचारे च विद्यालयशिक्षकयोः भूमिका।
4. मानवाधिकारसम्बन्धिविचाराः - राजाराममोहनरायः, महात्मा गाँधी, भीमराव अम्बेडकरः।

प्रायोगिकम् (Practicum)-

1. भारतीयसमाजे मानवाधिकारशिक्षायाः प्रासंगिकतासन्दर्भे परिचर्चायाः आयोजनम्।

   अथवा

   भारते मानवाधिकाराणां सुरक्षायै विहितप्रयत्नानां रूपरेखानिर्माणं विमर्शश्च।
2. विभिन्नस्तरेषु मानवाधिकारशिक्षायाः परिचयात्मकं विमर्शनम्।

   अथवा

   बालानां महिलानां च सन्दर्भे अधिकार-अधिनियमयोः अवबोधनाय चित्राणां निर्माणम्।

3. मानवाधिकाराणां संरक्षणाय भारतीयशिक्षायाः आयोगानां भूमिकायाः आलोचनात्मकं चिन्तनम्।

अथवा

भारते मानवाधिकारान्दोलनानां समीक्षणम्।

4. मानवाधिकाराणां जागरूकतायै शिक्षाकेन्द्राणां सामाजिकसङ्घटनानां धार्मिकसङ्घटनानां च भूमिकायाः विषये परिचर्चा।

अथवा

प्रमुखानां भारतीयशिक्षाशास्त्रीणां पाश्चात्त्यशिक्षाशास्त्रीणाञ्च मानवाधिकाराणां सन्दर्भे अवदानस्य परिचयात्मकं विमर्शनम्।

प्रवचनप्रक्रिया (Mode of Transaction) -

पाठ्यसामग्र्याः प्रवचनप्रक्रियायां विविधाः आयामाः पाठ्यांशाश्च समाविष्टाः सन्ति -

- प्रवचने व्याख्यानशिक्षणविधेः माड्यूलशिक्षणविधेश्च प्रयोगः।
- पॉवरपाइन्ट माध्यमेन योजनाबद्धरीत्या व्याख्यानम्।
- कक्षापरिचर्चा, दलशिक्षणं विशिष्टव्याख्यानानामायोजनं, संङ्गोष्ठीनामायोजनं, सहयोगिमूल्याकलनस्य योजना, वीथीनाटकानामायोजनं, जनचेतनाशोभायात्राणामायोजनं, सर्वेक्षणं, रिपोर्टलेखनं, चित्रनिर्माणं, स्लोगनप्रतियोगिता, अल्पकालिक-परियोजनाकार्यञ्च।

आकलनप्रक्रिया (Mode of Assessment) -

परीक्षणाधारितं सत्रीयकार्याधारितं च आकलनं भविष्यति।

सन्दर्भग्रन्थाः (Reference Books)

- क्रैन्स्टन, एम. (1973) – व्हाइट् आर् ह्यूमन् राइट्स्, लन्दन, बोडली हैड।
- कश्यपः, चन्द्रः, सुभाषः (1978) – ह्यूमन् राइट्स एण्ड पार्लियामेन्ट, नई दिल्ली, मेट्रोपोलिटिन कम्पनी प्राईवेट लिमिटेड।
- कैम्पबैल, टी (एडीस्) (1986) – ह्यमन् राइटः, रिटोरिक टू रीडिटी, ब्लेकवेल, आक्सफोर्ड।
- खन्ना, डी.पी. (2001) – रिफोर्मिंग ह्यूमन् राइट्स्, नई दिल्ली, मानस पब्लिकेशन।
- स्यमोनीडेस्, डुनूज (2002) – ह्यूमन् राइट्स् कान्सेप्ट एण्ड स्टेन्डर्डस्, नई दिल्ली, रावत पब्लिकेशन।
- सैयद, एम्.एच्. (2003) – ह्यूमन् राइट्स् – द व्यू ऐरा, नई दिल्ली, कैलक्षौ बुक।
- पण्डा, लक्ष्मीधरः (2012) – मानवाधिकारोपेतमूल्यशिक्षा, भुवनेश्वर, तीरतरंग पब्लिकेशन।
- मोहन्तिः, जगन्नाथः – टीचिंग ऑफ ह्यूमन् राइट्स्, देहली, दीप पब्लिकेशन।
- शर्मा, माताप्रसादः – मानवाधिकारशिक्षा, जयपुरम्, शुभम प्रकाशन।

2.10 शान्तिशिक्षा -8

सत्रार्द्धः - 8 **श्रेयोऽङ्काः-4**

पाठ्यपरिचयः (About the Course)

अयं पाठ्यक्रमः राष्ट्रिये वैश्विके च परिप्रेक्ष्ये शान्तिशिक्षायाः सैद्धान्तिकानां व्यावहारिकाणां च आधाराणां व्यापकं समीक्षात्मकं च अवबोधनं विकसितं कर्तुं संरचितः अस्ति। एतस्य उद्देश्यम् अस्ति शान्तेः मूल्यस्य संवर्धनम् अभिवृत्तिनिर्माणं चेति, येन अध्येता शान्तिभावस्य चिन्तनशीलः अभ्यासी भूत्वा सामाजिकसौहार्दस्य शान्तिभावस्य च समुत्थापकः जायेत। अयं पाठ्यक्रमः शान्तिसंस्कृतेः समुन्नतौ विविधानां शिक्षाविदां जननायकानां च योगदानं प्रवर्धयति।

अधिगमपरिणामः (Learning Outcomes)

एतस्य पाठ्यक्रमस्य सम्पूर्ता अध्येता सामर्थ्यवान् भविष्यति -

- व्यापकतया समीक्षात्मकरीत्या च शान्तिशिक्षायाः सैद्धान्तिकानां व्यावहारिकाणां च आधारान् अवबोद्धुम्।
- शान्तिशिक्षायाः क्षेत्रस्य ऐतिहासिकविकासं स्थितिं च अन्वेष्टुम्।
- जीवने शान्तेः परिपालनं कर्तुं सर्वोत्तमविधीनाम् अन्वेषणं प्रत्यभिज्ञानं च कर्तुम्।
- सङ्घर्षसमाधानाय समुचितविधिं चित्वा तदुपयोगं कर्तुम्।
- समीक्षात्मकरीत्या अध्येतृगुणस्य चिन्तनात्मकशान्तिभावस्य च अभ्यासं कर्तुम्।
- न्यायवादिनः शान्तिप्रियस्य च समाजस्य स्थापनायाः आधारभूतसिद्धान्तानां प्रशंसां कर्तुम्।
- समाजे सकारात्मककार्याणाम् अहिंसात्मक-समस्यासमाधानोपायानां च अवगमनम् अभ्यासं च कर्तुम्।
- छात्राणां बौद्धिकनमनीयतायाः रचनात्मकतायाः समस्या-समाधानक्षमतानां च प्रवर्धनं कर्तुम्।
- सम्प्रति वैश्विकस्तरे जायमानैः घटनाक्रमैः समस्याबिन्दुभिश्च अस्याः पाठ्यसामग्र्याः सम्मेलनं कर्तुम्।
- संस्कृतसाहित्ये शान्तिशिक्षायाः विचारान् बोद्धुं चेतुं च।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	शान्तिशिक्षा	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) - 1

शान्तिशिक्षा : प्रकृतिः वैशिष्ट्यं च

1. शान्तिः शान्तिशिक्षा च।
2. शान्तिशिक्षायाः अर्थः, आवश्यकता, आयामाः लक्ष्यं च।
3. शान्तिशिक्षायाः ऐतिहासिकविकासस्य संक्षिप्तसमीक्षणम्।
4. शान्तिशिक्षायाः दार्शनिक-समाजशास्त्रीय-मनोवैज्ञानिकपरिप्रेक्ष्ये संस्कृतसाहित्यस्य योगदानम्।
5. शान्तेः प्रकाराः - सकारात्मिका, नकारात्मिका, आन्तरिकी, सामाजिकी प्राकृतिकी च।

6. द्वन्द्वनिराकरणं(Conflict-Resolution) शान्तिशिक्षा च।
7. विकासः शान्तिनिर्माणं च इत्यनयोः मध्ये सम्बन्धः।
8. शान्तिशिक्षायै उपहुतयः।
9. शान्तिशिक्षायाः व्याप्तिम् अन्वेष्टुं अनुभवाधारित अधिगमः।

पाठ्यांशः(Unit) - 2

शान्त्यर्थं विश्वसंस्कृतयः

1. शान्तिस्थापनायाः प्रक्रिया।
2. शान्तिसंस्कृतिः युद्ध-दुश्कृतिश्च।
3. शान्तिशिक्षायाः दृष्टिकोणाः/उपागमाः।
4. द्वन्द्व विश्लेषणं निराकरणं च ।
5. शान्तिस्थापनायै सामाजिक धार्मिकमूलानां च भूमिका।
6. शान्तिस्थापनायैप्रक्रियायां स्थानीयानाम् अन्ताराष्ट्रियानां च अभिकरणानां भूमिका।

पाठ्यांशः(Unit) - 3

शान्ति सौहार्दसम्बद्ध विचाराः

1. प्राचीनभारतीयविचाराः/दृष्टिकोणाः।
2. वैश्विकशान्तिशिक्षायै कृते संयुक्तराष्ट्रसङ्घस्य (UNO)भूमिका।
3. संवैधानिकप्रावधानानि।
4. सङ्घर्षविश्लेषणं समाधानं च।
5. वैश्विकस्तरे शान्तिसौहार्द निर्माणेसन्दर्भे जे. कृष्णमूर्ति, श्रीअरविन्दः, रवीन्द्रनाथटैगोर, महात्मगांधी, मोटेसरी, रसेल , दलाईलामा च इत्येतेषां योगदानम्।

पाठ्यांशः(Unit) - 4

शान्तिशिक्षायै शिक्षणशास्त्रीय विषयांश

1. सामाजि-नागरिक नव संरचनायै आकलनम्।
2. विद्यालयज्ञानस्य शान्ति च ऐतिहासिकम् परिप्रेक्ष्ये तुलनात्मकं दृष्टिकोणम्।
3. पाठ्यचर्यायाः परिवर्तनस्य सामाजैतिहासिकी प्रक्रिया।
4. यूनां युद्धानुभवानां महामारीणां च प्रभाव विषये शिक्षकाणाम् अवधारणा ।
5. शान्तिनिर्माणप्रक्रियायाः आलोके विद्यालयस्तरीयपाठ्यचर्यायाः समीक्षात्मकं विश्लेषणम्।
6. शान्तिनिर्माणप्रक्रियायाः आलोके विद्यालयस्तरीयपाठ्यचर्यायाः समीक्षात्मकं विश्लेषणम्।
7. शान्तिशिक्षायाः शिक्षाशास्त्रीय विषयाणां उपहुतयः।
8. वैश्विकस्तरस्य शान्ति संस्कृति निर्माणे महात्मा गाँधी ,टैगोर,श्रीअरविन्दो,दलाईलामा च योगदानम्।
9. शान्तिस्थापनायै विद्यालयीय पाठ्यचर्यायाः समालोचनात्मकं विश्लेषणम् ।

प्रायोगिकम् (Practicum) -

प्रवचनप्रक्रिया (Mode of Transaction)-

पाठ्यक्रमसामग्र्याः प्रवचनप्रक्रियायाम् अधोलिखितपाठ्यांशाः सम्मिलिताः भविष्यन्ति -

- बहुमाध्यमयुक्तम्/पॉवर-प्वाइंटप्रस्तुतियुक्तं सुनियोजितं व्याख्यानम्।
- लघुसमूहचर्चा, सामूहिकी अन्तःचर्चा, समूहाणां पारस्परिकचर्चा, लघुविषयकेन्द्रिता सङ्गोष्ठी, सहयोगात्मकशिक्षणं दलशिक्षणं च, सैद्धान्तिकपठनसामग्रीतः चयनितांशस्य पठनम्, वृत्ताध्ययनम्, शैक्षिकप्रदत्तांशानां विश्लेषणम्, शैक्षणिकरूपेण वञ्चितसमुदायानां समूहानां च लक्षितसमूहविषये चर्चामाध्यमेन व्यक्तिगतक्षेत्रपर्यटनेन वा अध्ययनम्, सर्वेक्षणम्, अल्पकालिकपरियोजनाकार्यम्।
- विविधैः बालसमूहैः, समुदायैः विद्यालयैः च सह व्यावहारिकानुभवः।

आकलनप्रक्रिया (Mode of Assessment)

मूल्याङ्कनं परीक्षणाधारितं सत्रीयकार्याधारितं च भविष्यति।

सन्दर्भग्रन्थाः (Reference Books)

शिक्षकः विद्यार्थिनाम् आवश्यकतानुगुणं स्वाध्यायसामग्र्याः अनुगुणं च पुस्तकानां पाठ्यसामग्रीणां च विषये परामर्शं दातुं शक्नोति।

2.10 क्रीडा सौष्ठवञ्च -9

सत्रार्द्धः - 8 **श्रेयोऽङ्काः-4**

पाठ्यपरिचयः (About the course)

अनेन पाठ्यक्रमेण स्वास्थ्यस्य सङ्कल्पनायाः, तदीयानां विविधानां आयामानां च निर्धारकाणां विषये व्यापका समग्रा च अवगतिः विकसिता भवति। स्वास्थ्यस्य शारीरिकशिक्षाया च उत्क्रान्तिं दर्शयति, विशेषतो भारतीयशिक्षायां विषयस्यास्य ऐतिहासिकं विकासं च अन्येषां विषयाणां सहसम्बन्धं च। अन्तरा विद्यालयसन्दर्भे स्वास्थ्ययोजनाभिः, कार्यक्रमैः सेवाभिश्च शारीरिकपरिपुष्टितायाः महत्त्वं रेखाङ्कितं करोति।

अधिगमपरिणामाः (Learning Outcomes)

अस्य पाठ्यक्रमस्य समापनानन्तरं छात्राः निम्नलिखितघटकेषु समर्थाः स्युः।

- समग्रस्वास्थ्यतत्त्वं तन्निर्धारकांश्च बोद्धुम्।
- व्यक्तिरूपेण स्वास्थ्ये शारीरिकशिक्षायां योगे च धनात्मकदृष्टिकोणं विकसयितुम्।
- शारीरिकपरिपुष्टिकौशलप्राप्तये, शारीरिकशुद्धाचाराणां योग्यासनानां च अभ्यासाय उत्साहवर्धनम्।
- योगासनध्यानाभ्यासेषु रुचिनिर्माणम्।
- स्वास्थ्ये शारीरिकशिक्षायां योगे च प्रचलितनीतिबिन्दूनां कार्यक्रमाणां च बोधः।
- स्वास्थ्यशारीरिकपरिपुष्टितायाः मूल्याङ्कनप्रक्रियायामवगतिकरणम्।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	क्रीडा सौष्ठवञ्च	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) - 1

स्वास्थ्यस्य शारीरिकशिक्षायाश्च मूल्याङ्कनम्

1. स्वास्थ्यं शारीरिकशिक्षा च – स्थानीयरूपेण यथा वैश्विकरूपेण च संज्ञागौरवलक्ष्याणि।
2. पाठ्यक्रमे स्थानम् – एकविषयत्वेन तदीयौ ऐतिहासिकविकासः लक्ष्याणि च, विशेषतो भारतीयशिक्षासन्दर्भे अन्यविषयैः सह सम्बन्धः।
3. स्वास्थ्यस्य शारीरिकशिक्षायाश्च स्थितिः – प्राथमिकात् माध्यमिकशिक्षायाः पर्यन्तं वैश्विकदृष्ट्या, आयुर्वेदीययोगीयस्वास्थ्यशिक्षासंकल्पना, भारते स्वास्थ्य एवं स्वास्थ्यशिक्षायाः न्यायिकदृष्टिः।

पाठ्यांशः(Unit) - 2

स्वास्थ्यशिक्षा

1. स्वास्थ्यसंकल्पना, विशेषतो भारतसन्दर्भे तदीयाः आयामाः निर्धारकाश्च।
2. बालकैः किशोरैश्च विशेषाङ्गशक्तिमद्भिश्च मानसिकसामाजिकाः चिन्ताः।

3. शारीरिकप्रणालीनां (तन्त्राणां) एवं तेषां कार्याणाम् अवबोधनम्।
4. साधारणस्वास्थ्यसमस्याः रोगाश्च – कारणानि निवारणोपायाश्च, प्रतिरक्षाप्रदानं प्राथमिकोपचारश्च।
5. विविधशारीरिकतन्त्राणां शारीरिकगतिविधयः, क्रीडाः योगश्च तेषां प्रभावः।
6. आहारः पोषणं च, पोषकद्रव्याणि तेषां कार्याणि च।

पाठ्यांशः(Unit) - 3

क्रीडाः शारीरिकपरिपुष्टिता च

1. शारीरिकपरिपुष्टिता तदीयाः घटकाश्च –एथलेटिक्स(सामान्यशारिरिकपरिपुष्टिपूरकाभ्यासः) क्रीडाः(अग्रगाम्यक्रीडाः/लीड-अप खेल, धावाक्रीडाः, प्रमुखक्रीडाश्च), लयबद्धगतिविधयः, जिमनास्टिक, तेषां स्वास्थ्येषु प्रभावश्च।
2. शारीरिकपरिपुष्टितायाः विकासः – शारीरिकस्थितिः विश्रामश्च महत्त्वम्। परिपुष्टितापरीक्षाः, स्वास्थय एवं क्रीडासुसाधनसेवाश्च।
3. क्रीडाणां मौलिककौशलानि – विनोदाय स्पर्धार्थं च क्रीडाः, क्रीडापुरस्काराणि छात्रवृत्तयश्च, क्रीडात्मवृत्तिः, स्वदेशीयाः आत्मरक्षाकार्याणि च।
4. विद्यालयपरिवारः, स्वास्थ्यसेवाः, नीतयः, प्रमुखस्वास्थ्यशारीरिकशिक्षासम्बद्धकार्यक्रमाश्च, रक्तपेटिकाः, संचारमाध्यमानां भूमिका च।
5. सुरक्षा।
6. प्राथमिकोपचाराः – आवश्यकता सिद्धान्ताश्च।

पाठ्यांशः(Unit) - 4

नीतयः कार्यक्रमाः मूल्याङ्कनं च

1. स्वास्थ्यावश्यकतासमाधानाय नीतयः कार्यक्रमाः सेवाश्च।
2. विद्यालयस्वास्थ्यकार्यक्रमः – विद्यालयस्वास्थ्यसेवाः, स्वास्थ्यसंवर्धकविद्यालयाः, वैश्विकविद्यालयस्वास्थ्ययोजनाश्च।
3. योगः – अर्थः, उद्भवः, ऐतिहासिकता, वर्गीकरणम्, प्रविधयः, योगशाखाश्च। स्वस्थजीवनजीवनार्थं योगस्य आवश्यकता महत्त्वं मनोविज्ञानोपचारेण योगस्य भूमिका च।
4. पोक्सो (यौनशोषणात् बालानां रक्षणं रक्षाधिनियमः २०१२), पीडब्ल्यूडी २०१६, समन्वितबालसंरक्षणयोजना च।
5. क्रीडासु शारीरिकनिष्पादनस्य परीक्षणम्, बालस्य स्वास्थ्यावस्थाया क्रीडाक्षेत्रेषु निष्पादनस्य च प्रतिवेदनम्।

प्रायोगिकम् (Practicum)

1. बालानां मानसिकस्वास्थ्यस्य च प्रमुखसूचकानां परिचयः।

अथवा

राष्ट्रियशिक्षानीतेः २०२० इत्यस्मिन् क्रीडानिष्ठशिक्षायाः सन्दर्भेण विश्लेषणम्।

अथवा

विद्यालये शारीरिकशिक्षायाः निर्धारणाय आलोचनात्मकसंवादानां आयोजनम्।

2. व्यायामविषयकानां विविधाहारप्रकारविषयकानां च मिथ्याधारणानां सूचीकरणम्।

अथवा

अभिलेखसञ्चिका: वर्तमानस्य राष्ट्रीयपुरस्काराणां परिचयः। पुरस्कार विजेतॄणां (द्रोणाचार्यपुरस्कारस्य, अर्जुनपुरस्कारस्य च मेजरध्यानचन्द्रखेलरत्नपुरस्कारस्य) सचित्रपरिचयः/सूचीनिर्माणम् ।

3. शारीरिकपरिपुष्टितायाः विकासाय गतिविधीनां योजनानिर्माणम्।

अथवा

प्राथमिकोपचारपेटिकायाः निर्माणम्।

4. मूलभूतयोगाभ्यासानाम्, आसनानाम्, प्राणायामस्य, क्रियाणां च ध्यानस्य च अध्ययनं प्रदर्शनं च।

अथवा

कश्चन एकस्य क्रीडाक्षेत्रस्य, उपकरणानां सचित्रवर्णनम् (नियमा:, पारिभाषिकशब्दा:कौशलानि च)।

प्रवचनप्रक्रिया (Mode of Transaction)

विषयवस्तुनः शिक्षणप्रसारणे अधोलिखितानि अन्तर्भविष्यन्ति:

- बहुमाध्यमैः/पॉवरपॉइन्टप्रस्तुतीकरणैः संयुक्तनियोजितव्याख्यानानि।
- लघुसमूहचर्चाः, पैनलवार्ताः, लघुविषयाधारितसंगोष्ठ्यः, समूहचर्चाः, सहकारिशिक्षणम्, कार्यसमूहशिक्षणं च, सैद्धान्तिकाभ्यासग्रन्थादीनां चयनानि, शैक्षिककानां विश्लेषणानि, शैक्षिकदृष्ट्या उपान्तवर्गीयसमुदायजनसमूहैः सह व्यक्तिगतक्षेत्रसंलग्नता च समूहाधारितसंलापैः, सर्वेक्षणैः, अल्पकालिकपरियोजनाकार्यैश्च।
- विविधसमुदायैः, बालकैः, विद्यालयैश्च सह व्यवहारिकानुभवसम्पादनम्।

आकलनप्रक्रिया (Mode of Assessment)

परीक्षासु प्रबन्धकार्येषु च आधारितं मूल्याङ्कनं भविष्यति।

सन्दर्भग्रन्थाः (Reference Books)

अध्यापकाः शिक्षार्थिशिक्षणावश्यकतानुरूपं ग्रन्थान् पठनसामग्रीश्च सूचयिष्यन्ति।

संस्कृतम्

3.1 पाठ्यनाम - व्याकरणप्रवेशः – प्रथमसोपानम् – 1

सत्रार्द्धः- 1 **श्रेयोऽङ्काः 4**

पाठ्यपरिचयः (Introduction)

इदं प्रश्नपत्रं मुख्यरूपेण पाणिनीयव्याकरणशास्त्रपरम्परायां ग्रथितं लघुसिद्धान्तकौमुदीग्रन्थाधारितम् । आचार्यवरदराजाचार्यलिखिते अस्मिन् ग्रन्थे अन्तर्भूतयोः संज्ञासन्धिप्रकरणयोः सूत्राणि अत्र अध्येतव्यानि।

उद्देश्यम् (Course Objective)

1. संस्कृतभाषाव्याकरणशास्त्रवैशिष्ट्यम्।
2. व्याकरणशास्त्रे सूत्रलेखनपद्धत्याः परिचयः।
3. व्याकरणशास्त्रे प्रयुज्यमानानां प्रमुखसञ्ज्ञानां परिज्ञानम्।
4. संस्कृतभाषायां प्रयुक्तानां सन्धीनां परिचयः।
5. व्याकरणशास्त्रे सन्धिसूत्राणां सार्थबोधनम्।
6. सन्धियुक्तलेखनस्य विच्छेदसामर्थ्योत्पादनम्।

अधिगमपरिणामः (Learning Outcome) अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. अष्टाध्यायीसूत्राणाम् अर्थप्रक्रियामवगमिष्यन्ति।
2. व्याकरणे सञ्ज्ञायाः अर्थं प्रयोजनञ्च कथयितुं शक्ष्यन्ति।
3. सन्धि-विच्छेदकरणे दक्षाः भविष्यन्ति।
4. संस्कृतभाषया शुद्धोच्चारणं कर्तुं समर्थाः भविष्यन्ति।
5. सन्धिप्रकियासु लोप-गुण-वृद्ध्यादि-आदेशान् वक्तुं प्रभविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	व्याकरणप्रवेशः – प्रथमसोपानम्	40 hr	0	24 hr.	4

पाठ्यांशाः (Units) - 1 माहेश्वरसूत्राणि सञ्ज्ञाप्रकरणञ्च।

पाठ्यांशाः (Units) -2 अच्सन्धिप्रकरणम्।

- यण्-सन्धिः
- दीर्घसन्धिः
- अयादिसन्धिः

- गुणसन्धिः
- वृद्धिसन्धिः
- पूर्वरूपसन्धिः
- पररूपसन्धिः

पाठ्यांशाः (Units) -3 हल् सन्धिप्रकरणम्।

- श्चुत्वं - स्तोः श्चुना श्चुः।
- ष्टुत्वं - ष्टुना ष्टुः।
- अनुनासिकम् - यरोऽनुनासिकेऽनुनासिको वा।
- छत्वम् – शश्छोऽटि।
- जश्त्वम् - झलां जशोऽन्ते।
- अनुस्वारः - मोऽनुस्वारः, अनुस्वारस्य ययि परसवर्णः।

पाठ्यांशाः (Units) – 4 विसर्गसन्धिप्रकरणम्।

- सत्वम् - विसर्जनीयस्य सः।
- उत्वम् - ससजुषो रुः।
- अतो रोरप्लुतादप्लुते, हशि च।
- लोपः – भोभगोऽघोऽपूर्वस्य योऽशि, हलि सर्वेषाम्, ढ्रलोपे पूर्वस्य दीर्घोऽणः, रो रि।

प्रायोगिकम् (Practicum)

अधोदत्तेषु **गतिविधिषु चतस्रः गतिविधयः** अनिवार्याः।

- चितांशस्य श्रवणं पठनञ्च
- सूत्रवृत्तिकण्ठस्थीकरणम्
- श्रुतलेखनम्
- कक्षाकार्यम् / गृहपाठः (assignment)
- चितांशे सन्धीनां विच्छेदः सन्धिनिर्माणञ्च
- सूत्रसन्धिमेलनक्रीडा।
- प्रदत्तविषयानुसारेण लेखनं, लेखनसमये सन्धिनिर्माणम्।
- प्रदत्तविषयानुसारेण भाषणं, भाषणे सन्धिप्रयुक्तिः।
- सन्धिप्रश्नमञ्जूषाप्रतियोगिता।
- सूत्रस्पष्टीकरणार्थं वाक्यार्थः / मौखिकरूपेण सूत्रस्पष्टीकरणम्

प्रवचनप्रक्रिया (Mode of Transaction)

व्याख्यानम्, समूहचर्चा-भाषिकखेला, demonstration-inductive and deductive method, पीपीटीप्रस्तुतिः

आकलनप्रक्रिया (Mode of Assessment)

60% सत्रान्तलेखनपरीक्षाद्वारा मूल्याङ्कनम्
40% प्रायोगिकांशाधारितं मूल्याङ्कनम्

सन्दर्भग्रन्थाः (Reference Books)

- धरानन्दशास्त्री, *लघुसिद्धान्तकौमुदी*, मूल एवं हिन्दी व्याख्या, दिल्ली।
- भीमसेनशास्त्री, *लघुसिद्धान्तकौमुदी* भैमी व्याख्या (भाग-1), दिल्ली : भैमीप्रकाशनम्।
- चारुदेवशास्त्री, *व्याकरणचन्द्रोदयः* (भाग-1, 2 एवं 3), दिल्ली : मोतीलाल बनारसीदास।
- जि. महाबलेश्वरभट्टः, *सन्धिः*, बैङ्गळुरु : संस्कृतभारती।

3.1 पाठ्यनाम -भारतीयज्ञानपरम्परायाम् अष्टादशविद्यास्थानानि - 2

सत्रार्द्धः- 1 **श्रेयोऽङ्काः 4**

पाठ्यपरिचयः (Introduction)

भारतीयज्ञानपराम्परायां संस्कृतभाषायाः योगदानं महत्त्वपूर्णम्। भारतीयसंस्कृतेः मूलम् अष्टादशविद्यास्थानम्। अष्टादशविद्यासु वेदवाङ्मयं, पुराणवाङ्मयं, न्यायमीमांसादिदर्शनानि च अन्तर्भूतानि। अस्य प्रश्नपत्रस्य मुख्यविषयः एतेषां सर्वेषां परिचय इति।

उद्देश्यम् (Course Objective)

1. भारतीयज्ञानपरम्परायां संस्कृतसाहित्यस्य अवधारणायाः प्रासङ्गिकतायाश्च विषये अवबोधनम्।
2. भारतीयज्ञानपरम्परायाः आधारभूततत्त्वानां परिचयः।
3. भारतीयशिक्षायाः स्तम्भत्वेन चतुर्दश अथवा अष्टादशसंख्यकानां वा विद्यास्थानानाम् अवबोधः।
4. प्राचीनभारतीयशिक्षाव्यवस्थायां तत्केन्द्राणाञ्च वैज्ञानिक-दार्शनिक-सामाजिक-योगदानस्य च अन्वेषणम्।

अधिगमपरिणामः (Learning Outcome) :

अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भारतीयज्ञानपरम्पराया अवधारणां प्रासङ्गिकतां च वर्णयिष्यन्ति।
2. भारतीयज्ञानपरम्परायाः आधारभूतत्त्वानां व्याप्तेः संरचनायाः स्वरूपस्य च परिभाषाकरणं, वर्णनं च कर्तुं शक्ष्यन्ति।
3. चतुर्दश-अष्टादश-विद्यास्थानयोः शाखाः अधिकृत्य वर्णयिष्यन्ति।
4. भारतीयज्ञानपरम्पराभिवाह्यानां प्राचीनशिक्षासंस्थानां मूल्याङ्कनं तथा च विविधविषयेषु तेषां योगदानं निरूपयिष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	भारतीयज्ञानपरम्परायाम् अष्टादशविद्यास्थानानि	40 hr	0	24 hr.	4

पाठ्यांशाः (Units)

पाठ्यांशाः (Units)-1 भारतीयज्ञानपरम्परा।

- भारतीयज्ञानपरम्पराया अवधारणा।
- भारतीयज्ञानपरम्परासंस्कृतज्ञानपरम्परयोः भेदाभेदविमर्शः।
- भारतीयज्ञानपरम्परायाः आधारभूततत्त्वैः सह संस्कृतभाषासाहित्यस्य सम्बन्धः।

- भारतीयसमाजे संस्कृतज्ञानपरम्परायाः प्रासङ्गिकता।
- वैश्विकपरिप्रेक्ष्ये भारतीयज्ञानपरम्परायाः औचित्यम्।

पाठ्यांशाः (Units) - 2 भारतीयज्ञानस्य मूलाधाराः अष्टादशविद्यास्थानानि (प्राचीनभारतीयशिक्षायां ज्ञानस्य अष्टादशशाखाः)

- चत्वारः वेदाः (ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः), तेषां सामान्यवर्णनञ्च।
- षड् वेदाङ्गानि (शिक्षा-व्याकरण-निरुक्त-छन्द-ज्योतिष-कल्पाश्च), वेदाङ्गानां विस्तृतसूचना, उद्देश्यं, वैज्ञानिकस्वभावश्च।
- चत्वारः उपवेदाः (आयुर्वेदः, धनुर्वेदः, गन्धर्ववेदः, अर्थशास्त्रम्), तेषां सामान्यवर्णनञ्च।
- पुराणन्यायमीमांसाधर्मशास्त्राणि, तेषां सामान्यपरिचयः।
- नानाशास्त्राणां नामानि तेषां सामान्यवर्णनञ्च। (व्याकरणम्, ज्योतिषम्, साहित्यम्, योगः, धर्मशास्त्रम्)

पाठ्यांशाः (Units) – 3 अष्टादशपुराणानि।

- अष्टादशपुराणानां सामान्यलक्षणम् (पुराणं पञ्चलक्षणम्) – सर्ग-प्रतिसर्ग-वंश-मन्वन्तर-वंशानुचरितञ्च।
- महापुराण-उपपुराणयोः परिभाषा।
- पौराणिकसृष्टिविज्ञानम्।
- रामायणस्य महाभारतस्य स्मृतीनाञ्च परिचयः।

पाठ्यांशाः (Units) - 4भारतीयदार्शनिकचिन्तनस्य परिचयः।

- **आस्तिकदर्शनानि -**
    - साङ्ख्यदर्शनं, योगदर्शनं, न्यायदर्शनं, वैशेषिकदर्शनं, पूर्वमीमांसा, उत्तरमीमांसा चेति, तेषां सामान्यपरिचयः।
- **नास्तिकदर्शनानि -**
    - बौद्धजैनचार्वाकदर्शनानि, तेषां सामान्यपरिचयः।

पाठ्यांशाः (Units)- 5 भारतीयपरम्पराभिवाह्यस्थानानि भारतीयप्राचीनशिक्षणसंस्थानानि।

- धर्म-अर्थ-समाज-विषये भारतीयशिक्षा।
- भारतीयशिक्षापरम्परायां गुरुकुलव्यवस्था।
- प्राचीनविश्वविद्यालयानां परिचयः। (नालन्दा, तक्षशिला, विक्रमशिला, वल्लभी, ओदन्तपुरी, मिथिला, काञ्ची, नाडीया, पुष्पगिरी, नागार्जुनकोण्डा, शारदापीठम् (काश्मीरः), उज्जयिनी, जगद्दाला, सोमपुरश्च)
- प्राचीनाचार्याणां सामान्यपरिचयः (लोपामुद्रा। गार्गी। मैत्रेयी। घोषा। अपाला। विश्वम्भरा। अगस्त्यः। वाल्मीकिः। पतञ्जलिः। वेदव्यासः। याज्ञवल्क्यः। बोधायनः। चरकः। सुश्रुतः। जीवकः। नागार्जुनः। कणादः। पतञ्जलिः। कौटिल्यः। पाणिनिः। आर्यभटः। वराहमिहिरः। शङ्कराचार्यः। भास्कराचार्यः। माधवाचार्यादि।)

- भारतात् ज्ञाननिर्यातनम्।

प्रायोगिकम् (Practicum)
अधोदत्तेषु **गतिविधिषु चत्वारः गतिविधयः** अनिवार्याः।

- स्थूलपठनम्,
- अष्टादशविद्यास्थानरूपेण सत्सु प्रधानपुस्तकेषु चितानाम् अंशानां पठनं कण्ठस्थीकरणञ्च (अध्यापकाः एतान् अंशान् चेष्यन्ति)
- समूहचर्चा
- विषयप्रस्तुतिः
- वाक्यार्थः
- कक्षाकार्यम् अथवा गृहकार्म् (Assignment)
- परियोजना
- स्थलाभ्यगमनम् (field visit) वृत्तान्तलेखनञ्च।
- वेलापटनिर्माणम्।
- प्राचीनाचार्याणां कार्यस्योपरि लघुनाट्यम् अथवा कथालेखनम्।

प्रवचनप्रक्रिया (Mode of Transaction)

- व्याख्यानम्
- प्रश्नोत्तरी
- पीपीटीप्रस्तुतिः
- समूहचर्चा
- परियोजना

आकलनप्रक्रिया (Mode of Assessment)

60% सत्रान्तलेखनपरीक्षाद्वारा मूल्याङ्कनम्
40% प्रायोगिकांशाधारितं मूल्याङ्कनम्

सन्दर्भग्रन्थाः (Reference Books)

- उपाध्याय, बलदेव, (1960), *संस्कृत शास्त्रों का इतिहास*, वाराणसी : चौखम्बा संस्कृत सीरीज़।
- द्विवेदी, कपिलदेव, (1990), *वेदाङ्ग साहित्य का इतिहास*, वाराणसी : विश्वविद्यालय प्रकाशन।
- Radhakrishnan, S. (1999). *Indian Philosophy* (Vols. 1–2). New Delhi: Oxford University Press.

- Staal, F. (2008). *Discovering the Vedas: Origins, Mantras, Rituals, Insights*. New Delhi: Penguin Books.
- पाण्डेय, जनार्दन, (2018), *भारतीय गणित और खगोलशास्त्र*, इलाहाबाद : हिन्दी साहित्य सम्मेलन।
- Jha. V., *Indian Knowledge System: Concepts and Applications*.
- Ganamoorthi, K., Dwivedi, A. K., & Nayak, L. (First ed.). *Learn Samskrit: The Language of Dharmashastra*. Sanskrit Promotion Foundation.
- Ram Gopal, India of Vedic Kalpasūtras, National Publishing House, Delhi, 1959.
- Upadhyaya, V. P., & Mukherjee, A. (First ed.). *Learn Samskrit: The Language of Arthashastra*. Sanskrit Promotion Foundation.
- वन्दोपाध्यायः धीरेन्द्रनाथ, *संस्कृतवाङ्मयस्य इतिहासः*, , Sanskrit Pustak Bhandar, Kolkata, 2014.
- Kohle, Pradeep. (2006). Pride of India- A Glimpse of India's Scientific Heritage Samskrit Bharati.
- Soni, Suresh. (2010). India's Glorious Scientific Tradition Ocean Books Pvt. Ltd. Vedic.
- https://sanskritdocuments.org
- https://bharatiyavidya.indicacademy.org
- https://iks.iitgn.ac.in

3.1 पाठ्यनाम- व्याकरणप्रवेशः द्वितीयसोपानम् – 3

सत्रार्द्धः- 2 **श्रेयोऽङ्काः 4**

पाठ्यपरिचयः (Introduction)-

इदं प्रश्नपत्रं श्रीवरदराजाचार्यकृतलघुसिद्धान्तकौमुदीग्रन्थाधारितम्। विभक्त्यर्थप्रकरणं समासप्रकरणं चेति प्रकरणद्वयम् अत्र छात्राः पठिष्यन्ति।

उद्देश्यम् (Course Objectives)

1. समासप्रक्रियायाः परिचयप्रदानम्।
2. ग्रन्थेषु समासप्रयोगाणाम् अवबोधनम्।
3. विभक्तीनां ज्ञानेन प्रयोगसामर्थ्योत्पादनम्।
4. वाक्यनिर्माणम्।

अधिगमपरिणामः (Learning Outcome) अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. सामासिकप्रयोगान् वक्तुं निर्मातुं समर्थाः भविष्यन्ति।
2. ग्रन्थेषु प्रयुक्तसमासान् निरूपयितुं सिद्धाः भविष्यन्ति।
3. समस्त-व्यस्तपदानां प्रतिपादने समर्थाः भविष्यन्ति।
4. सप्तसु विभक्तिषु वाक्यप्रयोगान् कर्तुं शक्ष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	व्याकरणप्रवेशः द्वितीयसोपानम्	40 hr	0	24 hr.	4

पाठ्यांशाः (Units)

पाठ्यांशाः (Units) - 1 विभक्त्यर्थप्रकरणम्।

पाठ्यांशाः (Units) - 2 समासप्रकरणम्।

- अव्ययीभावसमासः।
- तत्पुरुषसमासः।
- तत्पुरुषस्य अन्यभेदाः-कर्मधारयः द्विगुश्च।

पाठ्यांशाः (Units) – 3 समासप्रकरणम्।

- बहुव्रीहिसमासः।

- द्वन्द्वसमासः।

प्रायोगिकम् (Practicum)

अधोदत्तेषु **गतिविधिषु चत्वारः गतिविधयः** अनिवार्याः।

- चितांशस्य श्रवणं पठनञ्च।
- सूत्रवृत्तिकण्ठस्थीकरणम्।
- सूत्रस्थपदानां परिचयः।
- क्रीडामाध्यमेन वाक्यप्रयोगः।
- चितांशं दृष्ट्वा प्रतिलेखकरणम्।
- श्रुतलेखनम्।
- कक्षाकार्यम् / गृहपाठः (assignment)।
- परियोजना।
- स्वशास्त्रसम्बद्धग्रन्थात् प्रतिसमासं न्यूनातिन्यूनं विंशतिः उदाहरणानि।
- प्रसिद्धस्तोत्रेषु विद्यमानसमासप्रयोगाणां विश्लेषणम्।
- अपठिते चितांशे वाक्यागतपदानां विश्लेषणम्।
- अपठिते उद्धृतपाठ्यांशे समासानाञ्च विच्छेदः।
- वाक्यनिर्माणम्।
- वाक्यशुद्धिः।
- समासनिर्माणम्।
- सूत्रविवरणार्थं वाक्यार्थः/ मौखिकरूपेण सूत्रस्पष्टीकरणम्।

प्रवचनप्रक्रिया (Mode of Transaction)

- व्याख्यानम्
- समूहचर्चा
- भाषिकखेला
- Demonstration
- inductive and deductive method
- परियोजना
- पीपीटीप्रस्तुतिः

आकलनप्रक्रिया (Mode of Assessment)

60% सत्रान्तलेखनपरीक्षाद्वारा मूल्याङ्कनम्
40% प्रायोगिकांशाधारितं मूल्याङ्कनम्

सन्दर्भग्रन्थाः (Reference Books)

1. जि. महाबलेश्वरभट्टः, *सन्धिः*, बैङ्गळुरु : संस्कृतभारती।
2. धरानन्दशास्त्री, *लघुसिद्धान्तकौमुदी*, मूल एवं हिन्दी व्याख्या, दिल्ली।
3. भीमसेनशास्त्री, *लघुसिद्धान्तकौमुदी* भैमी व्याख्या (भाग-1), दिल्ली : भैमीप्रकाशनम्।
4. चारुदेवशास्त्री, *व्याकरणचन्द्रोदयः* (भाग-1, 2 एवं 3), दिल्ली : मोतीलाल बनारसीदास।

3.1 पाठ्यनाम -संस्कृतसाहित्ये पद्यकाव्यम् – 4

सत्रार्द्धः- 2 **श्रेयोऽङ्काः 4**

पाठ्यपरिचयः (About the course) -

संस्कृतसाहित्ये काव्यप्रकाराः त्रयः। गद्यकाव्यं पद्यकाव्यं तथा दृक्काव्यम् इति। अस्मिन् प्रश्नपत्रे संस्कृतसाहित्ये पद्यकाव्ये शतककाव्यं महाकाव्यं गीतिकाव्यं तथा चम्पूकाव्यमिति पद्यकाव्यप्रकाराणां सामान्यपरिचयः। तत्तद्गत साहित्यकृतीनां सामान्यपरिचयः छात्रैः अस्मिन् प्रश्नपत्रे पठनीयः। महाकवीनां शैलीविशेषोऽपि पाठ्यांशस्य अध्ययनात् छात्रैः अवगम्यते इति विचारेण अत्र केचन काव्यांशा अपि उद्धृताः। पद्यकाव्ये प्रयुक्तानां छन्दसाम् अलङ्काराणामपि परिचयः अत्र सलक्षणं चितपद्यांशमाध्यमेन सोदाहरणं भविष्यति।

उद्देश्यम् (Course Objective)

1. संस्कृतसाहित्ये पद्यकाव्यप्रकाराणां सामान्यपरिचयः।
2. विभिन्नशैलीषु निपुणानां विभिन्नकालिकानां संस्कृतमहाकवीनां साहित्यिकयोगदानस्य व्यापकपरिचयप्रदानम्।
3. विभिन्नकवीनां कृतिषु प्रतिबिम्बितायाः विशिष्टशैल्याः, दार्शनिकदृष्टिकोणानां, कलात्मकाभिव्यक्तेः, सांस्कृतिक-ऐतिहासिकसन्दर्भाणां च महत्त्वस्य प्रशंसायाश्च संवर्धनम्।
4. छात्राणां संस्कृते प्रावीण्यवर्धनं, संस्कृतकाव्यानाम् अनुवाद-व्याख्याकौशलसम्पादनम्।

अधिगमपरिणामः (Learning Outcome) अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. संस्कृतमहाकवीनां कृतिषु समुचितयुक्तीः ज्ञास्यन्ति।
2. काव्यात्मक-कलात्मक-सांस्कृतिक-ऐतिहासिकसन्दर्भे विभिन्नकवीनां रचनाः आधृत्य तेषां शैल्याः विचाराणाञ्च प्रशंसां कर्तुं शक्ष्यन्ति।
3. शास्त्रीयसंस्कृते योग्यतां वर्धयिष्यन्ति।
4. काव्यानाम् अनुवादे व्याख्याने च कौशलं प्राप्स्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	संस्कृतसाहित्ये पद्यकाव्यम्	40 hr	0	24 hr.	4

पाठ्यांशाः (Units)- 1 भर्तृहरेः नीतिशतकम्।

- मुक्तकाव्यलक्षणम् तथा मुक्तककाव्यस्य सामान्यपरिचयः।
- भर्तृहरेः नीतिशतकेषु प्रथमश्लोकतः विंशतिश्लोकपर्यन्तम्।

पाठ्यांशाः (Units) - 2 संस्कृतमहाकाव्यम्।

- महाकाव्यलक्षणम्।
- महाकाव्यानां सामान्यपरिचयः- संस्कृतमहाकाव्यानाम् प्राचीनकालातः आधुनिककालपर्यन्तम् उत्पत्तिः विकासश्च, अश्वघोषस्य सौन्दरानन्दं बुद्धचरितञ्च, कालिदासस्य रघुवंशं कुमारसम्भवञ्च, भारवेः किरातार्जुनीयम्, माघस्य शिशुपालवधम्, श्रीहर्षस्य नैषधीयचरितम् इत्येषां सामान्यपरिचयः।
- महाकविकालिदासस्य कुमारसम्भवमहाकाव्ये पंचमसर्गस्य प्रथमश्लोकतः पञ्चविंशतिश्लोकपर्यन्तम्।
- अर्थगौरवोपाधिविभूषितस्य भारविकवेः किरातार्जुनीये प्रथमश्लोकतः पञ्चविंशतिश्लोकपर्यन्तम्।

पाठ्यांशाः (Units) - 3 गीतिकाव्यानि।

- गीतिकाव्यलक्षणम्।
- संस्कृतभाषायां गीतिकाव्यानाम् उत्पत्तिः विकासश्च।
- महाकविकालिदासस्य मेघदूते पूर्वमेघे अष्टाविंशतिश्लोकतः नवत्रिंशत्पर्यन्तम्।

पाठ्यांशाः (Units) - 4 चम्पूकाव्यम्।

- चम्पूकाव्यलक्षणम्।
- संस्कृतपद्यसाहित्ये चम्पूकाव्यानां सामान्यपरिचयः।

पाठ्यांशाः (Units) - 5 ऐतिहासिकपद्यकाव्यम्।

- संस्कृतसाहित्ये ऐतिहासिकपद्यकाव्यानां सामान्यपरिचयः।

प्रायोगिकम् (Practicum)

अधोदत्तेषु **गतिविधिषु चतस्रः गतिविधयः** अनिवार्याः।

- श्लोकोच्चारणम्।
- श्लोकानां वृत्तानुरूपं गायनम्।
- श्लोककण्ठस्थीकरणम्।
- व्याकरणम् अनुसृत्य श्लोकस्थपदानां विवरणम्।
- पद्यस्थश्लोकानां वृत्तच्छन्दसामाकलनम् सोलक्षणविवेचनञ्च।
- पद्यान्वयाभ्यासः।
- पद्यस्थानां पदानां कोशान्वेषणं कृत्वा पर्यायवाचिनां शब्दानां परिचयः।
- पद्यस्य अथवा श्लोकस्य आकलनम्।
- अपठितपद्यानाम् अन्वयः।
- पद्यकाव्यानां कथानां (plot) प्रस्तुतिः (performances)।

- संस्कृतगीतानाम् आकलनम्।
- परियोजना।

प्रवचनप्रक्रिया (Mode of Transaction)

- व्याख्यानम्।
- टीकया सह पाठचिकित्सा।
- पीपीटी प्रस्तुतिः।
- वाक्यार्थः।
- समूहचर्चा।

आकलनप्रक्रिया (Mode of Assessment)

60% सत्रान्तलेखनपरीक्षाद्वारा मूल्याङ्कनम्
40% प्रायोगिकांशाधारितं मूल्याङ्कनम्

सन्दर्भग्रन्थाः (Reference Books)

1. Kale, M. R. (Ed.). *Kirātārjunīyam of Bhāravi*. Delhi: MLBD.
2. Kale, M. R. (Ed.). *Kumārasambhavam*. Delhi: MLBD.
3. Kale, M. R. (Ed.). *Nītiśatakam of Bhartṛhari*. Delhi: MLBD.
4. मुसलगॉवकर, राजेश्वरशास्त्री, नीतिशतकम्, वाराणसी, चौखम्भा प्रकाशन, वि. सं. 2068, (2011)
5. शास्त्री, जनार्दन, भारविकृत किरातार्जनीयम्, दिल्ली: मोतीलाल बनारसीदास।
6. शास्त्री, नेमिचन्द्र, कुमारसम्भवम्, दिल्ली, मोतीलाल बनारसीदास।
7. त्रिपाठी, बाबूराम (सम्पा.), (1986), भर्तृहरि कृत नीतिशतकम्, आगरा: महालक्ष्मी प्रकाशन।
8. पाण्डेय, ओमप्रकाश (व्या.), (1982), मनोरमा हिन्दी-व्याख्या सहित, भर्तृहरि कृत नीतिशतकम्, वाराणसी, चौखम्बा अमरभारती प्रकाशन।
9. शास्त्री, विष्णुदत्त शर्मा (व्या.), (संवत् 2034), भर्तृहरि कृत नीतिशतकम्, मेरठः ज्ञानप्रकाशन।
10. शर्मा, समीर, मल्लिनाथकृत घंटापथ टीका, भारवि कृत किरातार्जनीयम्, वाराणसी: चौखम्बा विद्याभवन।
11. उपाध्याय, बलदेव, संस्कृत साहित्य का इतिहास, वाराणसी: शारदा निकेतन।
12. Mirashi, V. V. Kālidāsa. Mumbai: Popular Publication.
13. Keith, A. B. History of Sanskrit Literature. Delhi: MLBD.
14. Krishnamachariar. History of Classical Sanskrit Literature. Delhi: MLBD.
15. Shastri, Gaurinath. A Concise History of Sanskrit Literature. Delhi: MLBD.

16. Winternitz, M., A History of Indian Literature (Vol. III) also Hindi Translation. Delhi: MLBD.

3.1 पाठ्यनाम- भारतीयं सौन्दर्यशास्त्रम् - 5

सत्रार्द्धः- 2 **श्रेयोऽङ्काः 4**

पाठ्यपरिचयः (About the course)

भारतीयसौन्दर्यशास्त्रस्य व्याप्तिः मुख्यरूपेण साहित्ये साहित्यशास्त्रे रूपकेषु मूर्तिकलायां तथा भिन्नासु ललितकलासु विद्यते। व्याप्तिना सह अस्मिन् प्रश्नपत्रे सौन्दर्यशास्त्रस्य परिभाषा प्रकृतिः स्वरूपञ्चविवेचनं भवति। भारतीयानां सौन्दर्यदृष्टिरपि अध्येतव्या। सौन्दर्यबोधकानां तत्त्वानां परिचयः तथा तेषां काव्ये प्रयुक्तिः चिन्तनञ्च कथं भवति एतेषां बिन्दूनां विवरणम् अस्मिन् प्रश्नपत्रे विद्यते।

उद्देश्यम् (Course Objective)

1. भारतीयानां सौन्दर्यदृष्टेः ज्ञानम्।
2. साहित्यविमर्शस्य अध्ययनार्थं महत्त्वाधायि-प्रमुखक्षेत्रत्वेन सौन्दर्यशास्त्रस्य प्रवर्तनम्।
3. सौन्दर्यसिद्धान्तानाम् आलोके काव्य-नाट्य-संगीत-वास्तु-प्रतिमा-चित्रकलादीनां विषये भारतीयानां मन्तव्यानाम् आविष्करणम् उपयोजनञ्च।
4. भारतीयसौन्दर्यशास्त्रे समाहितानां प्रमुखप्रवृत्तीनां विचारसरणीनां सम्मुखीकरणम् सौन्दर्यशास्त्रस्य व्याप्तिस्थलेषु अवगमनम् उपयोजनञ्च।

अधिगमपरिणामः (Learning Outcomes)

अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. स्वरूपमहत्त्वघटकादिभिः सह सौन्दर्यस्य परिभाषां प्रस्तोष्यन्ति।
2. भारतीयैः साहित्यशास्त्रकारैः प्रतिपादितस्य सौन्दर्यजातस्य भावम् अभिज्ञास्यन्ति।
3. रस-रसास्वादरूपस्य च सौन्दर्यानुभवस्य सन्दर्भे भारतीयविमर्शस्य वर्णनं करिष्यन्ति।
4. प्रमुखाणां पारम्परिकभारतीयानां सौन्दर्यशास्त्रिणां विवरणं प्रस्तोष्यन्ति।
5. सौन्दर्याभिव्यक्तेः कलात्मकमाध्यमानां विशेषतश्च काव्याभिव्यक्तीनां मूल्याङ्कनं कारयिष्यन्ति।
6. भारतीयसौन्दर्यविज्ञानस्य प्रासङ्गिकतायाः मूल्याङ्कनम् अवगमिष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	भारतीयं सौन्दर्यशास्त्रम्	40 hr	0	24 hr.	4

पाठ्यांशाः (Units)

पाठ्यांशाः (Units) -1 सौन्दर्यशास्त्रस्य परिचयः।

- सौन्दर्यशास्त्रम् - परिभाषा, प्रकृतिः, महत्त्वञ्च।

- भारतीयानां सौन्दर्यदृष्टिः।
- सौन्दर्यदृष्टेः व्याप्तिः-
  अ- साहित्यं तथा काव्यशास्त्रम्।
  आ- नाट्यम्।
  इ- ललितकला तथा मूर्तिकला।

पाठ्यांशाः (Units) - 2 सौन्दर्यबोधकानि तत्त्वानि-

- रसविवेचनम्- आचार्यभरतमुनेः रससिद्धान्तः रससिद्धान्तस्योपरि अन्येषां साहित्य काव्यज्ञानां चिन्तनम्। साहित्यदर्पणानुसारेण रसानां स्वरूपं, सौन्दर्यानुभूतिः, सौन्दर्यानन्दः, शाश्वतानन्दः, चरमं सत्यं च आनन्दमयत्वम् अलौकिकत्वम्।
- अलङ्कारविवेचनम्- अलङ्कारं काव्येषु प्रधानमिति मन्यमानानाम् आचार्याणां अलङ्कारविषये चिन्तनम्।
- दण्डिनः गुणसिद्धान्तस्य सामान्यपरिचयः।
- वामनस्य रीतिविचारः- रीतिप्रकाराणां सामान्यपरिचयः।
- आनन्दवर्धनाचार्यस्य ध्वनिसिद्धान्तः तत्र काव्यप्रकाशानुसारेण शब्दार्थयोः तात्पर्यार्थश्च विवेचनम् अभिधालक्षणाव्यञ्जनाशक्तीनां विमर्शः।
- कुन्तकस्य वक्रोक्तिसिद्धान्तस्य सामान्यपरिचयः।
- क्षेमेन्द्रस्य औचित्यविचारस्य अल्पपरिचयः।

पाठ्यांशाः (Units) - 3 सौन्दर्यशास्त्रे प्रमुखविचारकाः।

- भरतः, भामहः, वामनः, आनन्दवर्धनः, राजशेखरः, अभिनवगुप्तः, मम्मटः, विश्वनाथः, रूपगोस्वामी, पण्डितराजः जगन्नाथश्च एतेषां सिद्धान्तपरिचयः, तेषां कृतीनाम् सामन्यपरिचयः।

पाठ्यांशाः (Units) - 4 सौन्दर्यसिद्धान्तानां प्रयोजनम्।

- अभिज्ञानशाकुन्तले चतुर्थोऽङ्केषु सुप्रसिद्धं श्लोकचतुष्टयम्।
- मुद्राराक्षसे मङ्गलाचरणं आचार्यचाणक्यस्य प्रवेशपर्यान्तं नाट्यसंहिता।
- मृच्छकटिके पञ्चमाङ्के विदूषकमैत्रेयस्य कुम्भीलकस्य च प्रसङ्गः।

प्रायोगिकम् (Practicum)

अधोदत्तेषु **गतिविधिषु चतस्रः गतिविधयः** अनिवार्याः।

- चितांशेषु सौन्दर्यतत्त्वनिरूपणम्।
- गीतविश्लेषणं रूपकविश्लेषणन्तथा।
- चित्राणि अवलोक्य तेषां सौन्दर्यतत्त्वविवेचनम्।

- क्षेत्राटनं क्षेत्रावलोकनञ्च, तेषां वृत्तान्तलेखनम्।
- भरतनाट्यशास्त्रम् अनुसृत्य नाट्यप्रस्तुतिः।
- दुर्गस्थलाभ्यागमनं वृत्तान्तलेखनञ्च।
- सौन्दर्यबोधस्य प्रमुखविचारकानां जीवनम् अथवा सिद्धान्तान् स्वीकृत्य कथालेखनम् / विषयप्रस्तुतिः / नाट्यप्रस्तुतिः / पद्यलेखनम् / सुभाषितनिर्माणम् / परियोजना।
- सौन्दर्यशास्त्रोपरि लिखितेषु प्रधानग्रन्थेषु मुख्यांशानां स्थूलपठनम्।
- विषयप्रस्तुतिः / वाक्यार्थः
- वस्तुसंग्रहालयं गत्वा तत्रास्थितां वस्तूनाम् अवलोकनं, सौन्दर्यतत्त्वानां वर्णनं, सहाध्यायिनैः सह तासां विषये चर्चा।

प्रवचनप्रक्रिया (Mode of Transaction)

- व्याख्यानम्।
- टीकया सह पाठचिकित्सा।
- शैक्षिकाभ्यागमनं अथवा स्थलाभ्यागमनम्।
- परियोजना।
- समूहचर्चा।
- प्रश्नोत्तराणि।
- संवादपद्धतिः।
- चलचित्राणां चित्राणाञ्च अध्ययने प्रयोगः।

आकलनप्रक्रिया (Mode of Assessment)

60% सत्रान्तलेखनपरीक्षाद्वारा मूल्याङ्कनम्
40% प्रायोगिकांशाधारितं मूल्याङ्कनम्

सन्दर्भग्रन्थाः (Reference Books)

1. चतुर्वेदी ब्रजमोहन , भारतीय सौन्दर्यदर्शन, मध्यप्रदेश हिन्दी ग्रन्थ अकादमी. पृ. 5-12, 22-34.
2. चतुर्वेदी ब्रजमोहन, भारतीय सौन्दर्यदर्शन, मध्यप्रदेश हिन्दी ग्रन्थ अकादमी पृ. 42-60
3. पाण्डेय कान्तिचन्द्र, स्वतन्त्र कलाशास्त्र, चौखम्भा संस्कृत सीरीज, वाराणसी, प्रथम भाग पृ. 593-625
4. चतुर्वेदी ब्रजमोहन, भारतीय सौन्दर्यदर्शन, मध्यप्रदेश हिन्दी ग्रन्थ अकादमी पृ. 37-42
5. पाण्डेय कान्तिचन्द्र, स्वतन्त्र कलाशास्त्र, चौखम्भा संस्कृत सीरीज, वाराणसी, प्रथम भाग पृ. 593-625
6. चतुर्वेदी ब्रजमोहन, भारतीय सौन्दर्यदर्शन, मध्यप्रदेश हिन्दी ग्रन्थ अकादमी पृ. 61-76
7. Vishvanatha. (1936). Sāhityadarpaṇa (Based on Kārikās 3/1–28). Bombay: Nirnaya-Sagar Press.

8. Kane, P. V. (n.d.). History of Sanskrit Poetics (pp. 352–391). Delhi: Motilal Banarsidass Publishers.
9. De, S., History of Sanskrit Poetics, Calcutta, Firma Klm Private Limited, 1960.
10. Pandey, K. (2009). Comparative Aesthetics (Vol. 1). Varanasi: Chowkhamba Sanskrit Series Office.
11. उपाध्याय, बलदेव (1963), संस्कृत-आलोचना, हिन्दी समिति, उत्तर प्रदेश: सूचना विभाग।
12. कृष्णकुमार, (1998), अलंकारशास्त्र का इतिहास, मेरठः साहित्य भण्डार।
13. पाण्डेय, के. (1967 & 1978), स्वतन्त्र कलाशास्त्र (प्रथम तथा द्वितीय भाग), वाराणसी: चौखम्भा संस्कृत सीरीज।
14. Gnoli, R. (n.d.). The Aesthetic Experience according to Abhinavagupta. Varanasi: Chowkhamba Sanskrit Series Office.
15. Coomaraswamy, A. K. (1956). Introduction to Indian Art. Adyar: Theosophical Society.

3.1 पाठ्यनाम- संस्कृतभाषाध्वनिविज्ञानम् (Sanskrit Phonetics) -6

सत्रार्द्धः- 3 **श्रेयोऽङ्काः 4**

पाठ्यपरिचयः (About the course)

संस्कृतभाषा उच्चारणशुद्धा वैज्ञानिकी च । संस्कृतभाषायाः ध्वनिविज्ञानविवेचनं आवैदिककालात् समुपस्थितमासीत् । पाठ्यक्रमस्य प्रथमसत्रे वेदाङ्गेषु शिक्षाग्रन्थानां प्रातिशाख्यानां च सामान्यपरिचयोऽभवत् । साम्प्रतं शिक्षाग्रन्थेषु वर्णिताः विषयाः विस्तरेण अध्येयाः । भाषायाः मूलघटको ध्वनिः-वर्णात्मको ध्वनिः । एतस्य ध्वनेः उत्पत्तिः कथं जायते, भाषायां, विशेषरूपेण संस्कृतभाषायां ध्वनेः स्वरूपं किं वर्तते, वर्णानां शुद्धोच्चारणं कथं भवेत्, वर्णात्मकध्वनयोः मिथः कथं भवति इत्येषां सर्वेषां विषयानाम् अध्ययनम् अस्मिन् प्रश्नपत्रे वयं कुर्मः । पाणिनीयशिक्षा आधिक्येन अधीता, साम्प्रतमपि अध्ययनं कुर्वन्ति अभ्यासकाः । अतः भारतीयध्वनिविज्ञाने संस्कृतभाषाविज्ञाने च उपलक्षिताः विषयाः पाणिनीयशिक्षायाः सन्दर्भेण अत्र ज्ञातव्याः / अधिगम्याः।

उद्देश्यम् (Course Objective)

1. संस्कृतभाषायां ध्वनिविज्ञानस्य मूलभूतसङ्कल्पनानां सिद्धान्तानां च परिचयः।
2. वाक्-उत्पादनयन्त्राणां परिचयप्रदानम्।
3. वाग्ध्वनीनां सम्यक् प्रत्यक्षीकरणे, अभिज्ञाने, प्रतिलेखने च छात्राणां प्रशिक्षणम्।
4. संस्कृतध्वनिविज्ञानस्य आरम्भबिन्दुरूपेण विद्यमानानां प्राथमिकग्रन्थानां परिचयः।
5. संस्कृतध्वनिविज्ञानस्य विकासे शिक्षाग्रन्थानां परिचयः, तेषां महत्त्वपूर्णयोगदानस्य च परिचयः।
6. संस्कृतध्वनिवैज्ञानिकसिद्धान्तानां निरूपणे व्यवस्थीकरणे च पाणिनीयशिक्षायाः मुख्यभूमिकायाः परिचयः।

अधिगमपरिणामः (Learning Outcome)

अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. संस्कृतध्वनिविज्ञानस्य स्वरूपं महत्त्वं च वर्णयिष्यन्ति।
2. ध्वनिविज्ञानस्य परिभाषां प्रदास्यन्ति।
3. भारतीयध्वनिवैज्ञानिकपरम्पराणाम् उद्भवं विकासं च प्रस्तोष्यन्ति।
4. संस्कृतध्वनिप्रणालीनां वागुत्पादनयन्त्राणां ध्वनिविज्ञानस्य सिद्धान्तानां च विवरणानि प्रदास्यन्ति।
5. भारतीयध्वनिविज्ञानस्य स्वरूपं वर्णयन्तः संस्कृतध्वनिविज्ञानस्य प्रमुखग्रन्थान् सूचयिष्यन्ति।
6. संस्कृतध्वनिविज्ञानस्य सङ्कलने पाणिनीयशिक्षायाः वैशिष्ट्यं भूमिकां च प्रस्तोष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	संस्कृतभाषाध्वनिविज्ञानम्	40 hr	0	24 hr.	4

पाठ्यांशाः (Units)

पाठ्यांशाः (Units) – 1 ध्वनिविज्ञानस्य संक्षिप्तपरिचयः।

- ध्वनिविज्ञानस्य परिभाषा।
- ध्वनिविज्ञानस्य उद्भवः विकासश्च।
- भारतीयध्वनिविज्ञानपरम्परा।
- ध्वनिविज्ञानस्य प्रकाराः।

पाठ्यांशाः (Units) - 2 प्रातिशाख्यानां पाणिनीयशिक्षायाश्च सामान्यपरिचयः।

पाठ्यांशाः (Units) - 3 पाणिनीयशिक्षायाः परिचयः (वृद्धपाठः)

- वर्णोत्पादनप्रक्रिया / प्रक्रमप्रकरणम्
- वर्णसङ्ख्याविचारः।
- मात्राविचारः।
- उदात्तादिस्वरविचारः।
- स्थानप्रकरणम्।
- करणप्रकरणम्।
- अन्तःप्रयत्नप्रकरणम्।
- बाह्यप्रयत्नप्रकरणम्।
- स्थानपीडनप्रकरणम्।
- वृत्तिकारप्रकरणम्।
- प्रक्रमप्रकरणम्।
- नाभितलप्रकरणम्।

पाठ्यांशाः (Units) - 4. शिक्षाग्रन्थानाम् अध्ययनप्रक्रियाया अवगमनं - पाणिनीया शिक्षायाः सन्दर्भेण

- पाणिनीयशिक्षा - श्लोकाः 1 तः 22 पर्यन्तम् टीकया सह अध्ययनम्।

प्रायोगिकम् (Practicum)

अधोदत्तेषु **गतिविधिषु चतस्रः गतिविधयः** अनिवार्याः।

- श्लोककण्ठस्थीकरणम्।
- श्लोकस्थसंज्ञापदानां सूचीकरणम्।
- समूहचर्चा।
- शिक्षाग्रन्थेषु बल (वर्णोच्चारणस्थानानि प्रयत्नाश्च) इति विषयस्य सम्भाषणसमये अवलोकनम्।
- श्रुतलेखनस्य अभ्यासः।
- विषयप्रस्तुतिः।
- परियोजना।
- श्लोकस्पष्टीकरणार्थं वाक्यार्थः।
- स्थूलपठनम्।

- मातृभाषायाः वर्णमालायां ये वर्णाः तेषां स्थानप्रयत्नानां उच्चारणसमये अवलोकनं विवरणञ्च।
- भाषासु वर्णोच्चारणसमये स्थानप्रयत्ननां तुलनां कृत्वा वृत्तान्तलेखनम्।

प्रवचनप्रक्रिया (Mode of Transaction)

- व्याखानम्।
- टीकाभ्यासः पाठचिकित्सापद्धतिश्च।
- अनूचानपद्धतिः।
- वाक्यार्थः।
- पीपीटीद्वारा प्रस्तुतिः।

आकलनप्रक्रिया (Mode of Assessment)

60% सत्रान्तलेखनपरीक्षाद्वारा मूल्याङ्कनम्
40% प्रायोगिकांशाधारितं मूल्याङ्कनम्

सन्दर्भग्रन्थाः (Reference Books)

1. तिवारी, भोलानाथः, (1974), तुलनात्मक भाषाविज्ञान, दिल्ली: मोतीलाल बनारसीदास।
2. तिवारी, भोलानाथः, (1982), भाषाविज्ञान, इलाहाबाद: किताब महल।
3. कौण्डिन्यायनः शिवराजाचार्यः, (2012), पाणिनीयशिक्षा, वाराणसी: चौखम्भा विद्या भवन।
4. पाणिनीयशिक्षा, भाष्यकृत् – अवस्थी बच्चूलालो ज्ञानोपाह्वः, सम्पादकः – बालकृष्णः शर्मा, प्रकाशकः – श्रीनिवासरथः, निदेशकः, कालिदास-अकादेमी, उज्जयिनी, वि.सं. 2050।
5. व्यासः भोलाशंकरः, (1957), संस्कृत भाषाशास्त्रीय अध्ययन, वाराणसी: चौखम्बा विद्याभवन।
6. उपाध्यायः बलदेवः (प्रधानसम्पादकः), पाण्डेयः ओम् प्रकाशः (सम्पादकः), (1997), संस्कृत-वाङ्मय का बृहद् इतिहास, द्वितीय खण्ड, वेदाङ्ग, लखनऊ: उत्तरप्रदेशसंस्कृतसंस्थानम्।
7. Paniniya Shiksha – Somlekha. (2014). Delhi: Chaukhamba Sanskrit Pratishthan.
8. Burrow, T. (1991). Sanskrit Language (also trans. into Hindi by Bholashankar Vyas). Varanasi: Chaukhamba Vidya Bhawan.
9. Crystal, D. (1997). The Cambridge Encyclopedia of Language. Cambridge.
10. Gune, P. D. (2005). Introduction to Comparative Philology. Delhi: Chaukhamba Sanskrit Pratisthan.
11. Ghosh, M., Pāṇiniyaśikṣā or The Śikṣā Vedāṅga ascribed to Pāṇini (being the most ancient work on Indo-Aryan Phonetics) Critically edited in all five recensions with an introduction, translation and notes together with its two commentaries.
12. Goswami Pralhad Giri, Paniniya siksha: with Pradip Sanskrit commentary and prahlad Hindi commentary by Panini, Chowkhamba Sanskrit Series Office, 2005.
13. Gosh, B. K. (1977). Linguistic Introduction to Sanskrit. Calcutta: Sanskrit Pustak.
14. Jespersen, O. (1954). Language: Its Nature, Development and Origin. London: George Allen & Unwin.

15. Murti, M. Srimannarayana. (1984). An Introduction to Sanskrit Linguistics. Delhi: D. K. Publication.
16. Verma, S. K., & Krishnaswamy, N. (2005). Modern Linguistics. Delhi: Oxford University Press.

इ-सामग्री

Introduction to Indian Phonetics through Paniniya Shiksha, Vyoma-Samskrta-Pathashala

3.1 पाठ्यनाम -भाषाविज्ञानम् - 7

सत्रार्द्धः- 3 **श्रेयोऽङ्काः - 4**

पाठ्यपरिचयः (About the course)

भाषाविज्ञानम् इति प्रमुखो विषयः। भाषासाहित्याभ्यासकानां, संस्कृतभाषाध्येतॄणां कृते एतस्मिन् सङ्गणकीयभाषाविज्ञान- युगे तु एषः महत्त्वपूर्णविषयः। एतस्य विषयस्य अध्ययनात् भाषाणां ज्ञानं वितनोति। भाषाभिः सम्बन्धः ज्ञायते अस्माभिः। भाषाविज्ञानं जानन्तः अभ्यासकाः अनेकभाषासु तज्ज्ञाः विद्वांसः भवन्ति यतो हि भाषानां शास्त्ररूपेण कथम् अध्ययनं करणीयमिति ते जानन्ति। भाषायाः मूलघटकान् (fundamental units) अनुसृत्य भाषाविज्ञानस्य चिन्तनं वर्तते। तान् मूलघटकान् अस्मिन् प्रश्नपत्रे छात्रा अधीयते। भाषापरिवाराणां परिचयोऽपि अस्मिन् प्रश्नपत्रे विद्यते।

उद्देश्यम् (Course Objective)

1. संस्कृतभाषाशास्त्रस्य मूलभूतज्ञानस्य परिचयः।
2. आधुनिकभाषाविज्ञानस्य प्रमुखानाम् अवधारणानां सिद्धान्तानां परिचयः।
3. आधुनिकभाषाविज्ञानरूपरेखाम् उपयुज्य भाषाविज्ञानदृष्ट्या संस्कृतभाषायाः विश्लेषणं कर्तुं छात्राणां प्रोत्साहनम्।
4. शास्त्रीयसंस्कृतव्याकरणपरम्पराणां समकालीनभाषाविज्ञानदृष्टिकोणैः सह मेलनम्।

अधिगमपरिणामः (Learning Outcome)

अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भाषाविज्ञानक्षेत्रे आधुनिकविकासानां मौलिकज्ञानं सम्पादयिष्यन्ति।
2. आधुनिकभाषाविज्ञाने प्रस्तावितानां सिद्धान्तानां सन्दर्भे संस्कृतभाषासंरचनानां परीक्षणं करिष्यन्ति।
3. भाषावैज्ञानिकरूपेण संस्कृतस्य वर्णपदवाक्यशब्दार्थसम्बद्धान् अंशान् अवगमिष्यन्ति।
4. भारोपीयभाषापरिवारान्तर्गतस्य संस्कृतस्य विश्लेषणार्थं तुलनात्मकभाषाविज्ञानपद्धतीनां प्रयोगं करिष्यन्ति।
5. संस्कृतभाषाशास्त्रस्य ऐतिहासिकविकासं तथा आधुनिकभाषाध्ययनेषु तस्य प्रासंगिकतां च प्रशंसयिष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	भाषाविज्ञानम्	40 hr	0	24 hr.	4

पाठ्यांशाः (Units)

पाठ्यांशाः (Units) - 1 भाषायाः भाषाविज्ञानस्य च प्रकृतिः।

- भाषायाः प्रकृतिः।

- भाषायाः परिभाषा।
- भाषायाः लक्षणानि।
- भाषाविज्ञानस्य प्रकृतिः।
- भाषाविज्ञानस्य प्रमुखशाखाः।
- भाषाविज्ञानस्य उपयोगिता अनुप्रयोगश्च।

पाठ्यांशाः (Units) – 2 संस्कृतस्य सन्दर्भे भाषाविज्ञानस्य भागाः।

- ध्वनिविज्ञानं स्वरविज्ञानञ्च (Phonetics and Phonology)
- आकृतिविज्ञानम्।
- वाक्यरचना।
- अर्थविज्ञानम्।

पाठ्यांशाः (Units) - 3 भारोपीयभाषाणां संस्कृतस्य च तुलनात्मकम् अध्ययनम्।

- आद्य-भारोपीयभाषायाः अवधारणा।
- आद्य-भारोपीयसिद्धान्तस्य आधुनिकमूल्याङ्कनम्।
- भारोपीयभाषापरिवारस्य विहङ्गावलोकनम्।
- भारोपीयभाषाणां संस्कृतस्य च मिथः सम्बन्धः।

पाठ्यांशाः (Units) - 4 संस्कृतभाषाविज्ञानस्य ऐतिहासिकम् अवलोकनम्।

- संस्कृतभाषाविज्ञानस्य सामान्यपरिचयः।
- संस्कृतभाषाविज्ञानस्य ऐतिहासिकम् अवलोकनम्।
- तुलनात्मकभाषाविज्ञानस्य सामान्यपरिचयः।
- संगणकीयभाषाविज्ञाने संस्कृतभाषायाः योगदानम् उपयोगश्च।

प्रायोगिकम् (Practicum)

अधोदत्तेषु **गतिविधिषु चतस्रः गतिविधयः** अनिवार्याः।

- क्षेत्राभ्यागमनं वृत्तान्तलेखनञ्च।
- कक्षाकार्यं / गृहपाठः।
- विभिन्नासु भाषासु वाचकानां जनानां साक्षात्काराः / समास्याः।
- विषयप्रस्तुतिः।
- वाक्यार्थः।
- परियोजना।

- भारोपीयभाषासु लोकोक्तीनां सङ्ग्रहः।
- भारोपीयभाषासु गीतानां सङ्ग्रहः।
- दैनिके / प्रतिदिनं उपयुक्तानां वस्तूनां कृते भिन्नासु भाषासु प्रयुक्तानां शब्दानां सञ्चयः।
- भारोपीयभाषासु उपलब्धानां शिक्षायाः अङ्कीयसाधनां सूचीकरणम्। (Listing of available Digital Learning tools for languages in Indo-European Family)

प्रवचनप्रक्रिया (Mode of Transaction)

- व्याख्यानम्।
- भाषिकक्रीडा।
- परियोजना।
- समूहचर्चा।
- कक्षाकार्यम् / गृहपाठः
- Inductive-deductive methods
- Demonstration
- संवादः
- अङ्कीयसाधनानि (digital tools) / AI application
- पीपीटीमाध्यमेन प्रस्तुतिः
- प्रश्नोत्तरी

आकलनप्रक्रिया (Mode of Assessment)

60% सत्रान्तलेखनपरीक्षाद्वारा मूल्याङ्कनम्
40% प्रायोगिकांशाधारितं मूल्याङ्कनम्

सन्दर्भग्रन्थाः (Reference Books)

1. तिवारी, भोलानाथ, (1974), तुलनात्मक भाषाविज्ञान, दिल्ली : मोतीलाल बनारसीदास।
2. तिवारी, भोलानाथ, (1992), भाषाविज्ञान, इलाहाबाद : किताबमहल।
3. द्विवेदी, कपिलदेव, (2001), भाषाविज्ञान एवं भाषाशास्त्र, वाराणसी : विश्वविद्यालय प्रकाशन।
4. व्यास, भोलाशंकर, (1957), संस्कृत का भाषाशास्त्रीय अध्ययन, वाराणसी : चौखम्बा विद्याभवन।
5. शर्मा, देवीदत्त, भाषिकी और संस्कृत भाषा, चंडीगढ़ : हरियाणा साहित्य अकादमी।
6. शर्मा, देवीदत्त, संस्कृत का ऐतिहासिक एवं संरचनात्मक परिचय, चंडीगढ़ : हरियाणा साहित्य अकादमी।
7. शर्मा, देवेन्द्रनाथ, (2014), भाषाविज्ञान की भूमिका, दिल्ली : राधाकृष्ण प्रकाशन।
8. सिंह, कर्ण, भाषा विज्ञान, मेरठ : साहित्य भण्डार, सुभाष बाज़ार।

9. Burrow, T. (1991). Sanskrit Language (also trans. into Hindi by Bholashankar Vyas). Varanasi: Chaukhamba Vidya Bhawan.
10. Crystal, David. (1997). The Cambridge Encyclopedia of Language. Cambridge: Cambridge University Press.
11. Ghosh, B.K. (1977). Linguistic Introduction to Sanskrit. Calcutta: Sanskrit Pustak Bhandar.
12. Gune, P.D. (2005). Introduction to Comparative Philology. Delhi: Chaukhamba Sanskrit Pratisthan.
13. Jesperson, Otto. (1954), Language: Its Nature, Development and Origin. London: George Allen & Unwin.
14. Murti, M. (1984). An Introduction to Sanskrit Linguistics. Delhi: D.K. Srimannarayana Publication.
15. Taraporewala. (1962). Elements of the Science of Language. Calcutta: Calcutta University Press.
16. Verma, S.K. Modern Linguistics. Delhi: Oxford University Press.
17. Woolner, A.C. Introduction to Prakrit. Varanasi: Bhartiya Vidya Prakashan.

3.1 पाठ्यनाम- संस्कृतसाहित्ये गद्यकाव्यम् - 8

सत्रार्द्धः- 3 **श्रेयोऽङ्काः - 4**

पाठ्यपरिचयः (About the course)

अस्मिन् पाठ्ये संस्कृतसाहित्ये विद्यमानं गद्यप्रकारं काव्यं वयं पठामः। गद्यकाव्यस्य लक्षणं सुविख्यातलेखकानां गद्यकृतीनाम् अध्ययम् अत्र अपेक्षते। संस्कृतकाव्ये गद्यं कवीनां निकषं वदन्ति इति उक्तिः ख्याता। एतस्याः उक्तेः प्रामाण्यम् अवगमनार्थं प्रख्यातगद्यलेखकानां लेखनशैलीं वयम् अधीमहे।

उद्देश्यम् (Course Objectives)

1. प्रख्यातलेखकानां विशिष्टसाहित्यशैलीनां परिचयप्रदानम्।
2. चितसंस्कृतगद्यकाव्यानां परिचयप्रदानम्।
3. निर्धारितग्रन्थेषु प्रतिबिम्बिताः प्राचीनभारतीयसमाजस्य सामाजिकसांस्कृतिकस्थितीः अधिकृत्य अन्तर्दृष्टेः विकासः।
4. निर्धारितग्रन्थेषु प्रसङ्गनिर्माणं, कथायाः विकासनं, पात्रयोजना इत्येतेषु विषयेषु परिचयः।
5. प्रामाणिकगद्यसाहित्यस्य आधारेण छात्रेषु संस्कृतावगमनकौशलस्य वर्धनम्।
6. गद्यसाहित्यस्य अभ्यासात् कथने (narration) नैपुण्यमाप्नुवन्ति छात्राः।

अधिगमपरिणामः (Learning Outcome)

अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. केषाञ्चन प्रमुखगद्यकाव्यानां ज्ञानं प्राप्स्यन्ति।
2. विभिन्नलेखकानां साहित्यशैलीम् अवगमिष्यन्ति।
3. निर्धारितग्रन्थेषु प्रतिबिम्बिताः भारतीयसमाजस्य सामाजिकसांस्कृतिकस्थितीः अवगमिष्यन्ति।
4. गद्यकाव्यानाम् अनुवादे व्याख्याने च कौशलं प्राप्स्यन्ति।
5. आत्मनः संस्कृतभाषावबोधस्य स्तरं वर्धयिष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lectur)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practical)	
	संस्कृतसाहित्ये गद्यकाव्यम्	40 hr	0	24 hr.	4

पाठ्यांशाः (Units)

पाठ्यांशाः (Units) – 1 गद्यकाव्यपरिचयः

5. विषय कक्ष – भाषा प्रयोगशाळा आणि त्याचे महत्व
6. दृश्य-श्राव्य साधने – महत्व, प्रकार आणि वर्ग अध्यापनातील उपयुक्तता

पाठ्यांशः(Unit)– 2

मराठी अध्यापनाचे नियोजन व मूल्यमापन

1. नियोजन – अर्थ, आवश्यकता आणि महत्व
2. नियोजनाचे प्रकार -
    - वार्षिक नियोजन
    - ब. घटक नियोजन
    - पाठ नियोजन
3. घटक चाचणी निर्मितीमधील विविध टप्पे
4. संविधान तक्ता
5. मूल्यमापनाची विविध साधने – तोंडी परीक्षा, लेखी परीक्षा, प्रात्यक्षिक परीक्षा
6. प्रश्नांचे प्रकार

प्रायोगिकम् (Practicum)

1. वर्ग 11 च्या मराठी भाषेच्या पाठयपुस्तकातील विविध पाठातून निर्देशित झालेली मूल्ये लिहा.
2. उच्च माध्यमिक स्तरावरील मराठी भाषेच्या पाठयपुस्तकाचे चिकित्सक परीक्षण करा.
3. मराठी विषयातील गद्य आणि पद्य भागावरील कोणतेही पाच शैक्षणिक साधन निर्मिती करा.
4. उच्च माध्यमिक स्तरावरील मराठी भाषेच्या पाठयपुस्तकातील पाच पाठांचे पाठनियोजन करा.
5. घटक चाचणीसाठी संविधान तक्ता करा.
6. घटक चाचणीसाठी 25 गुणांचा मराठी भाषेचे प्रश्नपत्र तयार करा.

सन्दर्भग्रन्थाः (Reference Books) -

1. कुंडले म.बा. 1991 ‘मराठीचे अध्यापन’, श्रीविद्या प्रकाशन पुणे
2. करंदिकर सुरेश, 1996 ‘मराठी अध्यापन पध्दती’, फडके प्रकाशन, कोल्हापूर.
3. इंदूरकर कल्याणी, 2007 ‘मराठीचे अध्यापन’, श्री मंगेश प्रकाशन, नागपूर.
4. दुनाखे अरविंद, 2007 ‘मराठीचे आशययुक्त अध्यापन’, नित्य नूतन प्रकाशन, पुणे.
5. अकोलकर ग. वि. आणि पाटणकर ना.वि. 1977 ‘मराठीचे अध्यापन’, व्हीनस प्रकाशन, पुणे.
6. पाटील लीला, 1994 ‘मराठीचे अध्यापन आणि मूल्यमापन’, व्हीनस प्रकाशन, पुणे.
7. सरदेशमुख आणि करंदीकर, 1971 ‘मातृभाषा अध्ययन-अध्यापन’, नीलकंठ प्रकाशन, पुणे.

Content & Pedagogy Language-I, Secondary Stage
Regional Language Malayalam/मलयालभाषाशिक्षणम्

सत्रार्द्धः – 4 **श्रेयोऽङ्कः – 2**

अधिगमपरिणामाः(Learning Outcomes) -

नवीनशिक्षानीत्यनुसारेण उत्तमाध्यापकानां निर्माणम्। भाषाशिक्षणस्य अपेक्षितज्ञानेन उत्तमाध्यापकत्वसम्पादनम्। अध्यापकशिक्षया भाषशिक्षणस्य सिद्धान्तानां स्वांशीकरणम् तथा तस्य अध्यापनेऽध्ययने नियोजनम्। छात्रा अध्ययने स्वांशीकरणे च कुशलाः भविष्यन्ति। पुनः ते मातृभाषायां एतानि सर्वाणि अपि प्रयोगे सक्षमाः भवन्ति। अतः अस्माभिः मातृभाषवत् संस्कृतभाषायामापि कौशलं प्राप्तव्यम्। अस्मिन् पाठ्यक्रमे अध्यापनकौशलस्य विकासः कल्पितः वर्तते। भाषायाः व्याप्तिः, स्वरूपम्, प्राधान्यं तथा च कार्यम् इत्यादीन् उद्दिश्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	मलयालभाषाशिक्षणम्	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) –1

1. मलयालभाषायाः स्वरूपं भाषावैज्ञानिकं सांस्कृतिकं सम्प्रतिकं च महत्वम्।
2. मलयालभाषायां संस्कृतस्य स्वाधीनम्।
3. मलयालशिक्षणोद्देश्यानि माध्यमिक,उच्चमाध्यमिकस्तरे।

पाठ्यांशः(Unit)–2

1. मलयालभाषणसिद्धान्ताः सूत्राणि च

सिद्धान्तः –

1. स्वाभाविकतासिद्धान्तः
2. अभ्याससिद्धान्तः
3. रुचिसिद्धान्तः
4. सक्रियासिद्धान्तः
5. मौखिककार्यसिद्धान्तः
6. बहुमुखिसिद्धान्तः

7. स्वतन्त्रसिद्धान्त:

सूत्राणि –

1. ज्ञातात् अज्ञातं प्रति।
2. सरलात् कठिनं प्रति।
3. स्थूलात् सूक्ष्मं प्रति।
4. पूर्णात् अंशं प्रति।
5. विशेषणात् विशेष्यं प्रति।
6. विश्लेषणात् संश्लेषणं प्रति।
7. मूर्तात् अमूर्तं प्रति।

पाठ्यांश:–3 (भाषाकौशलानि)

1. श्रवणं – महत्वं, प्रयोजनानि प्रकारा:, विविधस्तरेषु श्रवणदोषा:।
2. भाषणम् – महत्वं, प्रयोजनानि, प्रकारा: विविधस्तरेषु भाषादोषा: तन्निवारणोपाया: भाषासंवर्धनोपायाश्च।
3. उच्चारणम् – महत्वं, स्थानप्रयत्नयो: ज्ञानम् उच्चारण दोषा: तन्निवारणोपाया:।
4. पठनम् – महत्वं, प्रयोजनानि, प्रकाश: विविधस्तरेषु पठनदोषा: नन्निवारणोपाया: पठनसंवर्धनोपायश्च।
5. लेखनम् – महत्वं, प्रयोजनानि, प्रकाश: विविधस्तरेषु लेखनदोषा: नन्निवारणोपाया: लेखन संवर्धनोपायाश्च।

प्रायोगिकम् (Practicum) –

- सम्प्रतिककाले संस्कृतभाषाया: अवश्यकता इत्यस्मिन् विषये सुभाषितानां लौकिकन्यायानां च सङ्ग्रह:।
- प्रत्येकं शिक्षणसिद्धान्तस्य शिक्षणसूत्रस्य च उदाहरणरूपेण केषाञ्चन कथानां श्लोकानां वा सङ्ग्रह:।
- भाषाप्रयोगशालाय: उपयोग: श्रवण–भाषा–पठन–लेखनकौशलानां प्राप्ति:।
- विविध संस्कृत प्रदर्शनीनाम् आयोजनम्
- पाठ्यसहगामिक्रिया: (भाषा क्रीडा, चर्चा, कवीनां, कृतिनां च सङ्ग्रह:, गणश: लघुनाटकानां प्रदर्शनम्, वर्तनीलेखनम्, वार्तानां लेखनक्रम:, दिनचत्रिकासु लेखनक्रम:, निबन्धलेखनम्, प्रबन्धानां निर्माणम्, अभ्यासप्रकाश:।

सन्दर्भग्रन्था: (Reference Book) -

- Nair, Chandrashekharan, C.K. (2002) Mathra Bhasha Bodhanam, Trivandram, Kerala Bhasha Institute, NCERT (2005), National Curriculam fram work, New Delhi NCERT.
- SCERT (2007) Kerala Curriculam frame work, Trivandram.
- Pllai, P.E. (1991) Malayala Bhasha Bodhnam, Kerala Chris Printers Kottayam

- Sivarajan, K.R. Sramamnni, P.S. (2003), Malayala Bhashadyapanam, Central Co-Operative Store, University
- Variyar, Prabhakaran, K.M. & A. Santha (1998), Modern lingastics, Trivandram, Kerala Bhasha Institute.
- Uccharanam nannavan. Dr. V.R. Prabodha Chandram, Kerala Bhasha Institute.
- Nalla Malyalam, C.V. Vasndev Bhatthathmi, D.C. Books, Kottayan.
- Bindu C.N. (2009), Mathru Bhashabodhnam, Pravanathakalum Reethikalum, Calicul Scorpio.

Content & Pedagogy Language-I, Secondary Stage

Regional Language Malayalam/मलयालभाषाशिक्षणम्

सत्रार्द्धः – 6 **श्रेयोऽङ्कः – 2**

अधिगमपरिणामाः(Learning Outcomes) –

नवीनशिक्षानीत्यनुसारेण उत्तमाध्यापकानां निर्माणम्। भाषाशिक्षणस्य अपेक्षितज्ञानेन उत्तमाध्यापकत्वसम्पादनम्। अध्यापकशिक्षया भाषशिक्षणस्य सिद्धान्तानां स्वांशीकरणम् तथा तस्य अध्यापनेऽध्ययने नियोजनम्। छात्रा अध्ययने स्वांशीकरणे च कुशला: भविष्यन्ति। पुन: ते मातृभाषायां एतानि सर्वाणि अपि प्रयोगे सक्षमा: भवन्ति। अत: अस्माभि: मातृभाषवत् संस्कृतभाषायामापि कौशलं प्राप्तव्यम्। अस्मिन् पाठ्यक्रमे अध्यापनकौशलस्य विकास: कल्पित: वर्तते। भाषाया: व्याप्ति:, स्वरूपम्, प्राधान्यं तथा च कार्यम् इत्यादीन् उद्दिश्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	मलयालभाषाशिक्षणम्	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) –1

1. मलयालभाषाया: स्वरूपं भाषावैज्ञानिकं सांस्कृतिकं सम्प्रतिकं च महत्वम्।
2. मलयालभाषायां संस्कृतस्य स्वाधीनम्।
3. मलयालशिक्षणोद्देश्यानि माध्यमिक,उच्चमाध्यमिकस्तरे।

पाठ्यांशः(Unit) –2

मलयालभाषणसिद्धान्ता: सूत्राणि च

सिद्धान्त: –

1. स्वाभाविकतासिद्धान्त:
2. अभ्याससिद्धान्त:
3. रुचिसिद्धान्त:
4. सक्रियासिद्धान्त:
5. मौखिककार्यसिद्धान्त:
6. बहुमुखिसिद्धान्त:
7. स्वतन्त्रसिद्धान्त:

सूत्राणि –

1. ज्ञातात् अज्ञातं प्रति।

2. सरलात् कठिनं प्रति।
3. स्थूलात् सूक्ष्मं प्रति।
4. पूर्णात् अंशं प्रति।
5. विशेषणात् विशेष्यं प्रति।
6. विश्लेषणात् संश्लेषणं प्रति।
7. मूर्तात् अमूर्तं प्रति।

पाठ्यांशः(Unit) –3
(भाषाकौशलानि)

1. श्रवणं – महत्वं, प्रयोजनानि प्रकाराः, विविधस्तरेषु श्रवणदोषाः।
2. भाषणम् – महत्वं, प्रयोजनानि, प्रकाराः विविधस्तरेषु भाषादोषाः तन्निवारणोपायाः भाषासंवर्धनोपायाश्च।
3. उच्चारणम् – महत्वं, स्थानप्रयत्नयोः ज्ञानम् उच्चारण दोषाः तन्निवारणोपायाः।
4. पठनम् – महत्वं, प्रयोजनानि, प्रकाशः विविधस्तरेषु पठनदोषाः नन्निवारणोपायाः पठनसंवर्धनोपायश्च।
5. लेखनम् – महत्वं, प्रयोजनानि, प्रकाशः विविधस्तरेषु लेखनदोषाः नन्निवारणोपायाः लेखन संवर्धनोपायाश्च।

प्रायोगिकम् (Practicum) –

1. सम्प्रतिककाले संस्कृतभाषायाः अवश्यकता इत्यस्मिन् विषये सुभाषितानां लौकिकन्यायानां च सङ्ग्रहः।
2. प्रत्येकं शिक्षणसिद्धान्तस्य शिक्षणसूत्रस्य च उदाहरणरूपेण केषाञ्चन कथानां श्लोकानां वा सङ्ग्रहः।
3. भाषाप्रयोगशालायः उपयोगः श्रवण–भाषा–पठन–लेखनकौशलानां प्राप्तिः।
4. विविध संस्कृत प्रदर्शनीनाम् आयोजनम्
5. पाठ्यसहगामिक्रियाः (भाषा क्रीडा, चर्चा, कवीनां, कृतिनां च सङ्ग्रहः, गणशः लघुनाटकानां प्रदर्शनम्, वर्तनीलेखनम्, वार्तानां लेखनक्रमः, दिनचत्रिकासु लेखनक्रमः, निबन्धलेखनम्, प्रबन्धानां निर्माणम्, अभ्यासप्रकाशः।

सन्दर्भग्रन्थाः (Reference Books) -

- Nair, Chandrashekharan, C.K. (2002) Mathra Bhasha Bodhanam, Trivandram, Kerala Bhasha Institute, NCERT (2005), National Curriculam fram work, New Delhi NCERT.
- SCERT (2007) Kerala Curriculam frame work, Trivandram.
- Pllai, P.E. (1991) Malayala Bhasha Bodhnam, Kerala Chris Printers Kottayam
- Sivarajan, K.R. Sramamnni, P.S. (2003), Malayala Bhashadyapanam, Central Co-Operative Store, University
- Variyar, Prabhakaran, K.M. & A. Santha (1998), Modern lingastics, Trivandram, Kerala Bhasha Institute.
- Uccharanam nannavan. Dr. V.R. Prabodha Chandram, Kerala Bhasha Institute.

- Nalla Malyalam, C.V. Vasndev Bhatthathmi, D.C. Books, Kottayan.
- Bindu C.N. (2009), Mathru Bhashabodhnam, Pravanathakalum Reethikalum, Calicul Scorpio.

5 योग्यतासंवर्धनं मूल्यसंवर्धित - पाठ्यविषयाश्च
5.1 सम्प्रेषणात्मकं संस्कृतम्

सत्रार्द्धः 1 **श्रेयोऽङ्काः- 4**

पाठ्यपरिचयः (About the course)

भाषाः हि समेषां विषयाणाम् अधिगमाय आधारत्वेन स्वीक्रियते। नूतनानां सम्प्रत्ययानाम् अवगमने, विचाराणां परिवर्तने सम्प्रेषणात्मके च विचारे भाषा एव समर्था भवति। भाषायाः भूमिकायाः शिक्षायाः च विकासे स्वीकृतिः प्रदेया भवति। साहित्यिके, समाजशास्त्रीये, सांस्कृतिके, मनोवैज्ञानिके सौन्दर्यात्मके चेत्यादिषु पक्षेषु भाषायाः बहु-आयामीति आवश्यकतानां परीक्षणम्। राष्ट्रियशिक्षानीतौ (2020 इत्यस्मिन्) भाषायाः कौशलेषु महत्त्वानुगुणं विकासप्रस्तावाः प्रदत्ताः विद्यन्ते। छात्राणां संज्ञानात्मकविकासे भाषिककौशलानां विकासे गौरवं प्रदेयमेव। पाठ्यक्रमोऽयं छात्राणां श्रवण-भाषण-पठन-लेखनादि- कौशलानां विकासे समाधृतो वर्तते। दैनन्दिनजीवने समेषां शास्त्राणाम् अधिगमे च भाषाकौशलानां संवर्द्धनम् अपरिहार्यं वर्तते। पठनं अर्थग्रहणपूर्वकम्, अवगमनपूर्वकम् चिन्तनपूर्वकं सम्प्रत्ययात्मकावबोधपूर्वकञ्च विधातुं कौशलसंवर्द्धनम् अपेक्ष्यते। छात्राध्यापकानां प्रभावोत्पादके सम्प्रेषणात्मके कौशले समालोचनात्मके चिन्तने च अभिवृद्धिर्विधेया। एषः पाठ्यक्रमः भाषिकसम्प्रेषणदृशा छात्राध्यापकानां कौशलवर्द्धनाय उपकारको भविष्यति।

अधिगमपरिणामाः(Learning Outcomes)

पाठ्यक्रमस्य परिपूर्त्यनन्तरं छात्राध्यापकाः -

- प्रभावोत्पादकरीत्या श्रवणे, भाषणे, पठने, लेखने समालोचनात्मके च चिन्तने स्वकीयानां क्षमतानां प्रदर्शने शक्ताः भविष्यन्ति।
- प्रभाविसम्प्रेषणे भाषायां संज्ञानात्मके च इत्यनयोर्मध्ये सम्बन्धस्थापने भाषाशास्त्रीयस्य च ज्ञानस्य कौशलस्य प्रभाविसम्प्रेषणे अनुप्रयोगे विदग्धाः भविष्यन्ति।
- सामाजिककौशलानाम् उन्नयने अन्तःवैयक्तिकसम्बन्धस्य च स्थापने समर्थाः भविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	सम्प्रेषणात्मकं संस्कृतम्	40 hr	0		4

पाठ्यांशः(Unit) - 1 श्रवणकौशलम्

- अक्षरश्रवणम् (संस्कृतवर्णमाला)
- शब्दश्रवणम्
- वाक्यश्रवणम्

- लघुकथाश्रवणम्
- वार्ताश्रवणम्
- गद्यश्रवणम् – कथा-संवाद-निबन्धादयः (हितोपदेशकथा, वैद्य-रोगी-संवादः, गुरुशिष्यसंवादः, पिता-पुत्र-संवादः, आपणिकग्राहकसंवादः इत्यादयः संवादाः श्रावणीयाः)
- पद्यश्रवणम् – गीत-काव्य-सुभाषितानि
- शास्त्रश्रवणम्

पाठ्यांशः(Unit) 2 - भाषणकौशलम्

- उच्चारणकौशलम् –शब्दरूपाणि, धातुरूपाणि
- सम्भाषणम् – (सम्भाषणशिबिरबिन्दवः)
- वाक्यव्यवहारः (प्रथमा दीक्षा)
- कर्तरि-कर्मणि-भावे-प्रयोगाः
- कृत् प्रत्ययाः – क्त्वा, तुमुन् ल्यप्, ल्युट्, क्त, क्तवतु, ण्वुल्, शतृ, शानच्, क्तिन्, तव्यत्, अनीयर्
- अव्ययपदानि –
- विभक्तयः उपपदविभक्तयश्च
- सङ्ख्या
- विशेषण-विशेष्यभावः

पाठ्यांशः(Unit) 3 - पठनकौशलम्

- विशिष्टपदानां पठनाभ्यासः
  अर्थावबोधपूर्वकं पठनम्
- वाक्यपठनाभ्यासः
- दीर्घवाक्यपठनाभ्यासः - (वाक्यविस्तरः प्रथमा दीक्षा)
- गद्यपठनम् – लघुकथा-वार्ता-संवाद-वृत्तान्तादीनां पठनम्। (सम्भाषणसन्देशः, चन्दमामाप्रभृतिसंस्कृतपत्रिकाभ्यः लघुकथापठनम्, सम्भाषणम्- प्रथमादीक्षातः संवादपठनं कारयितुं शक्यते।
- गद्यसाहित्यपठनम् – आरोह-अवरोह-भाव-विरामादिचिह्नाभिज्ञानपूर्वकं वेग-पठनाभ्यासः। (पञ्चतन्त्रम्, शुकनासोपदेशः
- पद्यसाहित्यपठनम् – यति-गति-लय-भाव-आरोह-अवरोहपूर्वकं पठनाभ्यासः। (संक्षेपरामायणम्, श्रीमद्भगवद्गीता, सुभाषितानि)

पाठ्यांशः(Unit) 4 - लेखनकौशलम्

- वर्ण-पद-वाक्यलेखनाभ्यासः
- दीर्घवाक्यलेखनाभ्यासः
- पत्रलेखनम्, वृत्तान्तलेखनम्, वार्तालेखनम्, प्रतिवेदनलेखनम्।
- निबन्ध-आलेख-लेखनाभ्यासः
- अनुवादलेखनाभ्यासः।

पाठ्यांशः(Unit) 5 – सम्प्रेषणकौशलम्

- सम्प्रेषणकौशलम्।
- सम्प्रेषणकौशलवर्द्धनोपायाः।
- सम्प्रेषणे लोकोक्तीनां लौकिकन्यायानां दृष्टान्तानां च सम्प्रयोगः।
- भाषणप्रस्तुतिः।
- भावभङ्गिमा-हस्त-नेत्रादिचालनरीतिः।
- सम्प्रेषणे पदवाक्यप्रमाणशास्त्राणाम् अनुप्रयोगः।
- प्राप्तसूचनानां/विषयवस्तुनः तार्किकविश्लेषणात्मकम्/समीक्षात्मकम् अध्ययनम्
- स्वकल्पनया कथालेखनम्
- साम्प्रतिकसन्दर्भविषये आलेख/निबन्धलेखनम्
- काव्यरचनाभ्यासः

प्रायोगिकम् (Practicum)

1. **परिचय-गोष्ठी -** छात्राः परस्परं स्वपरिचयं (यथा- नाम, रुचिः, ग्रामः) सरलसंस्कृतेन वदन्ति।
2. **अभिनय-क्रीडा/भूमिकानिर्वहणम् -** आपणिक-क्रेतृ-संवादः अथवा चिकित्सालय-संवादस्य अभिनयः।
3. **चित्रवर्णनम् -** किमपि चित्रं दृष्ट्वा पञ्चसरल-संस्कृतवाक्यैः तस्य वर्णनं कुर्वन्ति।
4. **कथा-कथनम् -** पञ्चतन्त्रस्य अथवा हितोपदेशस्य लघुकथानां स्वशब्देषु सरलतया प्रस्तुतिः।
5. **वस्तु-प्रदर्शनी -** कस्यापि वस्तुनः (यथा- पुस्तकम्, लेखनी, फलम्) उपयोगानां संस्कृतेन वर्णनम्।
6. **संस्कृतभाषाक्रीडा -** शब्दावली-वर्धनार्थं शब्द-अन्त्याक्षरी अथवा वर्णमाला-आधारित-क्रीडा।
7. **गीत-गायनम् -** सरलसंस्कृतगीतानां (यथा- बालगीतानि) सामूहिकं सस्वर-गायनम्।
8. **संवाद-लेखनम् -** द्वयोः मित्रयोः मध्ये दूरभाषा-सम्भाषणस्य लेखनं वाचनं च।

प्रवचनप्रक्रिया (Mode of Transaction)-

एतस्य पाठ्यक्रमस्य परिपूर्तये अन्तर्क्रियात्मकानि व्याख्यानि, अनुशिक्षणानि, विमर्शनानि, भूमिका-निर्वहणानि, परियोजनाकार्याणि, कार्यशालाः, भाषायाः जागरूकतायाः कार्याणि चेत्यादीनि विधेयानि। कक्ष्याकक्षे

भाषायां वाद-विवादानाम् आयोजनेन समालोचनात्मकस्य चिन्तनस्य विकासो भवितुमर्हति। भाषाकौशलेषु अभ्यासेन विशुद्धायाः भाषायाः प्रयोगः प्रचलिष्यति। छात्राणां कृते निर्दिष्टानां कालांशानां पठनं हि अपरिहार्यं भवति।

आकलनप्रक्रिया (Mode of Assessment) -

- छात्रस्य कक्षायां अधिगमसामर्थ्यं परियोजनाकार्याणि प्रयोगकार्याणि च समीक्ष्य आकलनं विधेयम्।

सन्दर्भग्रन्थाः (Reference Books)

- प्रथमा दीक्षा (वाक्यव्यवहारः, वाक्यविस्तरः, सम्भाषणम्, वर्णमाला), केन्द्रीय संस्कृत विश्वविद्यालय, नई दिल्ली।
- संक्षेपरामायणम्,
- मिश्रः लोकमान्यः, भाषा शिक्षा, मृगाक्षी प्रकाशनम्, 5/113, विराम खण्ड, गोमती नगर, लखनऊ-2023
- शर्मा, कुलदीपः, संस्कृतशिक्षणदीपिका, केन्द्रीयसंस्कृतविश्वविद्यालयः, नई दिल्ली, 2022
- शर्मा, कुलदीपः, संस्कृतशिक्षणभूमिका, केन्द्रीयसंस्कृतविश्वविद्यालयः, नई दिल्ली, 2022
- शर्मा कुलदीपः, सचित्रं प्रहेलिकाशतकम्, आइडियल पब्लिकेशन, जौहरी बाजार, जयपुर, 2019
- तिवारी, नीलाभ, संस्कृतबोधिनी, मध्यप्रदेश संस्कृत बोर्ड, भोपाल, मध्यप्रदेश, 2007
- शर्मा, अपूर्वः, शिक्षकसंदर्शिका, प्रथमः द्वितीयः भागः, संस्कृत संवर्धन प्रतिष्ठान, नई दिल्ली
- शर्मा, अपूर्वः, अभ्याससरिणी संस्कृतव्याकरणम्, संस्कृत संवर्धन प्रतिष्ठान, नई दिल्ली
- साहूः, डॉ. सोमनाथः, शैक्षिकपरिभाषाकोशः, सरस्वती पब्लिकेशन, जयपुर, 2018
- द्विवेदी, कपिलदेवः, भाषाविज्ञान एवं भाषाशास्त्र, त्रयोदश संस्करण, विश्वविद्यालय प्रकाशन, वाराणसी, 2012

5.2 Communicative English

Semester -2 **Credit -4**

About the course

Language has undeniable things with the all kinds of learning. It enables an individual to understand new concepts, exchange ideas, and communicate thoughts with fellow beings. To appreciate fully the role of language in education, one must begin to develop a holistic perspective on language. This course aims to prepare the students teacher to teach language at the school level. It focuses on training the student teacher to the sound system of languages, word formation processes, sentence formation, semantic and pragmatic aspects of languages. The course intends to enable the learners to integrate all the four language skills. using different genres. The course helps improve basic communication skills such as listening, speaking, reading and writing skills among English language learners. The course is designed to enhance knowledge of grammar of English and enable the students to formulate grammatically correct and contextually appropriate sentences and, words and also empower with summarizing skills, overall presentation skills effectively.

Learning outcomes

After completing the course, students’ teachers will be able to:

- demonstrate reading, writing, listening, speaking, and thinking abilities in English.
- recognize the link between language and mental skills and demonstrate their knowledge and skills effectively for all purposes.
- build inter-personal relationships and enhance social skills.

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	Communicative English	40 hr	0	24 hr.	4

Unit 1

Understanding language and communication.

1. Language as a means of communication and language as a medium of cognition.

2. Nature and process of communication, types of communication - oral and written , Verbal and non verbal, barriers to communication.
3. Context of communication, the role of decoder, face to face interaction , turn taking conversation.

Unit 2

Understanding Grammar

1. Word and meaning, parts of speech.
2. Sentences and its constituents: Simple, complex and compound sentences. Semantics and Pragmatics: lexical meaning- synonymy, antonymy, meronymy grammatical meaning speech acts.
3. Identification of morphemes, word formation processes.

Unit 3

Basic Communication Skills

1. Classification of speech, sounds and letters, stress, pitch, tone, intonation, consonant and vowel system.
2. Speaking to learn and learning to speak. Situational conversations and role plays; Task/ activities for developing speaking (speech, elocution, discussion, debate, storytelling)
3. Presentation in speaking skills; practicing narrative skills; Body language, voice and pronunciation.

Unit 4

Reading and Writing Skills

1. Reading comprehension, types of reading, features that makes text complex, reading as an interactive process.
2. Reading discipline-based texts; vocabulary development.
3. Effective writing skills; writing for specific purposes (essays, letter and report).

Practicum

Practical activities

1. **Role Play -** Students act out real-life scenarios like ordering food at a restaurant or asking for directions.
2. **Information Gap -** Pairs are given slightly different pictures; they must describe them to find the differences without looking at each other's paper.
3. **Think-Pair-Share -** Students think about a prompt (e.g., "If I were a superhero..."), discuss it with a partner, and then share with the class.
4. **Reporting -** Make a video report of real event around you.

5. **Chain Storytelling -** One student starts a story with one sentence, and each subsequent student adds a new sentence to build a plot.
6. **Mock Interviews -** Students take turns being a "celebrity" and a "reporter" to practice asking and answering questions.
7. **Interactive Games -** Games like "Taboo" or "Pictionary" encourage students to describe words using synonyms and creative English.
8. **Show and Tell -** Students bring an object and explain its significance, followed by a Q&A session from the class.

Mode of Transaction

Teaching this course will involve a mix of interactive lectures, tutorials, and practical involves such as discussion, role plays, projects, simulations, workshops, and language awareness activities. The teaching intents deeper approaches to learning, involving in classroom discussion, developing the critical thinking/problem solving abilities among the students and will also focus on situations we are in our daily lives. The one would be performing task that involve in natural integration of language skills. The students are expected to read assigned chapters/articles before the session and the course requires active participation from the students.

Mode of Assessment

The assessment of the learner will be primarily based on the assessment of both linguistic and communicative skills using battery of tests and test types, group works and projects.

Reading Materials

- SP Dhanavel, English Language Teaching in India the Shifting Paradigms.
- M.S Sachdeva, Teaching of English.
- A.L Kohli, Techniques of Teaching English.
- Essential English Grammar, Raymond Murphy
- T. Balasubramanian, English Phonetics for Indian Students.
- Collins English Grammar and Composition.
- Geetha Nagaraj. English Language teaching.
- BBC book Compacta English assignment.
- You tube channels: Learn English Lab,
  BBC Learning English, English teaching@englishteaching5325.

5.3 कलाशिक्षा (प्रदर्शनं दृश्यञ्च) रचनात्मकाभिव्यक्तयश्च

उदाहरणम् – 1 – काष्ठपुत्तलिका

सत्रार्द्धम् – 1 **श्रेयोङ्का: - 2**

पाठ्यपरिचय: (About the course)

शैक्षिकसिद्धान्ते व्यवहारे च आत्माभिव्यक्तिरूपेण कलाया: विविधप्रकारैः सह सम्बन्धस्थापनम् अपि च तेषां प्रशंसनार्थं संवेदनशीलताया: विकासस्य आवश्यकता कश्चन महत्त्वपूर्णो विषयो वर्तते। आत्माभिव्यक्तिरूपेण छात्राणां संज्ञानात्मक–भावात्मक– क्रियात्मकपक्षाणां विकासे कलाया: अत्यधिकं योगदानं भवति, अपि च छात्रा: कस्याश्चिदपि कलायाः माध्यमेन आत्माभिव्यक्तये उपायान् अन्विष्यन्ति । एतदतिरिच्य कलाया: समालोचनात्मिका प्रशंसा सौन्दर्यपरकविशिष्टनिर्णयं कर्तुं बालकानां सामर्थ्यं विकासयति। कला प्रौढावस्थायां सांस्कृतिकप्रस्तुतीनाम् अवगमनार्थं तत्प्रशंसार्थञ्च अवधानकेन्द्रीकरणे छात्राणां सामर्थ्यं विकासयति ।

छात्रा: कलाकार्ये विशिष्टम् आनन्दमनुभवन्ति , ते कलाकार्येण आत्मानम् अभिव्यक्तीकुर्वन्ति । कलामाध्यमेन छात्राणां क्रियात्मककौशलानां विकासः सम्भवति। सामाजिकीकरणस्य विभिन्नानि तत्त्वानि कलाया: विविधरूपेभ्यः प्राप्यन्ते। कलामाध्यमेन छात्राः स्वीयसहपाठिनः सम्यग् अभिजानन्ति अवगच्छन्ति च परस्परं मैत्रीञ्च स्थापयन्ति । छात्रा: विविधासु कलासु भागं गृहीत्वा समवयस्कसमूहस्य विकासमपि कुर्वन्ति। कलाद्वारा छात्रा अन्यै: सह कार्यकरणस्य ज्ञानमपि प्राप्नुवन्ति। कला छात्रेभ्यः स्वतन्त्ररूपेण चिन्तयितुं स्रष्टुं विचारयितुञ्च अवसरान् यच्छति। वस्तुत: कला एतादृशं स्थलं वर्तते यत्र संज्ञानात्मक-भावात्मक-मनोगत्यात्मकानि त्रिविधानि कार्याणि सम्मिलितानि भवन्ति ।

एतदर्थं शिक्षास्नातकोत्तरच्छात्रा: येषां लक्ष्यं शिक्षणव्यवसायो वर्तते, ते यस्मिन् कार्ये संलग्नाः सन्ति तस्मिन् कार्ये कलाया: कस्यचित् तत्त्वस्य सन्निवेशस्य आवश्यकता भविष्यति । एतत्साधयितुं सामान्यरूपेण कलायाः प्रशंसायाः, कस्याश्चिद् एकस्याः कलायाः परिचयस्य, रचनात्मकाः कलात्मकाश्च भवितुं मूलभूतकौशलानां क्षमतानाञ्च आवश्यकता वर्तते । एतदतिरिच्य येषां कार्यम् अन्यविषयक्षेत्रसम्बद्धं वर्तते, तेऽपि कलाशिक्षायां समालोचनात्मकचिन्तनेन परिचिता: भवेयुः।

एवं प्रथमसत्रार्द्धे छात्रा: कञ्चन पाठ्यक्रमम् अध्येष्यन्ते । यस्योद्देश्यं कलासौन्दर्यस्य निर्णयाभिज्ञाने तत्प्रशंसायाञ्च साहाय्यप्रदानम्, कस्याश्चित् कलायाः परिचयप्रदानम्, आत्माभिव्यक्तौ रचनात्मकतां कलात्मकताञ्चानेतुं मूलभूतकौशलानां विकासश्च वर्तते । कौशलानि अभ्यासैः विकसितानि भवन्ति, अतः अस्मिन् पाठ्क्रमे कलासम्पादने वैयक्तिकप्रशिक्षणाय बलं प्रदास्यते । अस्य पाठ्यक्रमस्योद्देश्यम् अनिवार्यरूपेण सौन्दर्यपूर्ण-कलात्मकानां कुशलगतिविधीनां सम्पादनार्थं छात्राणां प्रवृत्तिविकासे साहाय्यं वर्तते, येन अन्यपाठ्यक्रमेषु विकसितानां शैक्षिककार्याणां सम्पादने योगदानं करिष्यन्ति। अत: स्पष्टरूपेण पाठ्यक्रमोऽयम् इमानि कौशलानि प्रशिक्षणार्थिनां तादृशगतिविधिभिः सह योजयिष्यति येषु छात्राध्यापकाः संलग्नाः भवन्ति , यथा- शिक्षणम्, शिक्षणाधिगमसामग्रीविकासः अन्यविषयक्षेत्राणां विषयवस्तु चेति ।

काष्ठपुत्तलिका

काष्ठपुत्तलिका कलाया: किञ्चन एकीकृतरूपमस्ति, यत्र ललितकलात: प्रदर्शनकलापर्यन्तं सर्वं समाहितं वर्तते। काष्ठपुत्तलिका कलासु प्राचीनकलारूपेण मन्यते । प्राचीनकलात् काष्ठपुत्तलिका कृत्रिमकलारूपेण ज्ञायते। अस्याः कलाया: यात्रा अतीव रुचिकरा वर्तते। काष्ठकलाया: सहस्रश: रूपाणि दृश्यन्ते, येषु अङ्गुलीपुत्तलिकात: अतिजटिलकाष्ठपुत्तलिकाया: रूपमपि दृश्यते, यत्र त्रय: जना: पुत्तलिकाया: प्रदर्शनं कुर्वन्ति । प्रत्येकमपि देशस्य प्रदेशस्य च स्वीया भिन्नैव काष्ठपुत्तलिका भवति, अतः भारतवर्षे काष्ठपुत्तलिकाया: विभिन्नानि रूपाणि दृश्यन्ते ।

काष्ठपुत्तलिकाया: पक्षद्वयं मुख्यतया भवति - प्रथमं पुत्तलिकायाः अभिकल्पना निर्माणञ्च, द्वितीयं पुत्तलिकायाः प्रदर्शनम् ।

उपर्युक्तं कौशलद्वयमपि भिन्नमेव वर्तते। पुत्तलिकायाः अभिकल्पनायां व्यापकचिन्तनस्य प्रत्यक्षीकरणस्य प्राविधिककौशलानाम् आवश्यकता भवति, पुत्तलिकाप्रदर्शने तु उच्चस्तरीय-सम्प्रेषणकौशलानि अपेक्ष्यन्ते । अत: कौशलद्वयमिदं मिलित्वैव उच्चस्तरीयकौशलस्य निर्माणं करोति। अस्मिन् पाठ्यक्रमे छात्रा: पुत्तलिकाया: काष्ठपुत्तलिकायाश्च विभिन्नरूपाणां ज्ञानं प्राप्यन्ति। अत्र काष्ठपुत्तलिकानां स्वरूपे सौन्दर्यबोधे च परिचर्चा भविष्यति। तत: छात्राणां काष्ठपुत्तलिकानिर्माणाय अभिकल्पनायै प्रोत्साहनं क्रियते। तदनन्तरं छात्रा: पटकथां विरच्य पुत्तलिकाया: प्रदर्शनं कुर्वन्ति। लघु-लघुसमूहेषु विविधप्रकारकचर्चाधारेण परस्परसहयोगेन च क्रियमाणमिदं काष्ठपुत्तलिकानिर्माणकार्यं छात्राणां सामूहिककार्यसम्पादनकौशलानि सम्प्रत्यात्मकावबोधञ्च विकासयति ।

अधिगमपरिणामाः(Learning Outcomes)

अस्य पाठ्यक्रमस्य सम्पूर्ते: अनन्तरं छात्रा:/छात्राध्यापका: –

1. प्राथमिकशिक्षायां कलायाः सौन्दर्यस्य च महत्त्वं स्पष्टीकर्तुं सक्षमाः भविष्यन्ति ।
2. काष्ठपुत्तलिकाकलाया: प्रशंसापूर्वकं तत्साकं स्वीयघनिष्ठपरिचयं प्रस्तौतुं सक्षमाः भविष्यन्ति ।
3. काष्ठपुत्तलिकानिर्माणे सक्षमाः भविष्यन्ति ।
4. काष्ठपुत्तलिकाया: अभ्यासं सम्पाद्य लघुप्रदर्शनं कर्तुं सक्षमाः भविष्यन्ति ।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	कलाशिक्षा (प्रदर्शनं दृश्यञ्च) रचनात्मकाभिव्यक्तयश्च	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) -1

कलाशिक्षायाः सौन्दर्यस्य च महत्त्वम् (सत्रद्वयम्)

अस्यामन्वितौ कलाया: विविधोदाहरणानाम् अनुप्रयोगेण छात्राः कलायाः सौन्दर्यशास्त्रस्य च सामान्यविचारेषु मानवजीवने सौन्दर्यस्य विविधायामानां प्रकटनविषये च परिचर्चा भविष्यति। छात्रा: दैनन्दिनजीवनस्य सौन्दर्यसम्बद्धविविधपक्षाणामभिज्ञाने सौन्दर्यसम्बद्धनिर्णयविकासे च संलग्नाः भविष्यन्ति अपि च शिक्षायां कलायाः भूमिकाविषये सुपरिचिताः भविष्यन्ति । अस्याङ्गतया शिक्षायां कलायाः पक्षत्रयस्यापि परिचयः कारयिष्यते – कलायाः मूल्यं शिक्षायाञ्च उपकरणत्वेन एतदनुप्रयोगः, कलाकार्याणां नैतिकायामाः, प्रसिद्धकलायाः उच्चकलायाश्च मूल्ये विवादास्पदभेदश्चेति ।

पाठ्यांशः(Unit) -2

काष्ठपुत्तलिकानाम् अभिकल्पनम् (षट् सत्राणि)

अस्यामन्वितौ छात्रा: काष्ठपुत्तिलकाकलाविषये एतदीयेतिहासविषये विशिष्य काष्ठपुत्तलिकाः कथं कार्याणि कुर्वन्ति चेति विषये ज्ञास्यन्ति। अस्यामन्वितौ काष्ठपुत्तलिकायाः प्रारूपनिर्माणार्थम् अपेक्षितकल्पनाविषये, काष्ठपुत्तलिकायाः उपयोगविषये काष्ठपुत्तलिकानिर्माणे प्रयुज्यमानप्रविधीनाञ्च विषये परिचर्चा भविष्यति। एतत् सर्वं छात्राः काष्ठपुत्तलिकायाः प्रारूपनिर्माणं विधाय अध्येष्यन्ते । छात्राः प्रथमम् अङ्गुलीकाष्ठपुत्तलिकानिर्माणं कृत्वा तदनन्तरं कर्गदमाध्यमेन मीन-पक्षि-मूषकादीनां लघ्वाकृतीनां निर्माणार्थम् अग्रेसराः भविष्यन्ति । ततश्च ते विविधप्रकारकमुखावरणानां निर्माणं करिष्यन्ति। अन्ते च ते पुरातनसमाचारपत्रैः वर्णमयपत्रकैश्च पुत्तलिकाया: निर्माणं विधाय क्रीडयितुं प्रदर्शयितुञ्च सज्जीकुर्वन्ति। अपि च ते वेशभूषासम्बद्धानि अन्यापेक्षितवस्तूनि च सज्जीकुर्वन्ति।

पाठ्यांशः(Unit) -3

पुत्तलिकानां प्रदर्शनम् (सत्रचतुष्टयम्)

अस्यामन्वितौ छात्राः काष्ठपुत्तलिकाकलां प्रदर्शयितुम् उत्तमाकर्षककथानकं निर्मातुञ्च आवश्यकसम्प्रेषणकौशलानां विषये ज्ञात्वा स्वीयनिर्मितानां काष्ठपुत्तलिकानां प्रदर्शनं करिष्यन्ति । पुत्तलिकाया: प्रदर्शनं शैक्षिकसन्दर्भे केनचित् क्रियाकलापेन सह सम्बद्धं स्यात्। सर्वेऽपि छात्रा: स्वीयनिर्मितपुत्तलिकानामेव प्रदर्शनं करिष्यन्ति। प्रारम्भे प्रत्येकमपि छात्र: स्वनिर्मितपुत्तलिकानां प्रदर्शनं करिष्यति तदनन्तरं युगलसमूहे, तत: स्वीयपुत्तलिकाभि: सह लघुनाटकं सज्जीकृत्य लघुसमूहे प्रदर्शनं करिष्यन्ति। अनेन तेषामधिगम: संघटितः प्रतिबिम्बितश्च भवति। काष्ठपुत्तलिकानिर्माणस्य विविधपक्षाणां लघुबालानां कक्षाकक्षे कथं समावेश: कर्तुं शक्यते इति विषयेऽपि परिचर्चा विधास्यते। काष्ठपुत्तलिकानिर्माणकाले वैयक्तिकान् सामूहिकांश्च अभ्यासान् आत्मसात्कर्तुं कक्षासन्दर्भे च प्रयोक्तुं चर्चा करिष्यते।

शिक्षणशास्त्रम् - शिक्षणशास्त्रं मूलत: व्यावहारिकं प्रशिक्षणं च वर्तते, अत्र अनुभवात्मकाधिगमाय अधिकं बलं दीयते। ते कार्याणि कृत्वा कलाविषये शिक्षया सह तत्सम्बन्धविषये च अधिगच्छन्ति । इयं प्रक्रिया कलाया: विविधरूपैः ललितकला, विविधवर्णयुक्तक्रीडा, वेशभूषानिर्माणकला, सौन्दर्यप्रसाधनकला, पटकथालेखनं सङ्गीतञ्चेत्यादिभिः परिचाययति।

आकलनप्रक्रिया (Mode of Assessment) -

सप्ताहानुसारं सत्राणां विवरणम्			
क्र.सं.	**शीर्षकम्**	**सत्रप्रवाहः**	**टिप्पणी**
1.	कला सौन्दर्यञ्च, दैनन्दिनजीवने कला	अनुभवानुसारम्	
2.	कलाया: महत्त्वम्, कलाया: समालोचना	परिचर्चा	
3.	कला कलाया: कृते, समाजिकोत्तरदायित्वेन सह कला, सामाजिकपरिवर्तनाय कला	वादविवादः	
4.	काष्ठपुत्तलिकाजगत्, काष्ठपुत्तलिकाया: विभिन्नरूपाणि	प्रस्तुतीकरणम्	
5.	काष्ठपुत्तलिकाया: इतिहासः	व्याख्यानम्	
6.	अङ्गुलीपुत्तलिकाया: निर्माणम्	क्रियात्मकम्	
7.	मुखावरणानां निर्माणम्	क्रियात्मकम्	
8.	पुत्तलिकानां निर्माणम्	क्रियात्मकम्	

9.	वैयक्तिकं प्रदर्शनम्	अभ्यासः	
10.	युगलप्रदर्शनम्	अभ्यासः	
11.	समूहप्रदर्शनम् – 3, 4, 5	अभ्यासः	
12.	प्रदत्तकार्यम्	लिखितम्	

प्रायोगिकम् (Practicum) –

प्रथमसत्रार्धम्

1. **चित्रकला (Painting) -** प्रकृतेः विविधानि दृश्यानि विविध-वर्णैः पत्रेषु आलेखनम्।
2. **मृत्तिका-शिल्पम् (Clay Modeling) -** मृत्तिकया पशूनां, पक्षिणां, फलानां वा प्रतिकृति-निर्माणम्।
3. **रङ्गावलि-रचना (Rangoli) -** विद्यालयस्य प्राङ्गणे वर्णैः सह ज्यामितीय-पारम्परिक-आकृतीनां निर्माणम्।
4. **पत्रकला (Origami) -** कर्गद-पत्रैः विमानानां, नौकानां, पुष्पाणां च कलात्मक-रचना।

सन्दर्भग्रन्थाः (Reference Books)

शिक्षार्थिनाम् अधिगमसामग्रीणाञ्च आवश्यकतानुसारं शिक्षकाः पुस्तकानि/ पठनसामग्रीञ्च सूचयितुमर्हन्ति ।

5.3 कलाशिक्षा (प्रदर्शनं दृश्यञ्च) रचनात्मकाभिव्यक्तयश्च

उदाहरणम् – 1 - काष्ठपुत्तलिका

सत्रार्द्धम् –7 **श्रेयोङ्काः - 2**

पाठ्यपरिचयः (About the course)

शैक्षिकसिद्धान्ते व्यवहारे च आत्माभिव्यक्तिरूपेण कलाया: विविधप्रकारैः सह सम्बन्धस्थापनम् अपि च तेषां प्रशंसनार्थं संवेदनशीलताया: विकासस्य आवश्यकता कश्चन महत्त्वपूर्णो विषयो वर्तते । आत्माभिव्यक्तिरूपेण छात्राणां संज्ञानात्मक–भावात्मक–क्रियात्मकपक्षाणां विकासे कलाया: अत्यधिकं योगदानं भवति, अपि च छात्रा: कस्याश्चिदपि कलायाः माध्यमेन आत्माभिव्यक्तये उपायान् अन्विष्यन्ति । एतदतिरिच्य कलाया: समालोचनात्मिका प्रशंसा सौन्दर्यपरकविशिष्टनिर्णयं कर्तुं बालकानां सामर्थ्यं विकासयति। कला प्रौढावस्थायां सांस्कृतिकप्रस्तुतीनाम् अवगमनार्थं तत्प्रशंसार्थञ्च अवधानकेन्द्रीकरणे छात्राणां सामर्थ्यं विकासयति ।

छात्रा: कलाकार्ये विशिष्टम् आनन्दमनुभवन्ति , ते कलाकार्येण आत्मानम् अभिव्यक्तीकुर्वन्ति । कलामाध्यमेन छात्राणां क्रियात्मककौशलानां विकासः सम्भवति। सामाजिकीकरणस्य विभिन्नानि तत्त्वानि कलाया: विविधरूपेभ्यः प्राप्यन्ते। कलामाध्यमेन छात्राः स्वीयसहपाठिनः सम्यग् अभिजानन्ति अवगच्छन्ति च परस्परं मैत्रीञ्च स्थापयन्ति । छात्रा: विविधासु कलासु भागं गृहीत्वा समवयस्कसमूहस्य विकासमपि कुर्वन्ति। कलाद्वारा छात्रा अन्यै: सह कार्यकरणस्य ज्ञानमपि प्राप्नुवन्ति। कला छात्रेभ्यः स्वतन्त्ररूपेण चिन्तयितुं स्रष्टुं विचारयितुञ्च अवसरान् यच्छति। वस्तुत: कला एतादृशं स्थलं वर्तते यत्र संज्ञानात्मक-भावात्मक-मनोगत्यात्मकानि त्रिविधानि कार्याणि सम्मिलितानि भवन्ति ।

एतदर्थं शिक्षास्नातकोत्तरच्छात्रा: येषां लक्ष्यं शिक्षणव्यवसायो वर्तते, ते यस्मिन् कार्ये संलग्नाः सन्ति तस्मिन् कार्ये कलाया: कस्यचित् तत्त्वस्य सन्निवेशस्य आवश्यकता भविष्यति । एतत्साधयितुं सामान्यरूपेण कलायाः प्रशंसायाः, कस्याश्चिद् एकस्याः कलायाः परिचयस्य, रचनात्मकाः कलात्मकाश्च भवितुं मूलभूतकौशलानां क्षमतानाञ्च आवश्यकता वर्तते । एतदतिरिच्य येषां कार्यम् अन्यविषयक्षेत्रसम्बद्धं वर्तते, तेऽपि कलाशिक्षायां समालोचनात्मकचिन्तनेन परिचिता: भवेयुः।

एवं प्रथमसत्रार्द्धे छात्रा: कञ्चन पाठ्यक्रमम् अध्येष्यन्ते । यस्योद्देश्यं कलासौन्दर्यस्य निर्णयाभिज्ञाने तत्प्रशंसायाञ्च साहाय्यप्रदानम्, कस्याश्चित् कलायाः परिचयप्रदानम्, आत्माभिव्यक्तौ रचनात्मकतां कलात्मकताञ्चानेतुं मूलभूतकौशलानां विकासश्च वर्तते । कौशलानि अभ्यासैः विकसितानि भवन्ति, अतः अस्मिन् पाठ्क्रमे कलासम्पादने वैयक्तिकप्रशिक्षणाय बलं प्रदास्यते । अस्य पाठ्यक्रमस्योद्देश्यम् अनिवार्यरूपेण सौन्दर्यपूर्ण-कलात्मकानां कुशलगतिविधीनां सम्पादनार्थं छात्राणां प्रवृत्तिविकासे साहाय्यं वर्तते, येन अन्यपाठ्यक्रमेषु विकसितानां शैक्षिककार्याणां सम्पादने योगदानं करिष्यन्ति। अत: स्पष्टरूपेण पाठ्यक्रमोऽयम् इमानि कौशलानि प्रशिक्षणार्थिनां तादृशगतिविधिभिः सह योजयिष्यति येषु छात्राध्यापकाः संलग्नाः भवन्ति , यथा- शिक्षणम्, शिक्षणाधिगमसामग्रीविकासः अन्यविषयक्षेत्राणां विषयवस्तु चेति ।

काष्ठपुत्तलिका

काष्ठपुत्तलिका कलाया: किञ्चन एकीकृतरूपमस्ति, यत्र ललितकलात: प्रदर्शनकलापर्यन्तं सर्वं समाहितं वर्तते। काष्ठपुत्तलिका कलासु प्राचीनकलारूपेण मन्यते । प्राचीनकलात् काष्ठपुत्तलिका कृत्रिमकलारूपेण ज्ञायते। अस्याः कलाया: यात्रा अतीव रुचिकरा वर्तते। काष्ठकलाया: सहस्रश: रूपाणि दृश्यन्ते, येषु अङ्गुलीपुत्तलिकात: अतिजटिलकाष्ठपुत्तलिकाया: रूपमपि दृश्यते, यत्र त्रय: जना: पुत्तलिकाया: प्रदर्शनं कुर्वन्ति । प्रत्येकमपि देशस्य प्रदेशस्य च स्वीया भिन्नैव काष्ठपुत्तलिका भवति, अतः भारतवर्षे काष्ठपुत्तलिकाया: विभिन्नानि रूपाणि दृश्यन्ते ।

काष्ठपुत्तलिकाया: पक्षद्वयं मुख्यतया भवति - प्रथमं पुत्तलिकायाः अभिकल्पना निर्माणञ्च, द्वितीयं पुत्तलिकायाः प्रदर्शनम्।

उपर्युक्तं कौशलद्वयमपि भिन्नमेव वर्तते। पुत्तलिकायाः अभिकल्पनायां व्यापकचिन्तनस्य प्रत्यक्षीकरणस्य प्राविधिककौशलानाम् आवश्यकता भवति, पुत्तलिकाप्रदर्शने तु उच्चस्तरीयसम्प्रेषणकौशलानि अपेक्ष्यन्ते। अत: कौशलद्वयमिदं मिलित्वैव उच्चस्तरीयकौशलस्य निर्माणं करोति। अस्मिन् पाठ्यक्रमे छात्रा: पुत्तलिकाया: काष्ठपुत्तलिकायाश्च विभिन्नरूपाणां ज्ञानं प्राप्यन्ति। अत्र काष्ठपुत्तलिकानां स्वरूपे सौन्दर्यबोधे च परिचर्चा भविष्यति। तत: छात्राणां काष्ठपुत्तलिकानिर्माणाय अभिकल्पनायै प्रोत्साहनं क्रियते। तदनन्तरं छात्रा: पटकथां विरच्य पुत्तलिकाया: प्रदर्शनं कुर्वन्ति। लघु-लघुसमूहेषु विविधप्रकारकचर्चाधारेण परस्परसहयोगेन च क्रियमाणमिदं काष्ठपुत्तलिकानिर्माणकार्यं छात्राणां सामूहिककार्यसम्पादनकौशलानि सम्प्रत्यात्मकावबोधञ्च विकासयति।

अधिगमपरिणामाः(Learning Outcomes)

अस्य पाठ्यक्रमस्य सम्पूर्ते: अनन्तरं छात्रा:/छात्राध्यापका: –

7. प्राथमिकशिक्षायां कलायाः सौन्दर्यस्य च महत्त्वं स्पष्टीकर्तुं सक्षमाः भविष्यन्ति।
8. काष्ठपुत्तलिकाकलाया: प्रशंसापूर्वकं तत्साकं स्वीयघनिष्ठपरिचयं प्रस्तौतुं सक्षमाः भविष्यन्ति।
9. काष्ठपुत्तलिकानिर्माणे सक्षमाः भविष्यन्ति।
10. काष्ठपुत्तलिकाया: अभ्यासं सम्पाद्य लघुप्रदर्शनं कर्तुं सक्षमाः भविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्का: (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	कलाशिक्षा (प्रदर्शनं दृश्यञ्च) रचनात्मकाभिव्यक्तयश्च	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) - 1
कलाशिक्षायाः सौन्दर्यस्य च महत्त्वम् (सत्रद्वयम्)

अस्यामन्वितौ कलाया: विविधोदाहरणानाम् अनुप्रयोगेण छात्राः कलायाः सौन्दर्यशास्त्रस्य च सामान्यविचारेषु मानवजीवने सौन्दर्यस्य विविधायामानां प्रकटनविषये च परिचर्चा भविष्यति। छात्रा: दैनन्दिनजीवनस्य सौन्दर्यसम्बद्धविविधपक्षाणामभिज्ञाने सौन्दर्यसम्बद्धनिर्णयविकासे च संलग्नाः भविष्यन्ति अपि च शिक्षायां कलायाः भूमिकाविषये सुपरिचिताः भविष्यन्ति। अस्याङ्गतया शिक्षायां कलायाः पक्षत्रयस्यापि परिचयः कारयिष्यते – कलायाः मूल्यं शिक्षायाञ्च उपकरणत्वेन एतदनुप्रयोगः, कलाकार्याणां नैतिकायामाः, प्रसिद्धकलायाः उच्चकलायाश्च मूल्ये विवादास्पदभेदश्चेति।

पाठ्यांशः(Unit) - 2

काष्ठपुत्तलिकानाम् अभिकल्पनम् (षट् सत्राणि)

अस्यामन्वितौ छात्रा: काष्ठपुत्तिलकाकलाविषये एतदीयेतिहासविषये विशिष्य काष्ठपुत्तलिकाः कथं कार्याणि कुर्वन्ति चेति विषये ज्ञास्यन्ति। अस्यामन्वितौ काष्ठपुत्तलिकायाः प्रारूपनिर्माणार्थम् अपेक्षितकल्पनाविषये, काष्ठपुत्तलिकायाः उपयोगविषये काष्ठपुत्तलिकानिर्माणे प्रयुज्यमानप्रविधीनाञ्च विषये परिचर्चा भविष्यति। एतत् सर्वं छात्राः काष्ठपुत्तलिकायाः प्रारूपनिर्माणं विधाय अध्येष्यन्ते । छात्राः प्रथमम् अङ्गुलीकाष्ठपुत्तलिकानिर्माणं कृत्वा तदनन्तरं कर्गदमाध्यमेन मीन-पक्षि-मूषकादीनां लघ्वाकृतीनां निर्माणार्थम् अग्रेसराः भविष्यन्ति । ततश्च ते विविधप्रकारकमुखावरणानां निर्माणं करिष्यन्ति। अन्ते च ते पुरातनसमाचारपत्रैः वर्णमयपत्रकैश्च पुत्तलिकाया: निर्माणं विधाय क्रीडयितुं प्रदर्शयितुञ्च सज्जीकुर्वन्ति । अपि च ते वेशभूषासम्बद्धानि अन्यापेक्षितवस्तूनि च सज्जीकुर्वन्ति।

पाठ्यांशः(Unit) -3

पुत्तलिकानां प्रदर्शनम् (सत्रचतुष्टयम्)

अस्यामन्वितौ छात्राः काष्ठपुत्तलिकाकलां प्रदर्शयितुम् उत्तमाकर्षककथानकं निर्मातुञ्च आवश्यकसम्प्रेषणकौशलानां विषये ज्ञात्वा स्वीयनिर्मितानां काष्ठपुत्तलिकानां प्रदर्शनं करिष्यन्ति । पुत्तलिकाया: प्रदर्शनं शैक्षिकसन्दर्भे केनचित् क्रियाकलापेन सह सम्बद्धं स्यात् । सर्वेऽपि छात्रा: स्वीयनिर्मितपुत्तलिकानामेव प्रदर्शनं करिष्यन्ति। प्रारम्भे प्रत्येकमपि छात्र: स्वनिर्मितपुत्तलिकानां प्रदर्शनं करिष्यति तदनन्तरं युगलसमूहे, तत: स्वीयपुत्तलिकाभि: सह लघुनाटकं सज्जीकृत्य लघुसमूहे प्रदर्शनं करिष्यन्ति। अनेन तेषामधिगम: संघटितः प्रतिबिम्बितश्च भवति। काष्ठपुत्तलिकानिर्माणस्य विविधपक्षाणां लघुबालानां कक्षाकक्षे कथं समावेश: कर्तुं शक्यते इति विषयेऽपि परिचर्चा विधास्यते। काष्ठपुत्तलिकानिर्माणकाले वैयक्तिकान् सामूहिकांश्च अभ्यासान् आत्मसात्कर्तुं कक्षासन्दर्भे च प्रयोक्तुं चर्चा करिष्यते ।

शिक्षणशास्त्रम् -

शिक्षणशास्त्रं मूलत: व्यावहारिकं प्रशिक्षणं वर्तते, अत्र अनुभवात्मकाधिगमाय अधिकं बलं दीयते। ते कार्याणि कृत्वा कलाविषये शिक्षया सह तत्सम्बन्धविषये च अधिगच्छन्ति । इयं प्रक्रिया कलाया: विविधरूपैः ललितकला, विविधवर्णयुक्तक्रीडा, वेषभूषानिर्माणकला, सौन्दर्यप्रसाधनकला, पटकथालेखनं सङ्गीतञ्चेत्यादिभिः परिचाययति ।

आकलनप्रक्रिया (Mode of Assessment) -

सप्ताहानुसारं सत्राणां विवरणम्			
क्र.सं.	शीर्षकम्	सत्रप्रवाह:	टिप्पणी
1.	कला सौन्दर्यञ्च, दैनन्दिनजीवने कला	अनुभवानुसारम्	
2.	कलाया: महत्त्वम्, कलाया: समालोचना	परिचर्चा	
3.	कला कलाया: कृते, समाजिकोत्तरदायित्वेन सह कला, सामाजिकपरिवर्तनाय कला	वादविवादः	
4.	काष्ठपुत्तलिकाजगत्, काष्ठपुत्तलिकाया: विभिन्नरूपाणि	प्रस्तुतीकरणम्	
5.	काष्ठपुत्तलिकाया: इतिहासः	व्याख्यानम्	
6.	अङ्गुलीपुत्तलिकाया: निर्माणम्	क्रियात्मकम्	

7.	मुखावरणानां निर्माणम्	क्रियात्मकम्	
8.	पुत्तलिकानां निर्माणम्	क्रियात्मकम्	
9.	वैयक्तिकं प्रदर्शनम्	अभ्यास:	
10.	युगलप्रदर्शनम्	अभ्यास:	
11.	समूहप्रदर्शनम् – 3, 4, 5	अभ्यास:	
12.	प्रदत्तकार्यम्	लिखितम्	

सप्तमसत्रार्धम्

1. **संस्कृत-लघुरूपकम् (Sanskrit Drama) -** पञ्चतन्त्रस्य कथानां वा रामायणस्य प्रसङ्गानां मञ्चाभिनयः।
2. **लोक-नृत्यम् (Folk Dance) -** प्रान्तीय-लोकगीतानि आधृत्य समूहे नृत्याभ्यासः।
3. **सङ्गीत-गायनम् (Music) -** संस्कृत-स्तोत्राणां देशभक्ति-गीतानि च सस्वर-गायनम्।
4. **काष्ठपुत्तलिका-प्रदर्शनम् (Puppetry) -** हस्त-निर्मित-काष्ठपुत्तलिकाभिः संस्कृत-संवादानां प्रस्तुतिः।

सन्दर्भग्रन्थाः (Reference Books)

शिक्षार्थिनाम् अधिगमसामग्रीणाञ्च आवश्यकतानुसारं शिक्षकाः पुस्तकानि/ पठनसामग्रीञ्च सूचयितुमर्हन्ति।

5.4 भारतावबोधः (भारतीयज्ञानप्रणाली आचाराश्च) -1

सत्रार्द्धः - 1 **श्रेयोऽङ्काः - 2**

पाठ्यपरिचयः (About the course)

प्राविधिकनवाचारात् पर्यावरणपरिवर्तनवशात् च गतिशीलेऽस्मिन् विश्वे युवचेतसां निर्माणाय काचिद् अन्तर्दृष्टिः आवश्यकी। अस्मिन् परिवर्तनकाले अन्तर्दृष्ट्या मनुष्यः न केवलं समाजशास्त्रीयाम् आत्मीयतां प्राप्नोति, अपितु आध्यात्मिकबौद्धिकमूलानि अपि अवाप्नोति। पाठ्यक्रमोऽयम् अर्थव्यवस्था-समाज-राजनीति-विधिशास्त्र-पर्यावरण-संस्कृति-नैतिकता-विज्ञान-दर्शनादिषु प्रमुखविषयेषु भारतीयन्यासस्य ज्ञानपरम्परायाश्च दृष्टिं प्रयच्छति। पाठ्यक्रमोऽयं भारतीयज्ञानपरम्पराणाम् अनुप्रयोगे विशिष्टं बलं प्रयच्छति, अपि च छात्रेभ्यः न केवलं भारतीयन्यासस्य ज्ञानपरम्परायाश्च ज्ञानाय अनुमोदनाय अपि तु बहुविषयकदृष्ट्या स्वातन्त्र्येण मूल्याङ्कनं कर्तुं तेषां साहाय्यं विदधाति। एतन्मूल्याङ्कनं सङ्क्रमणीयानि एकविंशशतकसम्बद्धानि कौशलानि प्राप्तुं मूल्यवतः पाठान् प्रस्तोष्यति। एतत्पाठ्यक्रमाय पूर्वज्ञानस्य पूर्वावबोधस्य च अपेक्षा न वर्तते । वर्षद्वयात्मकोऽयं पाठ्यक्रमः मूलभूतं ज्ञानं संस्थापयिष्यति तदाधारेण नवनिर्माणञ्च करिष्यति। पाठ्यक्रमोऽयं भारतीयपरम्परायाः सामान्यावबोधेन सह पूर्वतनवर्षेषु परम्परेयं कथं विकसिता चेत्यवबोधमपि छात्राणां विकासयिष्यति । पाठ्यक्रमोऽयं बहुविषयकदृष्ट्या भारतीयज्ञानस्य निर्माणस्य विकासस्य च प्रक्रियाणां घटनानां रूपरेखानिर्माणे व्याख्यासम्पादने, भारतस्य विविधपरम्पराणां मूल्याङ्कनाय तासाम् उपलब्धिपरिसीम्नोः भेदप्रकटने, कक्षायाः सन्दर्भे स्वीयच्छात्राणां भारतीयविचारेषु निहितायाः नैतिकताधारितशिक्षायाः विकासे स्पष्टीकरणे च सक्षमच्छात्राध्यापकानां निर्माणार्थं विरचितः।

अधिगमपरिणामाः (Learning Outcomes)

एतत्पाठ्यक्रमसमाप्तेः परं छात्राः -

- भारतस्य ज्ञानपरम्पराणां विशालनिधिम् अभिज्ञाय तद्विषयकगौरवभावप्रदर्शने समर्थाः भविष्यन्ति ।
- स्वार्जितानुसन्धानात्मककौशलम् आलोचनात्मकचिन्तनकौशलञ्च बहुविषयकविषयेषु अनुप्रयोक्तुं समर्थाः भविष्यन्ति ।
- विभिन्नभारतीयपरम्परापृष्ठभूमेः स्वीयच्छात्रान् सरलमाध्यमेन स्वकीयज्ञानं सारांशीकृत्य बोधयितुं समर्थाः भविष्यन्ति ।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	भारतावबोधः (भारतीयज्ञानप्रणाली आचाराश्च) -1	20 hr	0	12 hr.	2

पाठ्यांशः(Unit)- 1

भारतीयज्ञानपरिचयः

1. परिभाषा अवसरः प्रासङ्गिकता च।
2. भारतीयप्राचीनज्ञानपरम्परायाः संस्कृतेश्च पुनरवलोकनस्य आवश्यकता।

पाठ्यांशः(Unit) -2

संस्कृतिः – कला साहित्यं च

1. ललितकलाः (पारम्परिककलारूपाणि, समकालिककलाः, कला आध्यात्मिकता च, कला निजप्रत्ययः च, कला वैश्वीकरणं च।
2. प्रदर्शनकलाः (भारतीयनृत्यप्रणाली, पारम्परिकभारतीयसङ्गीतस्य अंशाः, दृश्यकलाः, लोककलाः चेत्यादयः)
3. साहित्यम् (संस्कृतसाहित्यम्, धार्मिकसाहित्यम्, भारतीयकाव्यम्, लोकसाहित्यम्, भारतीयकथासाहित्यम्, सङ्गमसाहित्यम्, कन्नड़मलयालमसाहित्यम्, बङ्गसाहित्यम् चेत्यादीनि)

पाठ्यांशः(Unit)- 3

राजनीतिः विधिशास्त्रं च

1. राजत्वं सर्वकारप्रकाराश्च (कुलीनतन्त्रं, गणतन्त्रं), स्थानीयप्रशासनम् (ग्रामप्रशासनम्)
2. विधिशास्त्रस्य आधारः – धर्मः तत्स्रोतांसि च , आपराधिकन्यायः – आरक्षकाः, कारागाराः दण्डाश्च, चाणक्यनीतितः शिक्षाः, आधुनिकभारताय शिक्षा - परम्परासञ्चालितां समतामूलां न्यायपूर्णां च राजव्यवस्थां विधिशास्त्रव्यवस्थां च प्रति।

पाठ्यांशः(Unit) - 4

अर्थव्यवस्था

1. पाषाणयुगाद् गुप्तकालं यावद् भारतीयार्थव्यवस्थायाः अवलोकनम् – नगरीकरणस्य नवसंस्कृतिः (जातिभिः, व्यापारसंघैः अन्यार्थिकसंस्थानैः सहितम्, हड़प्पासभ्यतायाः अर्थव्यवस्था, कृषेः विकासः नवव्यवसायानां प्रसारः, लेखनस्य विकासः)
2. आन्तरिकाः बाह्याश्च व्यापाराः वाणिज्यं च, व्यापारमार्गेण सह इण्डोरोमनसम्पर्काः, दक्षिणभारतीयसामुद्रिकव्यापाराः, मन्दिरार्थव्यवस्था च।
3. भूमिस्वामित्वम् – भूम्यनुदानानि सम्पत्त्यधिकाराश्च, भूमिराजस्वप्रणालयः।
4. अर्थशास्त्रावबोधनम् – विचाराः आलोचनाश्च, आधुनिकभारतीयार्थव्यवस्थायां प्राचीनभारतीयार्थिकविचाराणां प्रासङ्गिकतायाः विन्यासः।

पाठ्यांशः(Unit) - 5

पर्यावरणं स्वास्थ्यञ्च

1. समाजपर्यावरणयोः मध्ये सन्तुलनस्य अवगमनम्। प्राकृतिकसंसाधनानां वनभूमिजलप्राणिनां विषये समाजस्य धारणा।

2. सततवास्तुकला नगरीयनियोजनं च – अद्यतनपर्यावरणीयसमस्यानां समाधानम् (स्वदेशीयज्ञानात् समाजनीतप्रयासेभ्यः सर्वोत्तमकार्याणि।)
3. भारतीयस्वास्थ्यपरम्परा – आयुर्वेदः, सिद्धः, अष्टवैद्यः, यूनानी, अन्यविचारधाराश्च, सुश्रुतचरकसंहिताभ्यां पाठाः।
4. प्राचीने भारते मानसिकं स्वास्थ्यम् – मानसिककल्याणस्य समयपरीक्षितावधारणाः (मनः, ध्यानं, मनश्शरीरसम्बन्धः, आयुर्वेदः, योगदर्शनम् आत्मा चेत्यादीनाम् अवधारणाः)

प्रायोगिकम् (Practicum)

प्रथमसत्रार्धम् -

1. **स्थानीय-स्थलानां भ्रमणम् -** छात्रैः सह समीपे विद्यमानानाम् ऐतिहासिकस्थलानां भ्रमणं तथा तेषां महत्त्वस्य संस्कृतभाषायां वर्णनम्।
2. **वैदिक-गणित-क्रीडा -** वैदिक-गणितस्य सरलसूत्राणां साहाय्येन शीघ्रगणनस्य स्पर्धायाः आयोजनम्।
3. **आयुर्वेद-परिचयः -** गृहे उपलब्धानाम् औषधीय-पादपानां गुणानां सूची-निर्माणम्।
4. **सुभाषित-संग्रहः -** जीवन-मूल्यैः सम्बद्धानां दशश्लोकानां सार्थ-वाचनं तथा तेषां जीवने प्रयोगः।

प्रवचनप्रक्रिया (Mode of Transaction)-

संस्थाने स्थानीयपरम्परायाः व्यवस्थादीनाञ्च विकासविषये संस्कृतेः (वेश-भोजनादिपरम्पराणाम्) उत्सवाय व्याख्यान-अनुशिक्षण-संवादादिमाध्यमेन परिवारजन-वृद्ध-प्रतिवेशिभिः अन्यसामाजिकजनैश्च सह भारतीयज्ञानदिवसस्य आयोजनम् । व्याख्यानेषु शिक्षार्थि-संचालितानि भागग्राहिसत्राणि, विशेषज्ञानाम् अभ्यासकर्तॄणाञ्च (समकालिककविभिः भारतीयसाहित्यलेखकैश्च सह ललितकलाप्रदर्शनकलाभ्यासकर्तॄणाम्) अतिथिव्याख्यानानि समाविष्टानि भविष्यन्ति ।

- अनुशिक्षणेषु वृत्तचित्राणां चलचित्राणां च प्रदर्शनम्, ततश्च संवादः, केन्द्रितसमूहसंवादरूपेण (FGDS) शिक्षार्थिसंचालिताः चर्चाः, सुकरातीयचर्चाः चेत्यादयः । भारतीयवादपरम्परायाः बोधाय संवादानां वादानां वा आयोजनम्, शिक्षणस्य प्राचीनपद्धतीनां वर्तमाने प्रासङ्गिकतोपपत्ति-विचारः, दैनिकजीवने नैतिकदुविधाः अवगन्तुं निराकर्तुं च प्राचीननीतीनां मूल्यानां महत्त्वबोधाय सहकारिण्यः चर्चाश्च समाविष्टाः भविष्यन्ति ।

आकलनप्रक्रिया (Mode of Assessment) -

अधिगमाकलनस्य उपागमे अधोलिखिता बिन्दवः सम्मिलिताः भविष्यन्तिः –

उदाहरणार्थम् -

- नियतमूल्याङ्कनेन प्रतिकार्यप्रतिपुष्ट्या सहितं, नैकविधदृष्ट्या चितेषु विषयेषु छात्राध्यापकानां जिज्ञासायाः रुचेश्च समर्थनम्, येन ते बहुशास्त्रीयदृष्ट्या भारतीयज्ञानस्य निर्माणस्य विकासस्य च प्रक्रियाणां घटनानां रूपरेखां व्याख्यां च विधातुं समर्थाः स्युः।
- विभिन्नपरम्पराणां निर्माणे विकासे च प्रक्रियाणां घटनानां च समालोचनात्मकानुशीलनं स्वतन्त्रविचारांश्च प्रतिपादयितुं छात्राध्यापकानां सामर्थ्यस्य विकासः, येन तेभ्यः भारतस्य विभिन्नपरम्पराणाम् उपलब्धिषु सीमसु च भेदं कर्तुं मूल्याङ्कने सहायता स्यात्।

- प्रत्यक्षपरोक्षानुभवानां प्रयोगाः, यद्द्वारा छात्राध्यापकाः कक्षायां छात्रेषु भारतीयविचारेषु निहितां नैतिकाधारितां शिक्षां विकासयितुं स्पष्टीकर्तुं च क्षमाः स्युः।

सन्दर्भग्रन्थाः (Reference Books)

शिक्षार्थिनाम् अधिगमसामग्रीणाञ्च आवश्यकतानुसारं शिक्षकाः पुस्तकानि/ पठनसामग्रीञ्च सूचयितुमर्हन्ति।

5.4 भारतावबोधः (भारतीयज्ञानप्रणाली आचाराश्च) -

सत्रार्द्धम् - 2 **श्रेयोऽङ्काः - 2**

पाठ्यपरिचयः (About the course)

प्राविधिकनवाचारात् पर्यावरणपरिवर्तनवशात् च गतिशीलेऽस्मिन् विश्वे युवचेतसां निर्माणाय काचिद् अन्तर्दृष्टिः आवश्यकी। अस्मिन् परिवर्तनकाले अन्तर्दृष्ट्या मनुष्यः न केवलं समाजशास्त्रीयाम् आत्मीयतां प्राप्नोति, अपितु आध्यात्मिकबौद्धिकमूलानि अपि अवाप्नोति। पाठ्यक्रमोऽयं संस्कृति-नैतिकता-विज्ञान-गणित-तर्क-भाषाविज्ञान- दर्शनादिषु प्रमुखविषयेषु भारतीयन्यासस्य ज्ञानपरम्परायाश्च दृष्टिं प्रयच्छति। पाठ्यक्रमोऽयं भारतीयज्ञानपरम्पराणाम् अनुप्रयोगे विशिष्टं बलं प्रयच्छति, अपि च छात्रेभ्यः न केवलं भारतीयन्यासस्य ज्ञानपरम्परायाश्च ज्ञानाय अनुमोदनाय अपितु बहुविषयकदृष्ट्या स्वातन्त्र्येण मूल्याङ्कनं कर्तुं तेषां साहाय्यं विदधाति। एतन्मूल्याङ्कनं सङ्क्रमणीयानि एकविंशशतकसम्बद्धानि कौशलानि प्राप्तुं मूल्यवतः पाठान् प्रस्तोष्यति। एतत्पाठ्यक्रमाय पूर्वज्ञानस्य पूर्वाविबोधस्य च अपेक्षा न वर्तते । वर्षद्वयात्मकोऽयं पाठ्यक्रमः मूलभूतं ज्ञानं संस्थापयिष्यति तदाधारेण नवनिर्माणञ्च करिष्यति। पाठ्यक्रमोऽयं भारतीयपरम्परायाः सामान्यावबोधेन सह पूर्वतनवर्षेषु परम्परेयं कथं विकसिता चेत्यवबोधमपि छात्राणां विकासयिष्यति । पाठ्यक्रमोऽयं बहुविषयकदृष्ट्या भारतीयज्ञानस्य निर्माणस्य विकासस्य च प्रक्रियाणां घटनानां रूपरेखानिर्माणे व्याख्यासम्पादने, भारतस्य विविधपरम्पराणां मूल्याङ्कनाय तासाम् उपलब्धिपरिसीम्नोः भेदप्रकटने, कक्षायाः सन्दर्भे स्वीयच्छात्राणां भारतीयविचारेषु निहितायाः नैतिकताधारितशिक्षायाः विकासे स्पष्टीकरणे च सक्षमच्छात्राध्यापकानां निर्माणार्थं विरचितः।

अधिगमपरिणामाः (Learning Outcomes)

एतत्पाठ्यक्रमसमाप्तेः परं छात्राः -

- भारतस्य ज्ञानपरम्पराणां विशालनिधिम् अभिज्ञाय तद्विषयकगौरवभावप्रदर्शने समर्थाः भविष्यन्ति ।
- स्वार्जितानुसन्धानात्मककौशलम् आलोचनात्मकचिन्तनकौशलञ्च बहुविषयकविषयेषु अनुप्रयोक्तुं समर्थाः भविष्यन्ति ।
- विभिन्नभारतीयपरम्परापृष्ठभूमेः स्वीयच्छात्रान् सरलमाध्यमेन स्वकीयज्ञानं सारांशीकृत्य बोधयितुं समर्थाः भविष्यन्ति ।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	भारतावबोधः (भारतीयज्ञानप्रणाली आचाराश्च	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) – 1

भारतीयज्ञानपरिचयः

1. पूर्वसत्रार्द्धस्य परिभाषाणां परिचयस्य पुनःस्मारणम्।
2. पूर्वज्ञानस्य पुनःस्मारणम्।

पाठ्यांशः(Unit) – 2

दर्शनं नैतिकता मूल्यानि च - दार्शनिकसम्प्रदाया

1. वैशेषिकं न्यायः, साङ्ख्यं योगः, पूर्वमीमांसा, उत्तरमीमांसा (वेदान्तः) चेत्येषां सिद्धान्ताः प्रमुखविचारकाश्च, जैनबौद्धचार्वाकपरम्पराश्च।
2. वेदान्तः – दार्शनिकप्रणाल्यः (अद्वैतः विशिष्टाद्वैतः द्वैतश्च)
3. नैतिकता, सदाचारः सामाजिकद्वन्द्वः (आत्मनेतृत्वसहितः) चेत्येषां वर्तमाने प्रासङ्गिकता।
4. भारतीयाः आध्यात्मिकतायै कथं महत्त्वं यच्छन्ति। आध्यात्मिकता सामाजिकोत्तरदायित्वञ्च। वर्तमाने आध्यात्मिकतायाः महत्त्वम्।
5. प्राविधिकरूपेण अस्थिरजगति नैतिकतायाः उपयोगः – नैतिकम् आधुनिकञ्च जीवनयापनम्।
6. कल्याणार्थं व्यावहारिकवेदान्तः (सचेतनता, अन्तःसंयुक्तता, सामाजिकात्मसम्बन्धः चेति)

पाठ्यांशः(Unit) – 3

संस्कृतिः - जीवनपद्धतिः

1. भोजनम् (क्षेत्रीयव्यञ्जनानि, आयुर्वैदिकाहारः, भोजनं पर्वाणि च, शाकाहारः, भोजने जैनवादः, भोजनम् आतिथ्यं वैश्वीकरणञ्च)
2. वस्त्राणि (पारम्परिकभारतीयवस्त्राणि, वस्त्रकला, धार्मिकवेशभूषा, वस्त्राणां प्रतिष्ठा, लिङ्गं, वस्त्राणां वैश्वीकरणञ्च)
3. क्रीडाः (पारम्परिकभारतीयक्रीडाः, नियुद्धं, क्रीडा लिङ्गञ्च, क्रीडा वैश्वीकरणञ्च)
4. योगस्य जीवनपद्धतिः, प्राच्यजीवनपद्धतेः स्वीकरणम् – दीर्घायुषं प्रति मार्गः।

पाठ्यांशः(Unit) – 4

विज्ञानं प्रविधिश्च

1. अङ्कगणितं तर्कश्च
2. प्राकृतिकविज्ञानम् - गणितं भौतिकविज्ञानं धातुविज्ञानं रसायनविज्ञानञ्च।
3. खगोलविज्ञानम् - विश्वे भारतस्य योगदानम्।
4. समयस्य अन्तरिक्षस्य च विषये भारतीयधारणाः।
5. अर्थव्यवस्था-कृषि-परिवहनक्षेत्रादिषु प्रौद्योगिकी।

पाठ्यांशः(Unit) – 5

भाषाविज्ञानपरम्परा

1. भारते भाषाविज्ञानस्य इतिहासः - प्राचीनभारतीयभाषाविज्ञानं मौखिकपरम्पराणाम् अवधारणाश्चेति।
2. संस्कृतिरूपेण भाषा - वर्षेभ्यः भाषाणां विकासः, भाषा विभिन्नसंस्कृतिसमाजानां निर्माणखण्डत्वेन च ।
3. भाषा - अभिज्ञानं संस्कृतिः इतिहासश्च ।

प्रायोगिकम् (Practicum)

1. **पञ्चाङ्ग-दर्शनम् -** भारतीय-पञ्चाङ्गस्य साहाय्येन तिथि-ऋतु-नक्षत्राणां ज्ञानं तथा तेषां वैज्ञानिकाधारस्य चर्चा।
2. **पारम्परिक-क्रीडाः -** भारतीय-क्रीडानाम् आयोजनं तथा तेषां नियमानां ज्ञानम्।
3. **योग-प्राणायाम-अभ्यासः -** नित्यं योगाभ्यासस्य लाभानां विषये चर्चा तथा सरल-आसनानां प्रदर्शनम्।
4. **उत्सव-महिमा -** भारतीयोत्सवानां सांस्कृतिक-भौगोलिक-वैज्ञानिकाधाराणां विषये लघुरूपकम्।

प्रवचनप्रक्रिया (Mode of Transaction)-

- व्याख्यानेषु शिक्षार्थि-संचालितानि भागग्राहिसत्राणि, विशेषज्ञानाम् अभ्यासकर्तॄणाञ्च (समकालिककविभिः भारतीयसाहित्यलेखकैश्च सह ललितकलाप्रदर्शनकलाभ्यासकर्तॄणाम्) अतिथिव्याख्यानानि समाविष्टानि भविष्यन्ति ।
- अनुशिक्षणेषु वृत्तचित्राणां चलचित्राणां च प्रदर्शनम्, ततश्च संवादः, केन्द्रितसमूहसंवादरूपेण (FGDS) शिक्षार्थिसंचालिताः चर्चाः, सुकरातीयचर्चाः चेत्यादयः । भारतीयवादपरम्परायाः बोधाय संवादानां वादानां वा आयोजनम्, शिक्षणस्य प्राचीनपद्धतीनां वर्तमाने प्रासङ्गिकतोपपत्ति-विचारः, दैनिकजीवने नैतिकदुविधाः अवगन्तुं निराकर्तुं च प्राचीननीतीनां मूल्यानां महत्त्वबोधाय सहकारिण्यः चर्चाश्च समाविष्टाः भविष्यन्ति ।

आकलनप्रक्रिया (Mode of Assessment)

अधिगमाकलनस्य उपागमे अधोलिखिता बिन्दवः सम्मिलिताः भविष्यन्तिः –

उदाहरणार्थम् -

- नियतमूल्याङ्कनेन प्रतिकार्यप्रतिपुष्ट्या सहितं, नैकविधदृष्ट्या चितेषु विषयेषु छात्राध्यापकानां जिज्ञासायाः रुचेश्च समर्थनम्, येन ते बहुशास्त्रीयदृष्ट्या भारतीयज्ञानस्य निर्माणस्य विकासस्य च प्रक्रियाणां घटनानां रूपरेखां व्याख्यां च विधातुं समर्थाः स्युः।
- विभिन्नपरम्पराणां निर्माणे विकासे च प्रक्रियाणां घटनानां च समालोचनात्मकानुशीलनं स्वतन्त्रविचारांश्च प्रतिपादयितुं छात्राध्यापकानां सामर्थ्यस्य विकासः, येन तेभ्यः भारतस्य विभिन्नपरम्पराणाम् उपलब्धिषु सीमसु च भेदं कर्तुं मूल्याङ्कने सहायता स्यात्।
- प्रत्यक्षपरोक्षानुभवानां प्रयोगाः, यद्द्वारा छात्राध्यापकाः कक्षायां छात्रेषु भारतीयविचारेषु निहितां नैतिकाधारितां शिक्षां विकासयितुं स्पष्टीकर्तुं च क्षमाः स्युः।

सन्दर्भग्रन्थाः (Reference Books)

शिक्षार्थिनाम् अधिगमसामग्रीणाञ्च आवश्यकतानुसारं शिक्षकाः पुस्तकानि/ पठनसामग्रीञ्च सूचयितुमर्हन्ति।

5.5 शिक्षकः समाजश्च

सत्रार्द्धम् – 02 **श्रेयाङ्कः - 02**

पाठ्यपरिचयः (About the course)

युवकानां जीवनपोषणाय सकारात्मकदृष्ट्या अभिप्रेरणाय भाविजीवनाय च निस्सन्देहः शिक्षकाणां महत्त्वपूर्णभूमिका वर्तते । शिक्षकाणां निर्णायकभूमिकाविषये NEP 2020 इत्यत्र निगदितं यत् - शिक्षकाः अस्माकं बालानां भविष्यं निरूपयन्तीति। यतो हि बालाः अस्माकं राष्ट्रस्य भविष्यनिधयो वर्तन्ते। शिक्षकाणां समादरः करणीयः अपि च अध्यापनव्यवसायं प्रति उच्चमानसिकता निर्मातव्या, येन अध्यापनक्षेत्रे प्रवेशं कारयितुं सर्वोत्तमानाम् अभ्यर्थिनां कृते प्रेरणा भविष्यति। अस्माकं बालानां राष्ट्रस्य च उत्तमभविष्यस्य निर्माणे शिक्षकाणाम् अभिप्रेरणं सशक्तिकरणं च निश्चप्रचम् आवश्यकमस्ति। NEP Para 5.1 इत्यत्र परिचयात्मकखण्डे उक्तमस्ति यत् शिक्षकः शिक्षाप्रणाल्यां मौलिकसंशोधनानां केन्द्रे भवेत् अपि च समाजस्य सर्वाधिकमानितसदस्यत्वेन शिक्षकाणाम् पुनः प्रतिष्ठापने साहाय्यं करणीयम्, यतोहि ते अस्माकं भाविसन्ततेः विकासं सम्पादयन्ति।

शिक्षानीतिः शिक्षकान् सशक्तान् कर्तुं स्वीयकार्याणि यथासम्भवं प्रभाविरूपेण च सम्पादयितुञ्च सर्वविधं साहाय्यं कर्तुमपि बलं प्रयच्छति। इदं मन्यते यद् जीवनस्य सर्वाधिकप्रभावशालिवर्षेषु बालकैः सह कार्यकरणे तेषां विचारचिन्तनादिपरिष्करणे वैयक्तिक-सामाजिक-लक्ष्याणाञ्च विषये समाजस्य जीवनस्य च विषये विचारनिर्माणस्य अवसरं मातृभ्यः परं द्वितीयस्थाने शिक्षकाः प्राप्नुवन्ति, ये च व्यक्तेः समाजस्य चोभयोः विकासे अमूल्यं योगदानं विदधति ।

शिक्षकः समाजश्च इत्यस्य पाठ्यक्रमस्य केन्द्रबिन्दौ अवबोधात्मकविकासः-

1. उदयमानभारतीयसमाजे मानव-संस्कृति-संसाधनानां वैश्विकप्रवाहस्य सन्दर्भे शिक्षकस्य परिवर्तितभूमिका।
2. व्यवस्थितसमाजस्य निर्माणं प्रद्यौगिक्याः अनुप्रयोगश्च ।
3. शैक्षिकदृष्ट्या मानवसम्बद्धदृष्ट्या सामाजिकमानकदृष्ट्या च शिक्षकस्य भूमिका।
4. भविष्यस्य वास्तविकतायाः, अस्थिरतायाः, अनिश्चिततायाः, जटिलतायाः, अस्पष्टतायाः च परिवर्तनपरिस्थितौ वर्तमानसमये जगतः कृते शिक्षकाणाम् भूमिका।
5. अनेन पाठ्यक्रमेण छात्रशिक्षकाः शिक्षकाणां सांस्कृतिक-आचार-परम्परा-वैविध्यारितसमाजस्य भूमिकां दायित्वं च अवगन्तुं समर्थाः भवन्ति।
6. भारतस्य भावं गौरवं सांस्कृतिकपरम्परानिधिं च सम्प्राप्तुं, राष्ट्रैक्यभावपोषणार्थं छात्रशिक्षकाः दायित्वनिर्वाहकरूपेण ज्ञान-क्षमता-मूल्यादिषु सुसज्जिताः भवेयुः।
7. छात्रशिक्षकाः स्वस्य उत्तरदायित्वम् अवगच्छेयुः।
8. भविष्यस्य वंशपरम्परायाः निर्माणं कुर्युः ये खलु जागरितनागरिकरूपेण स्वोत्तरदायित्वम् अवगन्तुं समर्थाः स्युः।
9. राष्ट्रियसंसाधनानां संरक्षणाय भारतस्य अभिवृद्धये च सक्रियभूमिकां सम्पादयेयुः।
10. विविध-सांस्कृतिक-भाषागत-सामाजिक-आर्थिकपृष्ठभूमेः छात्राणाम् आवश्यकता-लैंगिक-संवेदनशीलता-सहिष्णुतानां विषये अवधानम्।
11. अधिगमाक्षमच्छात्राः नवशिक्षापद्धतीनां प्रौद्योगिकविषयाणाम् अधिगमं कुर्युः।
12. ज्ञानस्य अभ्यासस्य च उन्नतये वर्तमानशैक्षिकविकासेन उपक्रमेण च सह व्यस्ताः भवेयुः।

13. सामाजिकसंरचना-ऐतिहासिकरीति-विश्वास-मूल्य-प्रतिबद्धता-संस्कृति-नैतिकतादीनां विषयेषु छात्रशिक्षकाणाम् अभिज्ञानम्।
14. शिक्षाविकासेन समुदायेन च सह शिक्षकाणां सम्बन्धविषये अभिज्ञानम्।

अधिगमपरिणामाः (Learning Outcomes)

पाठ्यक्रमस्य समाप्तेः अनन्तरं छात्रशिक्षकाः -

1. शिक्षकमान्यता-मूल्य-चरित्र-जीवनेतिहास-सामाजिक-सांस्कृतिकसन्दर्भ-समीक्षात्मकरूपेण अध्यापनादिविषयेषु परीक्षणं कर्तुं समर्थाः भविष्यन्ति।
2. आकर्षक-संचारक-चिन्तनात्मक-अभ्यासशिक्षकाः भविष्यन्ति।
3. विद्यालयस्य समाजस्य च स्वरूपनिर्माणे शिक्षकभूमिकायाः विषये ज्ञास्यन्ति।
4. सकारात्मककक्षाकक्षविकासस्य क्षमतां प्रदर्शयितुं समर्थाः भविष्यन्ति।
5. शिक्षकाधिगमयोः उन्नतये समीक्षात्मकरूपेण चिन्तयितुं क्षमतां सम्पादयिष्यन्ति।
6. शिक्षकसंस्थायाः सन्दर्भे संरचनात्मकायामान् अवधारणात्मकायामांश्च ज्ञास्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	शिक्षकः समाजश्च	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) - 1
शिक्षकावबोधः - वैयक्तिकव्यावसायिकयोः च अभिज्ञानम्

1. व्यापकवैयक्तिकविषये सामान्यसामाजिकसन्दर्भे च शिक्षकाभिज्ञानम् (जीवनेतिहास- शिक्षकविश्वास-मूल्य-आकाङ्क्षा-सामाजिकसन्दर्भे विविधपरिचय-शिक्षण-शिक्षा-प्रतिबद्धतादिविषयेषु)
2. व्यावसायिकशिक्षकाभिज्ञानम् - योग्यता, शिक्षणे शिक्षा, अभिवृत्तिः, अभिक्षमता, अनुभवश्च।
3. आकर्षकव्यक्तित्वयुक्तः शिक्षकः, सम्प्रेषणात्मकशिक्षकः, प्रचारकरूपेण शिक्षकः, क्षमतावान् अभ्यासकः, चिन्तनशीलः अभ्यासकः, अधिगमक्षमशिक्षकः।

पाठ्यांशः(Unit) - 2
शिक्षकपोषणम् – जीवनाय भाविजीवनाय च पाठ्यक्रमलक्ष्यभिन्नः कश्चन संवादः

1. अध्यापनम् - एकः व्यवसायः अनेकाः भूमिकाः च।
2. अध्यापनचरित्रम् - मानवस्य समृद्ध्यर्थं शिक्षकाणां निर्माणम्।
3. समग्रशिक्षकविकासः- पञ्चकोशानां पोषणम्।
4. अध्यापनमूल्यानि, विश्वासाः वर्तमानशिक्षणदर्शनं च - एकः चिन्तनशीलः संवादः।
5. शिक्षकशिक्षायां नैतिकतायाः विकासः।

पाठ्यांशः(Unit) - 3

शिक्षकसंस्थावबोधः

1. शिक्षकसंस्था - का अस्ति ? किमर्थं महत्त्वपूर्णा ?
2. शिक्षकसंस्थायाः वैयक्तिक-सांस्कृतिक-संरचनात्मकायामाः।
3. अध्यापकप्रवचनं, दर्शनं, सम्बन्धः, अन्तर्जालः व्यवसायिकविकासश्च।
4. शिक्षकसंस्थाया उपहुतयः - शैक्षणिकाभ्युपगमः, प्रणालीगतोदासीनता, नीतिः अभ्यासश्च।
5. शैक्षिकनीतौ, अभ्यासे पुनःसंस्थापने च शिक्षकस्य भूमिका।

पाठ्यांशः(Unit) - 4

शिक्षकः नवभारतस्य भाविसमाजस्य च वास्तुकारः

1. समालोचनात्मकशिक्षायां संलग्नता - लैङ्गिक-जातीयता-संस्कृति-दिव्याङ्गता-वर्ग-दरिद्रता- अहितानां च पुनरूत्पादनं साक्षात्करणं चेत्यादिविषयेषु स्वस्थसंवादः।
2. समालोचनात्मकः शिक्षकः - द्रुतगत्या विकसितप्रौद्योगिक्याः विषये विज्ञाय चर्चा करणीया।
3. अनौपचारिकशिक्षायां पारिवारिक-सामाजिक-मानसिक-स्वास्थ्य-राज्य- व्यापारादि परिवर्तनशीलसम्बद्धानां प्रभावः।

प्रायोगिकम् (Practicum)

1. **साक्षात्कारः** - छात्राः कस्यचित् शिक्षकस्य जीवनेतिहासविषये साक्षात्कारं गृह्णीयुः।
2. **भूमिका-निर्वहणम्** - समाज-निर्मातृरूपेण शिक्षकस्य विविध-भूमिकानाम् अभिनयः।
3. **नैतिक-मूल्य-चर्चा** - शिक्षणे नैतिकतायाः महत्त्वं प्रति लघु-संवादः।
4. **भित्तिचित्र-निर्माणम्** - "नवभारतस्य वास्तुकारः शिक्षकः" इति विषये रचनात्मक-चित्रनिर्माणम्।
5. **प्रौद्योगिकी-संवादः** - शिक्षायाम् आधुनिक-प्रौद्योगिक्याः उपयोगविषये कक्षायां चर्चा।
6. **आदर्श-शाला-कल्पना** - सामाजिक-समानतायुक्तायाः आदर्श-पाठशालायाः प्रारूप-निर्माणम्।
7. **कथा-वाचनम्** - केषाञ्चित् श्रेष्ठशिक्षकाणां प्रेरक-प्रसङ्गानां श्रावणम्।
8. **सङ्कल्प-पत्रम्** - **'समाजं प्रति मम दायित्वम्'** इति विषये एकं संकल्प-पत्रं लेखनम्।

परामर्शस्य विनिमयः

- शिक्षकाः अनेन पाठ्यक्रमेण शिक्षकाणाम् आदर्शभूमिकायाः विषये पुनर्विचारं करिष्यन्ति।
- अयं पाठ्यक्रमः क्रियाशीलेन व्यापकशैक्षिकलक्ष्यं सम्प्राप्तुं शिक्षकान् प्रेरयति।
- अतः कक्षायां व्याख्यासु संगोष्ठी-चिन्तनाभ्यास-आलोचनात्मकचिन्तन-समूहकार्यादीनां प्रयोगो भविष्यति।
- छात्रशिक्षकः सेवापूर्वप्रशिक्षणकाले अभ्यास-ज्ञान-कौशलादिविषये विचारं कृत्वा पाठ्यक्रमे निहिततत्त्वानि अवबुध्य च विद्यालये प्रयोगं कर्तुं ज्ञास्यति।

आकलनप्रक्रिया (Mode of Assessment)

अयं पाठ्यक्रमः उत्तमः अतः मूल्याङ्कने व्यापकदृष्ट्या आलोचनात्मकचिन्तनस्य समावेशो भविष्यति।

- स्वविचारदृष्ट्या दर्शनाधारितवर्तमानशिक्षणविषये लेखनम् ।

- ख. सामाजिकसन्दर्भेषु कस्यचिद् एकस्य क्षेत्रस्य विवरणलेखनम् । (पर्यावरणस्य क्षयः, महिलानाम् अपराधः, साइबरक्राइम्-लैङ्गिक-जातीयता-संस्कृति-दिव्याङ्गजन-वर्गादिविषयेषु)

सन्दर्भग्रन्थाः (Reference Books)

प्रशिक्षकः छात्रशिक्षकान् आवश्यकतानुसारं सन्दर्भग्रन्थं पठितुं प्रेरयति।

5.6 शिक्षायां सूचनासम्प्रेषणप्रौद्योगिकी (ICT)

सत्रार्धः -5 **श्रेयोऽङ्कः- 2**

पाठ्यपरिचयः (About the course)

अयं पाठ्यक्रमः छात्राध्यापकान् सङ्गणकसाक्षरतायां सूचनासम्प्रेषणप्रौद्योगिकी-सहायकाधिगमे अग्रे गन्तुं, शैक्षिकलक्ष्याणां सिद्धान्तानां च अनुरूपं सूचनासम्प्रेषणप्रविधीनां व्याख्यानञ्च कर्तुं शक्तं करोति। एतत्पत्रं शिक्षायां सूचनाप्रौद्योगिकी-विज्ञानस्य आवश्यकतायाः महत्त्वस्य च विषये छात्राध्यापकान् उन्मुखीकरोति। एतत् शिक्षायां मुक्तस्रोतमृदुतन्त्रांशस्य महत्त्वं वर्णयति। अयं पाठ्यक्रमः छात्राध्यापकाय शिक्षायां सूचनासम्प्रेषणप्रविधेः उपयोगस्य विविध-दृष्टिकोणानां, चरणानां च परिचयं ददाति। छात्राध्यापकाः विविधसङ्गणकमृदुतन्त्रांशानां, सूचनासम्प्रेषणप्रौद्योगिक्याः साधनानाञ्च यथोचितरूपेण विकासयितुं क्षमा भवेयुः।

अधिगमपरिणामाः (Learning Outcomes)

अस्य पाठ्यक्रमस्य समाप्तेरनन्तरं छात्राध्यापकाः :

- शिक्षायां सूचनाप्रौद्योगिक्याः संकल्पनां प्रकृतिं व्याप्तिञ्च व्याख्यातुं शक्नुवन्ति।
- शिक्षायां मुक्तस्रोतमृदुतन्त्रांशस्य महत्त्वं वर्णयितुं प्रभवन्ति।
- शिक्षायां सूचनासम्प्रेषणप्रौद्योगिक्याः अनुमोदनस्य उपयोगस्य च विविध-दृष्टिकोणानां सूचीकरणं व्याख्यानं च कर्तुं प्रभवन्ति।
- शिक्षायां विभिन्न- उदीयमानप्रौद्योगिकीनां महत्त्वस्य वर्णनं कर्तुं प्रभवन्ति।
- सूचनासम्प्रेषणप्रौद्योगिकीप्रयोगेण सह सम्बद्धानां सामाजिक-आर्थिक-नैतिक-विषयाणां मध्ये सम्बन्धं ज्ञास्यन्ति।
- भारते शैक्षिकप्रौद्योगिक्याः उपहृतीः सूचयितुं शक्नुवन्ति।
- शिक्षण-अध्ययन-मूल्याङ्कनप्रक्रियाणां परिष्कारार्थं विविधप्रौद्योगिकीसाधनान् उपयोक्तुं शक्नुवन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	शिक्षायां सूचनासम्प्रेषणप्रौद्योगिकी (ICT)	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) – 1

शिक्षायां सूचनासम्प्रेषणप्रौद्योगिक्याः (ICT) परिचयः

1. सूचनाप्रौद्योगिकी, सम्प्रेषणप्रौद्योगिकी एवं सूचनासम्प्रेषणप्रौद्योगिकी तथा निर्देशात्मकप्रौद्योगिकी इत्येतेषाम् अर्थः प्रकृतिः महत्त्वञ्च।

2. शिक्षायां शैक्षिकप्रौद्योगिकी तथा सूचनासम्प्रेषणप्रौद्योगिकी (अन्तरम्, सूचनासम्प्रेषणप्रौद्योगिक्याः क्षेत्रम्-शिक्षणम् अधिगमः अनुसन्धानम् एवं प्रकाशनम् शैक्षिकप्रशासनम् एवं आकलनम्)
3. प्रौद्योगिकी तथा सम्पृक्तता: अन्तर्जालः तथा सद्यस्क(online) माध्यमेन सहकारि-अधिगमः समूहदत्तकार्यं & सब्रह्मचारिसमीक्षा,
4. निर्देशात्मकनिर्माणे प्रणालीदृष्टिकोणस्य अर्थः उपयोगश्च, .
5. अनुदेशनाभिकल्पविकासस्य प्रतिमानानि (ADDIE, ASSURE, Dick and Carey Model Mason's),
6. फ्लेन्डर महोदयस्य अन्तःक्रियाविश्लेषणश्रेणीप्रणाली (FIACS), 1999।
7. शैक्षिकप्रौद्योगिक्याः सम्बद्धाः उपहूतयः।

पाठ्यांशः(Unit) – 2

शिक्षायाम् उदयमानाः प्रौद्योगिक्यः

1. वै-अधिगमस्य अवधारणा, पद्धतयः, तथा च माध्यमाः (LMS, आभासीयविश्वविद्यालयाः, MOOCs, भारतीय MOOCs, MOOCs प्रकाराः, cMOOCs, xMOOCs & LMOOCs)।
2. मुक्तशिक्षासंसाधनानि (क्रिएटिव कॉमन्स इत्यस्य अवधारणा अनुप्रयोगश्च)।
3. संवर्धितवास्तविकता(Augmented reality), आभासीयवास्तविकता (Virtual reality), कृत्रिमबुध्दिः(Artificial Intelligence), मिश्रितवास्तविकता (Mixed Reality) & शिक्षायां वै-क्रीडाकरणम्(Gamification in education) (अर्थः, इतिहासः, महत्त्वम्, साधनानि तथा उपयोगाः)।
4. Cloud Computing & Internet of Things - अर्थः, महत्त्वं, उपयोगश्च।
5. सूचनासम्प्रेषणप्रौद्योगिक्यं नैतिकविषयाः सुरक्षा च- (शिक्षणम्, अधिगमः तथा अनुसन्धानं, साइबर-उत्पीडनम्, साइबर-सुरक्षासाक्षरता & प्रदत्त-संरक्षणम्, ऑनलाइन-परिचयः गोपनीयता च)।

पाठ्यांशः(Unit) – 3

शिक्षण-अध्ययन- मूल्याङ्कनेषु सूचनासम्प्रेषणप्रौद्योगिकी

1. शिक्षणाधिगमे सूचनासम्प्रेषणप्रौद्योगिक्याः एकीकरणस्य अवधारणा उपागमाश्च: प्रौद्योगिकी-शिक्षण-सामग्री-ज्ञानम् (TPCK), प्रौद्योगिकी-एकीकरण-आव्यूहः (TIM)।
2. शैक्षिकसूचनासम्प्रेषणप्रौद्योगिक्यां शिक्षणसिद्धान्तानां निहितार्थः व्यवहारवादः, संज्ञानात्मकतावादः तथा रचनात्मकतावादः।
3. Geogebra, PhET, Stellarium, Open Street Map, Marble, Turtle Art, Mind mapping इत्यादि प्रौद्योगिकीसाधनानाम् उपयोगाय कार्यात्मककौशलस्य विकासः।
4. सूचनासम्प्रेषणप्रौद्योगिकी तथा मूल्याङ्कनम्- विद्युतीयमूल्यङ्कनविभागः(Electronic assessment portfolio) – अवधारणा तथा प्रकाराः; वै-विभागः(e-portfolio) साधनानि।
5. आभासीय तथा प्रत्यक्षशिक्षा मूल्याङ्कनसाधनानि – रूब्रिक्स, सर्वेक्षणसाधनानि, प्रहेलिकानिर्मातारः, परीक्षोत्पादकाः, चिंतनात्मकपत्रिकाः, प्रश्नागारम्।
6. सततव्यापकमूल्याङ्कने (CCE) सूचनासम्प्रेषणप्रौद्योगिक्याः अनुप्रयोगाः।

प्रायोगिकम् (Practicum)

1. **सङ्गणक-घटकानां परिचयः कार्यप्रणाली च** - छात्राः सङ्गणकस्य यन्त्रांशानां (CPU, RAM, I/O devices) सूच्याः निर्माणं कुर्वन्ति। ते Operating System इत्यस्य कार्याणि, यथा सञ्चिका-प्रबन्धनं (File Management) तथा च सञ्चिकानां नामकरणं, नूतन-सञ्चिका(फोल्डर)-निर्माणं च 'Windows' अथवा 'Linux' मध्ये अभ्यस्यन्ति।
2. **यूनिकोड-देवनागरी-टङ्कणम् (Unicode Typing)** - छात्राः सङ्गणके Hindi Inscript कीबोर्ड-लेआउट् 'Enable' कर्तुं शिक्षन्ते। MS Word मध्ये यूनिकोड-माध्यमेन सरल-संस्कृत-वाक्यानां श्लोकानां च टङ्कण-अभ्यासं कुर्वन्ति, येन तेषां डिजिटल-लेखन-कौशलं वर्धते।
3. **एक्सेल-मध्ये दत्तांश-विश्लेषणम् (Spreadsheets) -** MS Excel उपयुज्य छात्राः स्वकक्षायाः अङ्क-सारणीं (Mark sheet) निर्मान्ति। ते गणितीय-सूत्राणां (यथा- SUM, AVERAGE) प्रयोगं कृत्वा अङ्कानां गणनां कुर्वन्ति तथा च 'Sort and Filter' माध्यमेन दत्तांशस्य क्रमबद्धीकरणं कुर्वन्ति।
4. **कृत्रिमबुद्धिः (AI) तथा भाषा-संसाधनम् (NLP)** - छात्राः START (Sanskrit Teaching, Annotation, and Research Tool) सदृश-उपकरणानां प्रयोगं कुर्वन्ति। एतत् उपकरणं Machine Learning (ML) तथा Natural Language Processing (NLP) आधारेण संस्कृत-वाक्यानां पद-परिचयं व्याकरण-विश्लेषणं च करोति, यत् AI-क्षेत्रस्य व्यावहारिकम् उदाहरणम् अस्ति।
5. **प्रभावी दृश्य-प्रस्तुतिः (PowerPoint & Multimedia)** - PowerPoint माध्यमेन छात्राः 'मम विद्यालयः' अथवा 'भारतीय-संस्कृतिः' इति विषये स्लाइड्स-निर्माणं कुर्वन्ति। ते स्लाइड्स-मध्ये Animations, Transitions, तथा च ध्वनि-चित्र-चलचित्राणां (Audio, Video) प्रयोगं कृत्वा प्रस्तुतिं रुचिपूर्णं कुर्वन्ति।
6. **डिजिटल-शब्दकोशः ई-ग्रन्थ-अन्वेषणं च (Research Tools)** - छात्राः अन्तर्जाल-माध्यमेन GRETIL सदृश-ई-पुस्तकालयेभ्यः श्लोकानां शोधं कुर्वन्ति। ते Cologne Digital Sanskrit Lexicons उपयुज्य कठिनशब्दानां मूल-धातुं प्रत्ययं च अन्विषन्ति, यत् आधुनिक-शोध-पद्धतेः भागः अस्ति।
7. **प्रलेख-प्रारूपणं सारणी-निर्माणं च (Advanced Word Processing) -** MS Word मध्ये छात्राः 'Tables' निर्माय शब्दरूपाणां धातुरूपाणां च व्यवस्थापनं कुर्वन्ति। ते Headers, Footers, 'Page Layout' तथा च चित्राणां (Images) संयोजनेन व्यावसायिक-प्रलेखान् (Professional Documents) सज्जीकुर्वन्ति।
8. **दृश्य-प्रतिरूपणम् आभासीय-वास्तविकता च (Visual Modeling & VR)** - छात्राः START उपकरणे विद्यमानानां Dependency Trees (कारक-सम्बन्ध-वृक्षाः) इत्येतेषां निरीक्षणं कुर्वन्ति। एतेषां वर्णात्मक-चित्राणां साहाय्येन छात्राः भाषायाः जटिल-संरचनानां त्रिविमीय (3D/Virtual) अवबोधस्य प्रारम्भिकं ज्ञानं प्राप्नुवन्ति, यत् भविष्ये Virtual Reality (VR) शिक्षणस्य आधारः भवति

प्रवचनप्रक्रिया (Mode of Transaction) -

शिक्षाशास्त्रे सूचनासम्प्रेषणप्रौद्योगिकी(ICT) पाठ्यक्रमः छात्राध्यापकानां कृते शिक्षण-अध्ययन-मूल्यांकन-प्रक्रियासु प्रौद्योगिक्याः परिचयः तथा समीचीनोपयोगश्च कथं करणीयः इति सम्यक् ज्ञापनीयमस्ति। अयं पाठ्यक्रमः सैद्धान्तिकज्ञानस्य व्यावहारिककौशलस्य च मध्ये सन्तुलनं स्थापयेत् । पाठ्यक्रमादानप्रदानव्यवहारः निम्नलिखितवत् भवितुं शक्यते।

- सक्रियाधिगमः छात्राध्यापकान् चर्चासु, मस्तिष्कोद्वेल्लने, समस्यानिवारणक्रियाकलापेषु च भागं ग्रहीतुं प्रोत्साहयति येन तेषां समीक्षात्मकचिन्तनस्य समस्यानिवारणकौशलस्य च विकासे सहायकं भवति।
- सहकारि-अधिगमः छात्राध्यापकान् समूहपरियोजनाकार्यसाहाय्येन सहकारिरूपेण कार्यं कर्तुं परस्परं शिक्षितुं च प्रोत्साहयति।
- अनुभवात्मक-अधिगमः यत्र हस्तगतक्रियाकलापाः, क्षेत्रयात्राः, वास्तविकजीवनस्य परिस्थितयः च सन्ति, येन छात्राध्यापकाः स्वज्ञानं कौशलं च व्यावहारिकपरिवेशे प्रयोक्तुम् अवसरं दास्यन्ति।
- बहुमाध्यमसाधनानाम् उपयोगः, यथा विडियो, अन्तःक्रियानुरूपं, जीवन्तता (animation) च यद् आकर्षरूपेण अधिगमं वर्धयेत।
- स्वनिर्देशिताः स्वप्रबन्धिताः च शिक्षणक्रियाकलापाः ये छात्राध्यापकान् स्वतन्त्रसंशोधनस्य, आत्मचिन्तनस्य, आत्ममूल्याङ्कनस्य च माध्यमेन स्वाध्यायप्रक्रियां कर्तुं प्रोत्साहयन्ति येन छात्राध्यापकाः आजीवनं शिक्षणं प्रवर्धयितुं शक्नुवन्ति।

आकलनप्रक्रिया (Mode of Assessment)

शिक्षायां सूचनासम्प्रेषणप्रौद्योगिकी पाठ्यक्रमस्य मूल्याङ्कने छात्राणां ज्ञानस्य क्षमतायाः शिक्षायां प्रौद्योगिक्याः उपयोग प्रति छात्राध्यापकानां दृष्टिकोणस्य च मूल्याङ्कनं करणीयम्। अस्य पत्रस्याकलनप्रक्रिया निम्नलिखितास्ति-

- परियोजना-आधारित-आकलनम्।
- सब्रह्मचारि-आकलनम्
- चिन्तनात्मकपत्रिकाणां निर्वहणम् ।
- आभासीयप्रहेलिकापरीक्षाः।
- कक्षागतिविधिषु छात्राध्यापकानां सूचनासम्प्रेषणप्रौद्योगिकी साधनानामुपयोगस्य प्रत्यक्षाप्रत्यक्षावलोकनम्।

सन्दर्भग्रन्थाः (Reference Books)

- Gourav Mahajan., शिक्षा में सूचना तथा संप्रेषण तकनीकी, Vishal Publications
- SWAYAM, ICT in Teaching and Learning. https://onlinecourses.swayam2.ac.in/ntr22_ed34/preview
- Kritika Gosain., Rinkal Sharma, Sarita Verma, Rajeswary Nair, K. Suresh Kumar., ICT in Education, Redshine Publication
- Savita Rawat., Suresh Chandra Pachauri., Role of ICT in Education, ABS Books.
- A. Ramakrishna., T. Mrunalini., Information & Communication Technology (ICT) In Education, Neelkamal Publications
- UNESCO's ICT Competency Framework for Teachers http:/unesdoc.unesco.org/ark:/48223/pf0000213821

5.7 गणितीय-मात्रात्मकतर्का:

सत्रार्द्धम् -6 **क्रेडिट - 2**

पाठ्यपरिचयः (About the course)

पाठ्यक्रमेऽस्मिन् छात्रशिक्षकाः मूलभूतगणितीय-परिमाणात्मकतर्कैः, तत्प्रयोगैश्च परिचिताः भविष्यन्ति। छात्रशिक्षकाः परिमाणात्मकदत्तांशानां विश्लेषणस्य, व्याख्यायाः, संप्रेषणस्य च आवश्यकं ज्ञानं क्षमतां च प्राप्नेयुरिति धिया अयं पाठ्यक्रमः रचितो विद्यते। छात्रशिक्षकाः दत्तांशानां समीक्षात्मकचिन्तयितुं समर्थाः भविष्यन्ति, तथा च वास्तविकजीवनस्य समस्यानां समाधानार्थं परिमाणात्मकतर्काणाम् उपयोगं करिष्यन्ति।

अधिगमपरिणामाः (Learning Outcomes)

अस्य पाठ्यक्रमस्य समाप्तेः अनन्तरं छात्रशिक्षकाः -

- वास्तविकजगति समस्यासमाधानार्थं गणितीयतर्कचिन्तनाय, अस्मिन् क्षेत्रे केषाञ्चन मौलिकविचाराणां सिद्धान्तानां व्याख्यायै च समर्थाः भविष्यन्ति।
- परिमाणात्मकदत्तांशानां विश्लेषणं व्याख्याञ्च कर्तुं समर्थाः भविष्यन्ति।
- सूत्र-आलेख-सारण्यादिभ्यः संख्यात्मकप्रदत्तेभ्यः समीचीननिष्कर्षाणां निरूपणाय समर्थाः भविष्यन्ति।
- गणितीय-मात्रात्मकतर्कविधीनाम् उपयोगेन आलोचनात्मकचिन्तनस्य समस्यासमाधानकौशलस्य च प्रदर्शयितुं समर्थाः भविष्यन्ति।
- परिचालनमात्रिकायाः मूल्याङ्कनाय समर्थाः भविष्यन्ति।
- शैक्षिकदत्तांशानां विश्लेषणाय, शैक्षिकप्रतिरूपनिर्माणाय च, एवञ्च एतेषां निर्णयात्मकचिन्तने समर्थाः भविष्यन्ति।
- गणितीय-मात्रात्मकतर्कसमस्यानां समाधानानाञ्च विश्लेषणं मूल्याङ्कनं च कर्तुं समर्थाः भविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	गणितीय-मात्रात्मकतर्काः	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) - 1

गणितीय-परिमाणात्मकतर्काणां परिचयः

1. गणितीय-मात्रात्मकतर्कस्य अर्थः, प्रकृतिः, व्याप्तिः च।
2. विभिन्नक्षेत्रेषु गणितीयमात्रात्मकतर्कस्य महत्त्वम्।
3. मात्रात्मकतर्काणां प्रकाराः।
4. गणितीय-मात्रात्मकतर्काणां प्रयोगः।

5. गणितीकरणस्य अवधारणा।

पाठ्यांशः(Unit) - 2

शिक्षायां दत्तांशस्य परिचयः

1. दत्तांशानाम् आवश्यकता, दत्तांशनां भिन्नानि स्रोतांसि।
2. विद्यालयनामाङ्कनम् - सकलनामाङ्कनानुपातम्, शुद्धनामाङ्कनानुपातम्, शैक्षिकप्रगतिः:, शालात्यागवृत्तिः, साक्षरता, साक्षरतामापकानि।
3. भारतीयजनगणना, भारतीयजनगणनायाः प्रदत्तासंग्रहणस्य विषये विभिन्नांशां विवरणम्।
4. राष्ट्रव्यापिप्रतिदर्शसर्वेक्षणम्, राष्ट्रियपरिवार-स्वास्थ्यसर्वेक्षणम्, जनपदस्तरीयं गृहसर्वेक्षणम्, UDISE।

पाठ्यांशः(Unit) - 3

दत्तांशविश्लेषणं व्याख्या च

1. दत्तांशव्याख्यायाः अवधारणा (समीकरणम्, आरेखः, रेखाचित्रम्, सारणी च)
2. शैक्षिकसन्दर्भे प्रदत्तानां सांख्यिकीयविश्लेषणं, तदनुप्रयोगाः च (केन्द्रीयप्रवृत्तेः मापाः, परिवर्तनशीलतायाः मापाः, प्रतिशतम्)
3. दत्तांशानां दृश्य-संख्यात्मकं प्रदर्शनम्, तदनुप्रयोगाश्च (बार-आरेखाः, हिस्टोग्राम-पाईचार्ट चेत्यादीनाम् अनुप्रयोगः)
4. अधिगमविश्लेषणम् - अवधारणा, महत्त्वं, प्रकाराः, स्तराः, शैक्षिकसन्दर्भे तस्य अनुप्रयोगाः च।

प्रायोगिकम् (Practicum)

1. **दत्तांश-सङ्कलनं विश्लेषणं च -** छात्राः स्वकक्षायाः छात्राणां भारं (Weight) मापित्वा **MS Excel** मध्ये सारणीं निर्मान्ति, तस्य मध्यमाङ्कं (औसतं Average) च गणयन्ति।
2. **आलेख-निर्माणम् -** विगतानां पञ्चवर्षाणां वर्षा-दत्तांशं प्राप्य **Charts** (Bar/Pie) माध्यमेन तस्य तुलनात्मकम् अध्ययनं कुर्वन्ति।
3. **जटिल-समस्या-समाधानम् -** दैनन्दिन-जीवनस्य समस्याः (यथा- आपणिक-व्ययः, लाभ-हानिः च) निवारयितुं **Excel Formulas** इत्यस्य प्रयोगः।
4. **तर्क-क्रीडा (Sudoku) -** आलोचनात्मक-चिन्तनस्य विकासाय गणितीय-कोष्टकानां (Logical Puzzles) समाधानं कुर्वन्ति।
5. **प्रतिरूप-निर्माणम् (Modeling) -** विद्यालयस्य विद्युत्-व्ययस्य विश्लेषणं कृत्वा आगामि-मासस्य कृते न्यून-व्ययस्य योजनां (Budget) निर्मान्ति।
6. **संख्यात्मक-निष्कर्षः -** विविध-क्रीडानां स्कोर-बोर्ड् (Scoreboard) दृष्ट्वा श्रेष्ठ-क्रीडकस्य चयनार्थं तर्कपूर्णं निर्णयं गृह्णन्ति।
7. **वैदिक-गणित-प्रयोगः -** शीघ्र-गणनाय 'एकाधिकेन पूर्वेण' सदृश-सूत्राणां प्रयोगं कृत्वा परिणामस्य सत्यतां परीक्षन्ते।
8. **क्षेत्रमिति-मापनम् -** विद्यालय-प्राङ्गणस्य मापनं कृत्वा तस्य क्षेत्रफलस्य परिमितेः च गणनां **MS Word** मध्ये लेखिष्यन्ति।

प्रवचनप्रक्रिया (Mode of Transaction) -

पाठ्यक्रमव्यवहारस्य दृष्टयः छात्राणां विश्लेषणात्मक-समीक्षात्मकचिन्तनकौशलानि विकाससितुं, यथार्थजीवनपरिस्थितिषु गणितीय-मात्रात्मकतर्कान् प्रयोक्तुं छात्राणां क्षमताः केन्द्रीकुर्वन्ति। पाठ्यक्रमव्यवहारस्य कासुचित् दृष्टिषु निम्नलिखिताः अंशाः अन्तर्भवन्ति -

- सक्रियाधिगमः यः समस्यासमाधानस्थितौ, समूहचर्चासु, हस्तगतक्रियाकलापेषु च छात्रशिक्षकाणां सक्रियसहभागितया विद्यते। छात्रशिक्षकाः सामग्रीसंग्रहणाय, समस्यासमाधानार्थं गणितीयचिन्तन-तर्कप्रयोगाय च समर्थाः भवन्ति।
- गणितीयावधारणानां व्यावहारिकानुप्रयोगानां प्रदर्शनार्थं, यथार्थजगतः उदाहरणोपयोगानाम् एकत्रीकरणार्थं च ये यथार्थविश्वानुप्रयोगाः शिक्षणीयाः भवन्ति, ते छात्रशिक्षकेभ्यः प्रासङ्गिकतानुभवाय, विभिन्नक्षेत्रेषु एतत्प्रयोगाय च सामर्थ्यम् उत्पादयन्ति।
- सहकारि-अधिगमः छात्रशिक्षकान् लघुसमूहेषु विशिष्टकार्यं कर्तुं प्रोत्साहयति। अत्र ते विचारान् आदानप्रदानं कर्तुं शक्नुवन्ति, तथा च परस्पराधिगमाय साहाय्यं कर्तुं शक्नुवन्ति। एतेन कक्षायां समुदायभावः वर्ध्यते, छात्राणां सामूहिककार्याणां संचारकौशलानां च विकासाय साहाय्यमपि भवति।
- सङ्गणकयन्त्र-स्प्रेडशीट्-अन्तरक्रियाशीलमृदुतन्त्रादीनां प्रौद्योगिकीसाधनानाम् समावेशपूर्वकं प्रौद्योगिकी-एकीकरणं छात्रशिक्षकेभ्यः गणितीयसमस्यानां परिकल्पनायै, समाधानाय च अधिकसुलभतया सहायतां करोति।
- समग्रतया, किञ्चन शिक्षणशास्त्रं यत् सक्रियाधिगम-यथार्थजागतिकानुप्रयोग-सहयोगात्मकाधिगम-प्रौद्योगिक्येकीकरण-प्रभाव्याकलनरणनीतीन् संयोजयति, तत् छात्रशिक्षकाणां गणितीय-मात्रातर्काणां दृढाधारविकासाय सहायकं भवति।

आकलनप्रक्रिया (Mode of Assessment) -

छात्राधिगमस्य आकलनाय प्रश्नोत्तरी-परीक्षा-समूहपरियोजना-प्रस्तुत्यादीनां विविधाकलनपद्धतीनाम् उपयोगः। यथोचितकालं प्रतिक्रियाप्रदानाय, छात्रैः स्वीयकार्याणां संशोधनाय स्वीयावगमनपरिष्काराय च अवसरप्रदानम्।

सन्दर्भग्रन्थाः (Reference Books)

- अस्थाना, विपिन और अस्थाना, श्वेता (2005) मनोविज्ञान और शिक्षा में मापन एवं मूल्यांकन, श्रीविनोद पुस्तक मन्दिर, आगरा.
- कपिल, एच. के. (2019), अनुसंधान विधियाँ, एच. पी. भार्गव पब्लिकेशन, आगरा।
- गुप्ता, एस. पी. (2008,) मापन एवं मूल्यांकन, शारदा पब्लिकेशन, इलाहाबाद।
- गुप्ता, एस. पी. और गुप्ता, अलका, आधुनिक मापन और मूल्यांकन, शारदा पुस्तक भवन, इलाहाबाद 2011.
- जैन, रेखा. (2011). तर्कशास्त्र – एक रूपरेखा. डी. के. प्रिण्टवर्ल्ड लि., दिल्ली.
- तिवारी, केदारनाथ. (2000). आगमन तर्कशास्त्र. मोतीलाल बनारसीदास पब्लिकेशन्स, दिल्ली.
- भार्गव, महेश, (2012), आधुनिक मनोवैज्ञानिक परीक्षण और मापन, एच. पी. भार्गव बुक हाउस, आगरा।

- लाल, रमन विहारी और जोशी, सुरेश चन्द्र, (2009) शैक्षिक मापन, मूल्यांकन एवं सांख्यिकी, रस्तोगी पब्लिकेशन, मेरठ।
- श्रीवास्तव, डी. एन. और श्रीवास्तव, वर्मा, प्रीति, (2011) मनोविज्ञान शिक्षा और अन्य सामाजिक विज्ञानों में सांख्यिकी, श्री विनोद पुस्तक मन्दिर आगरा।

5.8 क्रीडा, पोषणंसौष्ठवंच

सत्रार्द्धः7 **श्रेयोऽङ्काः2**

पाठ्यपरिचयः (About the course)

एतस्य पाठ्यक्रमस्य उद्देश्यमस्ति यत्छात्राध्यापकाः उत्तमस्वास्थ्यस्य, शारीरिकसौष्ठवस्य स्वस्थजीवनायपोषणस्य च महत्त्वम् अवगच्छेयुः। एष पाठ्यक्रमः छात्राध्यापकेभ्यः क्रीडानाम् आयोजनं कर्तुं तत्र प्रतिभागं च कर्तुं अनुभवात्मकम् अवसरं प्रददाति।

अधिगमपरिणामाः(Learning Outcomes)

अमुं पाठ्यक्रमं पठित्वा प्रशिक्षणार्थीसमर्थःभविष्यति -

1. क्रीडानां महत्त्वं तथा च सौष्ठवं संरक्षितुं क्रीडानाम् आवश्यकतां प्रभावोत्पादकतां च व्याख्यातुम्,
2. शारीरिकसौष्ठवं विविधप्रकारकक्रीडानां शिक्षणसङ्घटनविधिं च चर्चयितुम्,
3. शारीरिकसौष्ठवस्य महत्त्वं विज्ञायतदीय विविध घटकानां वर्णनपुरस्सरं शारीरिकसौष्ठव संरक्षकानां गतिविधीनां प्रत्यभिज्ञानं कर्तुम्,
4. विविधानाम् आयुः-वर्गाणां बालकानाम् आधारभूतं स्वास्थ्यं पोषणं च संरक्षितु पोषकखाद्यपदार्थानां प्रत्यभिज्ञानं कृत्वा स्वास्थ्यवर्धकजीवनशैल्याः उत्तमस्वास्थ्यस्य पोषणस्य च महत्त्वम् अवबोद्धुम्।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	क्रीडा, पोषणंसौष्ठवञ्च	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) - 1
क्रीडा

1. क्रीडायाःअर्थः, महत्त्वंप्रकाराश्च।
2. क्रीडायाःविभन्नचरणानि (प्राथमिकानिमाध्यमिकानि)।
3. क्रीडामनोविज्ञानम्, विविधक्रीडानां (अन्तःक्रीडाः, बाह्यक्रीडाःदलक्रीडाः, एकलक्रीडाइत्यादीनाम्)
4. शिक्षणाधिगमविधयःविविधक्रीडागतिविधयश्च(एकलक्रीडाःदलक्रीडाश्च)। दिव्याङ्गबालानांकृतेक्रीडाःसमावेशनंच।

पाठ्यांशः(Unit) - 2
शारीरिकंसौष्ठवम्

1. शारीरिकसौष्ठवस्य अर्थः, महत्त्वम्, घटकाः, मांसलदृढता, शारीरिकसहनशक्तिः, नमनीयता, शारीरिकसंरचना, हृदयस्यबलिष्ठता, स्वस्थजीवनशैल्याःमहत्त्वंच।
2. स्वास्थ्यस्यसौष्ठवस्यचसमन्वयनम्।

पाठ्यांशः(Unit) - 3

पोषणम्

1. पोषणस्य अर्थः, प्रकाराः, महत्त्वम् आवश्यकता, शिक्षणाधिगमविधयश्च।
2. विविधानाम् आयुः-वर्गाणां समूहानां कृते पोषणम्, क्रीडाव्यक्तित्वानां सामान्यव्यक्तित्वानां च पोषकखाद्यम्, पोषणंस्वास्थ्यं च, पोषणंसौष्ठवं च, विद्यालयेषु (मध्याह्नभोजनरूपेण) छात्रावासेषु च पोषणयुक्तं भोजनम्।

प्रायोगिकम् (Practicum)

1. **अन्तःक्रीडा-अभ्यासः -** चतुरङ्गम् (Chess) इत्यादीनां क्रीडानां माध्यमेन मानसिकविकासः।
2. **धावन-प्रतियोगिता -** शारीरिकक्षमताविवर्धनाय धावनस्य आयोजनम्।
3. **योगासन-सत्रम्** - शरीरस्य नमनीयतायै सूर्य-नमस्काराणां योगासनानां च अभ्यासः।
4. **पोषक-आहार-सारिणी -** छात्रैः सह सन्तुलित-आहारस्य निर्माणं चर्चा च।
5. **दलक्रीडा (कबाड्डी/पादकन्दुकम्) -** सहयोगभावनायाः विकासाय सामूहिकक्रीडाः।
6. **व्यायामः -** शारीरिकस्वास्थ्यं वर्धयितुं कूर्दनं धावनं च।
7. **समावेशी-क्रीडा-उत्सवः** - दिव्यांगबालकैः सह मिलित्वा क्रीडानां आयोजनम्।
8. **स्वास्थ्य-जीवनशैली-संवादः -** स्वस्थ-जीवनस्य महत्त्वे संस्कृतभाषायां लघु-भाषणम्।

प्रवचनप्रक्रिया (Mode of Transaction)-

प्रवचनप्रक्रिया सैद्धान्तिकज्ञानस्य व्यावहारिक कौशलस्य च मध्ये संयोजनपरायणा भविष्यति। प्रस्तुत पाठ्यविषयस्य प्रवचनप्रक्रियायाम् अधोलिखितांशाः सम्मिलिताः स्युः -

- सक्रियात्मकःअधिगमःछात्राध्यापकान्चर्चासु, विचारविमर्शसत्रेषु, चिन्तनोत्प्रेरकसत्रेषुसमस्या-समाधान गतिविधिषु भागं ग्रहीतुं प्रोत्साहयति। अनेन तेषां समीक्षात्मकचिन्तनस्य समस्या निराकरण कौशलस्य च विकासे सहायता भविष्यति।
- सहयोगात्मकशिक्षणे समूहपरियोजनानि अन्य कार्याणि च स्युः, यानि छात्राध्यापकान् एकोऽन्य स्मात्सहयोगात्मकाधिगमायकार्यकरणाय च प्रोत्साहितान्कुर्युः।

आकलनप्रक्रिया (Mode of Assessment)

सैद्धान्तिक पक्षाणां व्यावहारिक पक्षाणां च आकलनं परीक्षणानां प्रदत्त कार्याणां च आधारे भविष्यति।

सन्दर्भग्रन्थाः (Reference Books)

शिक्षकः विद्यार्थिनाम् आवश्यकतानुगुणं स्वाध्यायसामग्र्याः अनुगुणं च पुस्तकानां पाठ्य सामग्रीणां च विषये परामर्शंदातुं शक्नोति।

5.9 योग: आत्मबोधश्च

सत्रार्धः -8 **श्रेयोऽङ्कः-2**

पाठ्यपरिचय: (About the course)

अयं पाठ्यक्रम: स्वस्थजीवनाय योगस्य लाभाय च अन्यमनुष्यस्य शारीरिकभावनात्मक-बौद्धिक-सामाजिक-आध्यात्मिकानाम् इष्टतमस्थिते: प्रसाराय योगाभ्यास्यस्य महत्त्वे केन्द्रितोऽस्ति। जीवनस्य कलारूपेण योगस्य विशेषता: शान्तिसद्भावस्वास्थ्यप्रेमोत्साहाश्च दक्षता वर्तन्ते। अयं पाठ्यक्रम: छात्रान् शिक्षकान् च परस्परं उक्त विचारै: योजयितुं प्रयतते।

पाठ्यक्रमस्य ज्ञानं स्वस्य (शारीरिक-मानसिक-भावनात्मकविचार: कार्याणि च) प्रति सचेतनोपरि वर्तते। पाठ्यक्रमस्य घटकेषु योगस्य संक्षिप्त इतिहास: सिद्धान्ता: योगस्य विविध धारय: अभ्यास: (क्रियासनप्राणायामबन्धमुद्राधारणाध्यान्यश्चेति) चिन्तनशील अभ्यासाय ऐतेषाम् पक्षानां महत्त्वं सम्मलितं भविष्यति। एक: प्रभावी शिक्षक: ऐतेषाम् सिद्धान्तानां व्यवहाराणां च समान महत्त्वं ददाति।

अधिगमपरिणाम: (Learning Outcomes)

पाठ्यक्रमस्य समाप्ति: पश्चात् छात्रशिक्षका: योगस्य महत्त्वम् अवगृहितुं सक्षमा: भविष्यन्ति। एवञ्च अयं कथं कोऽपि अन्य मनुष्यस्य अवगृहणार्थं सहयोगं करिष्यति।
योगासनाभ्यासस्य महत्त्वं प्रतिपादयेत्।
प्रारम्भिकयोगासन: / क्रियाभ्यासं कुर्यात।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होरा: (Hours Distribution of the Course)			श्रेयोऽङ्का: (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	योग: आत्मबोधश्च	20 hr	0		2

पाठ्यांशः(Unit) -1

1. योगस्यावधारणा अर्थयोगश्चेति दर्शनम्।
2. योगस्य संक्षिप्त इतिहास-विकासश्चेति (शास्त्रीययोग:, उत्तरशास्त्रीययोग:, आधुनिककालश्च)
3. स्वस्थजीवनाय योगस्य महत्त्वम्, योगस्य आधुनिकयुगे प्रासंगिता, योगपरम्परादय।

पाठ्यांशः(Unit) - 2

योगविद्यालय:

1. योगस्य विविधधारय: यथा – (ज्ञानयोग:, भक्तियोग:, कर्मयोगश्चेति)।
2. सर्वांगीणविकासाय योगाभ्यास्य निर्माणम्।
3. योगस्य सिद्धान्ता: - अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रह-संतोष-तप-स्वाध्याय-ईश्वरप्रणिधानानि।

पाठ्यांशः(Unit) - 3

योगध्यानस्य अर्वाचीनसिद्धांताः

1. आधुनिकसिद्धान्ता: - मानवशरीर एक: समग्रैकाई अस्ति । मनुष्य एवञ्च तेषाम् आवश्यकता वर्तते । धारणाध्यानादि, ध्यानचिन्तनशीलाभ्यासेवञ्च एक: प्रभावी शिक्षकस्य निर्माणाय ऐतेषां सिद्धान्तानां महत्त्वम्, अद्वितीयात्मसशक्तिकरणाय, गुणवत्तास्थित्युपचाराय एक: व्यक्तिगत मस्तिष्कं महत्वपूर्णं वर्तते ।
2. ध्यानस्य महत्त्वं प्रकारा: प्रक्रिया च । प्राणायाम: - अस्य महत्त्वं प्रकारा: प्रक्रिया च । शान्तिसद्भाव-स्वास्थ्य-प्रेम-उल्लासाय योग । जीवनशैलीरूपेण योग: । आत्मचिन्तनाय भारतीयदर्शने योग: ।

प्रायोगिकम् (Practicum)

1. **यम-नियम-परिपालनम् (Diary of Virtues) -** छात्राः नित्यं यमानां (अहिंसा, सत्यम्, अस्तेयम्, ब्रह्मचर्यम्, अपरिग्रहः) नियमानां च (शौचम्, सन्तोषः, तपः, स्वाध्यायः, ईश्वरप्रणिधानम्) पालनं करिष्यन्ति। ते स्वदिनचर्यायां कति वारं सत्यम् अवदन् अथवा कस्य साहाय्यं कृतवन्तः, इति एकस्यां दैनन्दिन्यां (Diary) लेखिष्यन्ति। एतेन तेषां चारित्रिक-नैतिक-विकासः भविष्यति।
2. **स्थिर-सुख-आसन-अभ्यासः (Stability through Postures) -** छात्रैः पद्मासनं, ताडासनं, वज्रासनं च करणीयम्। एतैः आसनैः शरीरं स्वस्थं, सुदृढं च भवति। "स्थिरसुखमासनम्" इति सूत्रानुसारं छात्राः एकस्यां स्थितौ सुखपूर्वकम् उपवेष्टुं ज्ञास्यन्ति, येन तेषां एकाग्रता वर्धिष्यते।
3. **प्राणायाम-अनुष्ठानम् (Breath Control for Focus) -** छात्रैः अनुलोम-विलोमः, भ्रामरी-प्राणायामश्च करणीयः। प्राणायामेन शरीरे प्राणतत्त्वस्य (Oxygen) वृद्धिः भवति, मनः च शान्तं स्थिरं च जायते। एषा क्रिया छात्राणां मानसिक-दृढीकरणाय अतीव महत्त्वपूर्णा अस्ति।
4. **सूर्य-नमस्कार-प्रक्रिया -** द्वादश-स्थितियुक्तः सूर्य-नमस्कारः छात्रैः मन्त्रैः सह करणीयः। अयं एकः पूर्णः व्यायामः अस्ति यः सर्वाणि अङ्गानि प्रभावयति, शरीरे ओजः कान्तिं च वर्धयति। एतेन छात्राणां सर्वाङ्गीण-विकासः सिद्ध्यति।
5. **एकाग्रतायै त्राटक-अभ्यासः (Concentration Activity) -** छात्राः एकस्यां दीपशिखायां अथवा कस्यचित् बिन्दोः उपरि अनिमिष-दृष्ट्या ध्यानं करिष्यन्ति। अयं षट्कर्मणाम् अन्तर्गतः अभ्यासः अस्ति, येन नेत्राणां ज्योतिः वर्धते, मनसः च चञ्चलता नश्यति। आत्मबोधाय मनसः स्थिरता आवश्यकी अस्ति।
6. **स्वाध्यायः आत्म-चिन्तनं च (Self-study and Reflection) -** छात्राः महापुरुषाणां जीवनगाथाः पठिष्यन्ति अथवा "कोऽहम्?" इति विषये मौनं भूत्वा चिन्तयिष्यन्ति। स्वाध्यायेन विवेक-ख्यातिः उत्पद्यते, छात्राः स्वस्य वास्तविक-स्वरूपं ज्ञातुं शक्नुवन्ति।
7. **ध्यानम् आन्तरिक-शान्तिश्च (Meditation for Inner Peace) -** छात्राः प्रतिदिनं १०-१५ निमेषान् यावत् शान्तचित्तेन उपविश्य नेत्रे निमिल्य श्वसनं द्रक्ष्यन्ति। ध्यानेन चित्तवृत्तिनिरोधः भवति, येन आन्तरिक-आनन्दस्य अनुभूतिः जायते। एषः आत्मबोधस्य साक्षात् मार्गः अस्ति।
8. **परोपकारः कर्मयोगश्च (Selfless Action) -** छात्राः कक्षायाः स्वच्छतां करिष्यन्ति अथवा अन्यान्य-छात्रान् पाठने साहाय्यं करिष्यन्ति। स्वामी विवेकानन्दस्य अनुसारं कर्मयोगः आत्मबोधस्य आधारः अस्ति। निष्काम-भावेन कार्यं कृत्वा छात्राः स्वस्य अहं-भावं त्यक्त्वा विश्वबन्धुत्वस्य भावनायाः विकासं करिष्यन्ति।

प्रवचनप्रक्रिया (Mode of Transaction) -

- अनेका: योगाभ्यासनेरता: मनुष्याणां चिन्तनशील अध्ययनं कृत्वा अवग्रहणम्, बोधनम्, एकाग्रता प्रदानाय विश्रामतकनिकय:, आत्मबोध-व्यक्तित्वविकासश्च।

आकलनप्रक्रिया (Mode of Assessment)

व्यवहारिकमूल्यांकनम् – प्रारम्भिकयोगासनम् / क्रियाभ्यासस्य मूल्यांकनम् / चिन्तनशीलस्तरस्य पठनाकलनम्।

सन्दर्भग्रन्था: (Reference Books)

- योग प्रदीपिका : बी.के.एस. आयंगार, प्रकाशनम् ओरियंट लांग्मैन प्राइवेट लिमिटेड, नवदेहली - 110002
- रोग और योग : स्वामी सत्यानन्द सरस्वती, योगप्रकाशनम् ट्रस्ट मुंगेर, बिहार, भारत।
- बच्चों के लिए योग शिक्षा : स्वामी सत्यानन्द सरस्वती, योग पब्लिकेशन ट्रस्ट मुंगेर, बिहार, भारत।
- योगस्य भाषा संस्कृतं पठ्यताम् (प्रथम: भाग:) : प्रकाशनम् संस्कृतसंवर्धनप्रतिष्ठानम्, देहली – 110006
- योगस्य भाषा संस्कृतं पठ्यताम् (द्वितीय: भाग:) : प्रकाशनम् संस्कृतसंवर्धनप्रतिष्ठानम्, देहली – 110006
- पातञ्जलयोगदर्शन : टीकाकार हरिकृष्णदास गोयन्दका, गीताप्रेस, गोरखपुर, उत्तर प्रदेश।
- हठप्रदीपिका स्वात्माराम-कृत : संस्करणकर्ता – स्वामी दिगम्बरजी, डा. पीताम्बर झा, प्रकाशक कैवल्यधाम, लोनावला – 410403 (पुणे), भारत।
- घेरण्ड संहिता घेरण्डमुनि-कृत : स्वामी निरंजनानन्द सरस्वती, योग पब्लिकेशन ट्रस्ट मुंगेर, बिहार, भारत।

5.10 नागरिकताशिक्षा सन्धारणीयता पर्यावरणशिक्षा च

सत्रार्द्धः - 8 **श्रेयोऽङ्काः – 02**

पाठ्यपरिचयः (About the course)

अयं पाठ्यक्रमः छात्राध्यापकान् भारतस्य संविधानं प्रति, विशेषतः **मौलिक-अधिकारान्** तथा **मौलिक-कर्तव्यानि** प्रति अभिमुखीकर्तुं प्रयतते। एतद् भारतस्य उत्तरदायित्वपूर्ण-उत्पादनशील-प्रभावशालि-नागरिकरूपेण तेषां भूमिकानां दायित्वानां च कृते तान् सज्जीकरोति। पाठ्यक्रमः छात्राध्यापकान् अस्मिन् परस्परसम्बद्धे विश्वे भारतस्य समृद्धपरम्परां तथा **"वसुधैव कुटुम्बकम्"** इति दार्शनिकम् आधारं च अवबोधयितुं समर्थान् करोति। अपि च, अयं पाठ्यक्रमः वैश्विकउपहुतीनां निवारणाय उत्तरदायित्वपूर्ण-वैश्विक-नागरिकतायाः जागरूकतां जनयति। पाठ्यक्रमस्य शाश्वतता-पक्षः सन्धारणीयता वा पक्षः सर्वेषु मानवीय-कार्येषु, आर्थिक-सामाजिक-पर्यावरण-आयामेषु च सन्तुलितरूपेण **'शाश्वत-विकासम्'** अवगन्तुं साहाय्यं करोति। अस्य पर्यावरण-शिक्षा-घटकस्य उद्देश्यं छात्राध्यापकेषु जलवायु-परिवर्तनं, प्रदूषणं, जैव-विविधतायाः संरक्षणं, वन-वन्यजीव-संरक्षणं तथा च अपशिष्ट-प्रबन्धनं प्रति जागरूकतां निर्माणं वर्तते।

अधिगमपरिणामाः(Learning Outcomes) - पाठ्यक्रमस्य समाप्तेः परं छात्राध्यापकाः -

- नागरिकतायाः तथा नागरिकता-शिक्षायाः अवधारणां व्याख्यातुं समर्थाः भविष्यन्ति।
- नागरिकता-शिक्षायाः उद्देश्यानि उपागमान् च वर्णयितुं समर्थाः भविष्यन्ति।
- वैश्विक-नागरिकतायाः अवधारणां उद्देश्यानि च विवृणोतुं समर्थाः भविष्यन्ति।
- मानवीय-कार्येषु सन्धारणीयता इति विचारं तस्य आर्थिक-सामाजिक-पर्यावरणीय-आयामान् च व्याख्यातुं समर्थाः भविष्यन्ति।
- पर्यावरण-विषयेषु जागरूकतां तथा जलवायु-परिवर्तनस्य न्यूनीकरणाय आवश्यक-कार्याणि प्रदर्शयितुं समर्थाः भविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	नागरिकताशिक्षा सन्धारणीयता पर्यावरणशिक्षा च	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) - 1

नागरिकताशिक्षा

1. नागरिकतायाः तथा नागरिकता-शिक्षायाः अवधारणा।
2. नागरिकता-शिक्षायाः उद्देश्यानि उपागमाः च।
3. वैश्विक-नागरिकतायाः तथा वैश्विक-नागरिकता-शिक्षायाः अवधारणा।
4. वैश्विक-नागरिकता-शिक्षायाः उद्देश्यानि उपागमाः च।

5. **'वसुधैव कुटुम्बकम्'** इत्यस्य अवधारणा तथा स्थानीय-वैश्विक-समुदायान् प्रति समग्रदृष्टिकोणस्य विकासे तस्य महत्त्वम्।

पाठ्यांशः(Unit) - 2

सन्धारणीयता (शाश्वतता)

1. सर्वेषु मानवीय-कार्येषु 'शाश्वतता' इत्यस्य अवधारणा।
2. आर्थिक-सामाजिक-पर्यावरण-आयामेषु शाश्वत-विकासस्य प्राप्तये उपागमाः।
3. शाश्वत-विकासस्य लक्ष्याणि (SDGs) ।
4. प्राकृतिक-संसाधनानां शाश्वत-प्रबन्धनम्।
5. विद्यालय-समुदाय-आधारित-गतयः।
6. शाश्वत-विकासार्थं शिक्षा।

पाठ्यांशः(Unit) - 3

पर्यावरण शिक्षा

1. पर्यावरण-विषयाः।
2. जलवायु-परिवर्तनस्य प्रभाव-न्यूनीकरणाय, प्रदूषण-निवारणाय च आवश्यक-कार्याणि।
3. अपशिष्ट-प्रबन्धनं, जैव-विविधता-संरक्षणं, प्राकृतिक-संसाधन-प्रबन्धनं तथा वन्यजीव-संरक्षणम्।
4. पर्यावरण-शिक्षायाः प्रदानाय उपागमाः।
5. पर्यावरण-शिक्षायां प्रसार-माध्यमानां तन्त्रज्ञानस्य च भूमिका।
6. पर्यावरण-शिक्षायाः संवर्धने सर्वकारीय-असर्वकारीय-संस्थानां भूमिका।
7. विद्यालय-समुदाय-आधारित-पर्यावरण-शिक्षा-कार्यक्रमाः।

प्रायोगिकम् (Practicum) -

1. **अपशिष्ट-पृथक्करण-अभ्यासः (Waste Segregation) -** छात्राः विद्यालयस्य अपशिष्टं जैविक-अजैविक-पुनर्चक्रण-योग्य-वर्गेषु पृथक् कर्तुं शिक्षन्ते। एतेन ते अपशिष्टप्रबन्धनस्य व्यावहारिकं ज्ञानं प्राप्नुवन्ति।
2. **अपशिष्टात् अर्थसृजनम् (Waste to Wealth) -** अनुपयोगी-वस्तुभिः (यथा जीर्णपत्राणि, कूप्यः) नूतनानां उपयोगी-वस्तूनां निर्माणम्। इयं गतिविधिः 'चक्रीय-जीवनशैलीं' (Circular Lifestyle) प्रोत्साहयति।
3. **पादप-दत्तक-ग्रहणम् (Adopt a Plant) -** प्रत्येकं छात्रः विद्यालयस्य प्राङ्गणे एकं पादपम् आरोपयति, तस्य नामकरणं करोति, नित्यं तस्य पालनं च करोति। एतेन छात्रेषु 'पर्यावरण-नागरिकता' (Environmental Citizenship) विकसिता भवति।
4. **जल-सङ्ग्रहण-प्रकल्पः (Water Conservation Project) -** छात्राः पारम्परिक-जल-सङ्ग्रहण-पद्धतीनां (यथा वापी, तडागः) अध्ययनं कुर्वन्ति तथा च विद्यालये वर्षाजल-सञ्चयस्य लघु-प्रतिरूपं (Model) निर्माय प्रदर्शयन्ति।
5. **प्राकृतिक-भाण्ड-प्रयोग-दिवसः (Green Lifestyle Day) -** भोजनार्थं प्लास्टिक-पात्राणां स्थाने कदली-पत्राणां, मृत्तिका-पात्राणां वा प्रयोगः।

6. **वस्तु-पुनःसंस्कार-कार्यशाला (Right to Repair Workshop) -** त्रुटित-वस्तूनां (यथा आसन्दाः, पुस्तकानि) पुनः-संस्कारस्य (Repair) कलां छात्राः शिक्षन्ते। एतेन अनावश्यक-व्ययस्य अपशिष्टस्य च न्यूनीकरणं भवति।
7. **पर्यावरण-संसद् (Environmental Parliament) -** छात्राः विद्यालयस्य पर्यावरण-समस्यानां (यथा जलव्ययः, मालिन्यम्) विषये चर्चां कुर्वन्ति, नियमान् च रचयन्ति। इयं गतिविधिः 'लोकतान्त्रिक-सहभागितां' नागरिकता-कौशलं च वर्धयति।
8. **स्वच्छ-परिवेश-अभियानम् (Community Cleanliness Drive) -** विद्यालयस्य पार्श्ववर्ति-क्षेत्राणां स्वच्छतायै सामूहिकं श्रमदानम्। एतेन छात्रेषु **'वसुधैव कुटुम्बकम्'** इति भावनायाः विकास भवति, यत् वैश्विक-नागरिकतायाः आधारः अस्ति।

शिक्षण-पद्धतिः –

अत्र व्याख्यान-चर्चा, गोष्ठी, पुस्तकालय-कार्यं, प्रदत्त-कार्यं, परियोजना-कार्यं, पाठ-योजना-विकासः, ICT-आधारित-सामग्रीणां प्रयोगः, तथा च अन्वेषण-आधारित-अधिगमः अन्तर्भवन्ति।

मूल्याङ्कन-विधिः –

प्रायोगिककार्यस्य मूल्याङ्कनं तथा चिन्तनशील-पठनस्य मूल्याङ्कनम्।

सन्दर्भग्रन्थाः (Reference Books) -

शिक्षकाः शिक्षार्थिनाम् आवश्यकतानुसारं पुस्तकानि पठन-सामग्रीं च सूचयितुं शक्नुवन्ति।

6. विद्यालयानुभवः
6.1 पूर्वप्रशिक्षुता
(Pre-Internship-Practice)

सत्रार्द्धः - 5 **श्रेयोऽङ्काः - 2**

पाठ्यपरिचयः (About the course)

पूर्वप्रशिक्षुतायाः योगदानं अध्यापकशिक्षायां प्रधानं वर्तते। छात्राध्यापकानां कृते शिक्षणकौशलसंवर्धनाय पूर्वप्रशिक्षुता अनिवार्या भवति। छात्राध्यापकः पूर्वप्रशिक्षुतातः अनुभवं प्राप्य नूतनपरिस्थितौ स्वयम् अध्यापनाय सक्षमो भविष्यति। सः शिक्षणशास्त्रं पठित्वा कस्यामपि कक्ष्यायां निर्देशानुगुणम् अध्यापयितुं शक्नोति। सः शिक्षणशास्त्रं तथा प्रबन्धनेऽपि कौशलं प्राप्स्यति। तेन सह अध्यापने कार्यानुभवमपि प्राप्स्यति।

अध्ययनोद्देश्यानि

अस्य पाठ्यविषयस्य सम्पूर्त्यनन्तरं छात्राध्यापकाः अधः विद्यमानेषु क्षमतां प्राप्स्यन्ति।

- शिक्षणशास्त्रस्य कार्यानुभवे परिचयः, कक्ष्याप्रबन्धने कौशलसम्पादनम्, आकलनोपकरणनिर्माणे कौशलम् अधिगमस्तरः।
- पाठ्यवस्तुनः दृष्ट्वा कक्ष्यायाः समायोजनम्। (Demonstration Lesson)
- समुचितशिक्षणशास्त्रानुसारं पाठ्यवस्तुनः पाठयोजनायाः च निर्माणम्।
- मार्गदर्शितपरिस्थितौ समुचिताध्यापनकौशलानां सहाय्येन प्रभावपूर्णाध्यापनाय योग्यता-सम्पादनम्।
- विद्यालयप्रशिक्षुतायै सामर्थ्यसम्पादनम्।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	पूर्वप्रशिक्षुता –	20 hr	0	12 hr.	2

निर्दिष्टाः प्रवचनप्रक्रिया (Mode of Transaction) -

- प्रदर्शनपाठः (शिक्षणशास्त्रविषयेषु प्रत्येकम् एकम्)
- सब्रह्मचारिसमूहेषु अध्यापनम्, सब्रह्मचारिषु निरीक्षणम्। (Minimum 5 in each pedagogical subject) (न्यूनातिन्यूनं पञ्च शिक्षणशास्त्रविषयेषु प्रत्येकम्)
- सब्रह्मचारिणः अध्यापनस्य परस्परावलोकनम्।
- आलोचनात्मकसमूहचर्चा/कार्यशाला/संगोष्ठी।
- श्रेष्ठकक्ष्यायाः प्रदर्शनाय उत्तम Video निर्माणम्। तस्य अवतरणम्।

विषयवस्तु

पूर्वप्रशिक्षुतायां शिक्षणशास्त्रविषयाणां योजनं स्तरानुगुणं करणीयम्। तथा कौशलदक्षतासंवर्धनम्, मूल्यसंवर्धितविषयाः, पूर्वसत्रार्धे पठिताठस्थानपाठ्यविषयाः। शिक्षणशास्त्रम्, पाठयोजनायाः रूपरेखा, सूचनासम्प्रेषणप्रोद्यौगिक्योपकरणानि। भारतीयशिक्षासम्प्रदायः, कक्ष्याप्रबन्धनस्य तत्त्वानि, आकलनम्, सम्बन्धपाठ्यविषयाः।

आयोज्यमानानि प्रवर्तनानि।

- अध्यापनकौशलानां प्रत्यभिज्ञानाय छात्राध्यापकैः कृतानां कक्ष्याणाम् अवलोकनम्।
- कार्यशालायाः समायोजनेन वैविध्यपूर्णपाठ्यपद्धतौ छात्राध्यापकानां प्रवेशः।
- छात्राध्यापकानां कृते पुनश्चर्या कार्यक्रमस्य शिक्षणशास्त्र अभ्यासः अधोनिर्दिष्टानि कार्याणि करणीयानि । प्रयोगात्मक अधिगमः, विभिन्न विषयाणां मध्ये अन्तः संबंधः विद्यालयीय विषयेषु भारतीयज्ञानपरम्परायाः समावेशः,एवं कक्षाप्रबन्धनकौशलानि।

  यथा- सूक्ष्मशिक्षणम्, नूतनपदानां परिचयः, भारतीयज्ञानपरम्परायाः परिचयः, पाठ्यपुस्तकस्थ श्लोकानां प्रशिक्षणम्।

  (Orientation of Student Teachers to different Pedagogic practice like experimental learning inter relationship amongst different subjects' integration of IKS and values in school subjects and classroom management skills)
- छात्राध्यापकानां कृते पुनश्चर्याक्रार्यक्रमस्य शिक्षणशास्त्रोपागमानाम् अधोनिर्दिष्टानि कार्याणि करणीयानि। कथाकथनम्, विमर्शनात्मकचिन्तनायै कलैकीकरणं, क्रीडेकीकरणम्, जीवनेच्छायाः उपरि श्रद्धा, महत्त्वपूर्णमृदुलता, कक्ष्याप्रबन्धनकौशलानि।
- छात्राध्यापकानां आदर्शाध्यापनपाठयोजना साक्षात्कारस्य अवलोकनम्।
- अध्ययनपरिणामम् आधारीकृत्य एकैकस्मिन् कक्ष्याविषये ग्रन्थालयादि सौकर्येषु निर्दिष्टप्रवर्तनानां रूपकल्पना करणीया।

मध्यस्तरस्य राष्ट्रियपाठ्यचर्यारूपरेखायाः अधिगमः परिणामाः-

- पाठ्यविषयविश्लेषणम्, एककासूत्रणस्य विकासः, सम्प्रत्ययात्मकमानचित्रम्, पाठयोजना च।
- छात्राध्यापकानां सानिध्ये एककासूत्रणस्य पाठासूत्रणस्य उपरि परिचर्चा।
- Portfolio सज्जीकरणं (For Self-work) स्वकीयक्रियाकालपानाम् आकलनमपि Portfolio मध्ये संरक्षयितुं शक्यते।
- अध्यापनाध्ययनरीतिषु आशयरूपीकरणाय आयोज्यमानेषु चर्चासु भागग्रहणम्।
- उपलभ्यमानानां अध्ययनस्रोतसां, लघुचलचित्रस्य च पर्यवेक्षणम्।
- स्थानीयानां तथा न्यूनमूल्यानाम् उपकरणानाञ्च विकासः।
- शिक्षणशास्त्रविषयाणामाधारेण अभिप्रेरणात्मकपुस्तकानां वाचनं प्रकटनं च।
- राष्ट्रीयपाठ्यचर्यारूपरेखाम् अवगत्य तस्य क्रियान्वयनं कर्तुं शक्नुवन्ति।
- पाठ्यचर्योक्त रूपरेखायाम् उक्तानां नियमानाम् अनुपालनम् करिष्यन्ति।

आकलनप्रक्रिया (Mode of Assessment) -

दक्षता/कलाकृतिः	आकलनरीतिः	अनेन आकलनं करणीयम्	श्रेयोऽङ्कः
कक्ष्याध्यापनकौशलानि आकलनोपकरणानि	अनुरूपित् अवतरणम्	छात्राध्यापकेन	01
सजीवात्मकसमूहचर्चा/कार्यशाला	अवलोकनम्	छात्राध्यापकेन	0.5
पुरावस्तु (Artificial) पाठयोजना, अध्यापनाध्ययनसामग्र्यः, आकलित Videos/लघुचलचित्रं तथा क्रियानुसन्धानम्	मूल्याङ्कनम्	छात्राध्यापकेन	0.5

अधिगमपरिणामाः(Learning Outcomes)

1. शिक्षणकौशल्य सम्पादनम्।
    - प्रस्तावनाकौशलप्राप्तिः
    - प्रश्नकरणकौशलप्राप्तिः
    - व्याख्यानकौशलप्राप्तिः
    - प्रेरकवैविध्य कौशलप्राप्तिः
2. नूतनपदानाम् उपयुज्य वाक्यनिर्माणं कर्तुं शक्नुवन्ति।
   नूतनपदानि उपयुज्य दैनन्दिनकार्यं कर्तुं प्रभवन्ति।
   नूतनपदानि उपयुज्य काव्यनिर्माणं कर्तुं प्रभवन्ति।
3. भारतीयज्ञानेन परिचिताःभवन्ति।
   प्राचीनकालादेव भौतिकज्ञाने भारते विलसति इति जानन्ति।
   गणितस्यमूलं भारतीयमेव इति जानन्ति।
4. वलेकानां गति, युति, लय पुरस्सरम् उच्चारणकौशलप्राप्तिः।
5. नायकत्वलक्षणानां वर्धनम्।

6.2 विद्यालयावलोकनम्

सत्रार्द्धः -6 **श्रेयोऽङ्कः - 02**

पाठ्यपरिचयः (About the course)

विद्यालयः शिक्षकशिक्षाकार्यक्रमस्य हृदयस्थानीयः वर्तते। विद्यालयीयानां वास्तविकक्रियाकलापानां प्रत्यक्षीकरणं सर्वस्यापि छात्राध्यापकस्य भवेत् एव। विद्यालयस्य अवलोकनेन छात्राध्यापकः / छात्राध्यापिका तत्रत्याः परिपाटीः अवगन्तुं प्रभवति। भारते विद्यालयस्तु नैकरूपः वर्तते। ग्रामीणः नागरः आवासीयः आदिवासीयः केन्द्रीयः राज्यस्तरीयः अन्ताराष्ट्रियः इत्येवं विभिन्नरूपाणां विद्यालयानाम् अवबोधस्तु छात्राध्यापकाय स्यादेव। किञ्च विद्यालयाः विभिन्नैः हितधारकैः मानवीयतत्त्वैर्वा स्नेहसम्पादनाय छात्राध्यापकाय साहाय्यमाचरन्ति। विद्यालयस्य अवलोकनेन विद्यालयप्रणाल्याः छात्राणाम् आवश्यकतायाः शिक्षणसिद्धान्तानां च ज्ञानम् उपजायते। अतः विद्यालयस्य अवलोकनकार्यक्रमः पाठ्यक्रमे निक्षिप्तोऽस्ति।

अधिगमपरिणामाः (Learning Outcomes)

विद्यालयावलोकनकार्यक्रमस्य परिपूर्तौ छात्राध्यापकाः ....

1. विद्यालयस्य प्रणाल्याः परिचयं प्राप्स्यन्ति।
3. विद्यालयस्य प्रक्रियायाः परिपाटेः वातावरणस्य च ज्ञानं स्वतः विन्दिष्यन्ति।
4. विद्यालयस्य हितधारकैः / मानवीयतत्त्वैः सह मधुरसम्बन्धं संवर्धयिष्यन्ति।
5. विद्यालयीयकर्मचारिणां प्रबन्धकानां संयोजकानां शिक्षकाणां प्रशासकानां च उत्तरदायित्वानि कार्याणि च ज्ञास्यन्ति।
6. विद्यालयस्य विभिन्नशैक्षिककार्याणि प्रत्यक्षरूपेण द्रक्ष्यन्ति।
7. विद्यालयस्य प्रकोष्ठक्रीडाङ्गणप्रयोगालयग्रन्थालयादीनां भौतिकसंसाधनानां सुरक्षासौकर्याणां मध्याह्नभोजनजलपानशौचालयाद्यानां व्यवस्थानाञ्च ज्ञानं प्राप्स्यन्ति।
8. विद्यालये उपलभ्यमानान् विविधाभिलेखान् दत्तांशान् च अधिगमिष्यन्ति ।
9. विद्यालयस्य सम्पर्के विद्यमानानाम् अभिभावकानां तदितरेषां च अध्ययनं करिष्यन्ति।
10. हितधारकाणां पारस्परिकसम्बन्धं ज्ञास्यन्ति।
11. छात्राणां सर्वाङ्गीणविकासाय विविधप्रकारकविद्यालयैः उपयुज्यमानानां विविधाकलनसिद्धान्तानाम् अध्ययनं करिष्यन्ति।
12. निरीक्षितविद्यालयस्य सङ्कलितम् इतिवृत्तं तत्रत्यं कक्ष्यास्वरूपं च लेखिष्यन्ति प्रस्तुतीकरणं च करिष्यन्ति।
13. विद्यालयस्य गतिविधिषु अभिभावकानां सामाजिकानां च भूमिकां ज्ञास्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	विद्यालयावलोकनम्	20 hr	0	12 hr.	2

सम्प्रेषणात्मकं निर्देशनम्

- अवलोकनम्
- अन्तःक्रिया
- संवादः
- विद्यालयशिक्षाप्रणाल्या सम्बद्धस्य साहित्यस्य समीक्षणम्
- विविधाभिलेखानां दत्तांशानां च सङ्ग्रहः

विद्यालयस्य अवलोकनसिद्धता

1. विद्यालयावलोकनप्रक्रियायाः अभिमुखीकरणम्
2. अवलोकनसाधनानां प्रारूपाणां सज्जीकरणम्

विद्यालयस्य अवलोकनम् (न्यूनातिन्यूनं त्रिप्रकारकविद्यालयानाम् अवलोकनम्)

1. लघुसमूहेषु विभक्तः छात्राध्यापकानां गणः विद्यालयं गत्वा प्रागेव सज्जीकृतावलोकनसाधनानि प्रारूपाणि चोपयुज्य दत्तांशान् एकत्रीकरोति।
2. एकत्रीकृतानां दत्तांशानां विश्लेषणं कुरुते।
3. अवलोकितविद्यालयस्य इतिवृत्तं सज्जीकरोति ।

अवलोकनोत्तरकालिकसत्रम्

1. अवलोकितविद्यालयानाम् इतिवृत्तस्य गणशः प्रस्तुतीकरणम् ।
2. संवादः प्रतिपुष्टिश्च ।
3. नानाप्रकारकविद्यालयप्रणालीः अधिकृत्य चिन्तनं मन्थनं च ।

विषयसामग्री

विद्यालयस्य अवलोकनं नाम एकः स्थानविशेषकेन्द्रितः क्रियाकलापः वर्तते यत्र हि अवलोकनं पुनश्च विद्यालयीयप्रक्रियायाः विज्ञानं च प्रधानं सम्भवति। छात्राध्यापकाः प्रशिक्षकाणां मार्गदर्शने विद्यालयं गच्छन्ति छात्रैः तदितरैः सम्बद्धैश्च सह सम्भाषन्ते। अवलोकनावसरे पूर्वस्मिन् सत्रार्द्धे छात्रैः अधीतान् विषयान् पाठ्यक्रमेण शिक्षायाः आधारस्तम्भेन अनुशासनप्रक्रियाभिः क्षमतावर्धकैः मूल्यैश्च सह परीक्षन्ते। अर्थात् पूर्वोत्तरसमीक्षणकार्यं सम्पादयन्ति। अस्मिन् प्रसङ्गे एते अवधेयाशाः -

- विद्यालयावलोकनप्रक्रियायाः अर्थः प्रकृतिश्च
- अवलोकननिर्णययोः भेदगणना।
- विद्यालयावलोकनेन सम्बद्धानां घटकानां सैद्धान्तिकाः प्रायोगिकाश्च पक्षाः यथा -
    1. विद्यालयस्य शिक्षणव्यवस्था
    2. सर्वैः मानवीयतत्त्वैः सह समन्वयः
    3. विभिन्नप्रकारकाणां विद्यालयानां कार्यालयीयाः उपक्रमाः
    4. सर्वदृष्ट्या विद्यालयस्य वातावरणम्

5. विद्यालयीयप्रक्रियायां पाठ्यचर्यासम्बद्धकार्याणाम् आयोजनप्रक्रियाः
6. विद्यालये उपलभ्यमानानि भौतिकसंसाधनानि
7. विद्यालये सूचनासम्प्रेषणप्रविध्योः शिक्षणाधिगमप्रबन्धनस्य च उपयोगिता
8. हितधारकाणां मध्ये पारस्परिकसम्बन्धः
9. विभिन्नप्रकारकेषु विद्यालयेषु अनुप्रयुज्यमानाः मूल्याङ्कनप्रक्रियाः
10. विद्यालयस्य क्रियाकलापेषु अभिभावकानां अन्येषां सामाजिकानां भागग्रहणम्

आयोजयितव्याः क्रियाकलापाः

मध्यस्तरः (Middle Stage)

1. Reflect on affective classroom teaching learning strategies
   प्रभावात्मककक्षाशिक्षणाधिगमयुक्तीनां गहनविचारः
   Example (digital classroom
   PowerPoint presentation
   New innovation in teaching learning process)
2. Observe integration of IKS values, local resource in teaching learning process
   Like भारतीयज्ञानपरम्परायाः मूल्यानाम् अवलोकनम् ।
   Example (भारतीयज्ञानपरम्परादृष्ट्या पाठ्यक्रमः पाठ्यचर्या पाठ्यपुस्तकानाम् अवलोकनम् एवमेव विद्यालये आयोज्यमानानां कार्यक्रमाणां पर्वाणाम् अवलोकनम्)
3. observe practice and assessment of vocational education in the school
   विद्यालये व्यावसायिक शिक्षायाः अभ्यासः एवम् आकलनस्य अवलोकनम्
4. Scout and health wealth related programmes
   (योगाभ्यासः प्राथमिकचिकित्साअभ्यासः पर्यावरणसम्बद्धाः कार्यक्रमाः
5. प्रशिक्षणकेन्द्रे निर्मितस्य विद्यालयावलोकनप्रारूपं स्वीकृत्य त्रिप्रकारकविद्यालयानाम् अवलोकनम्। सर्वैः हितधारकैः (विद्यालयस्य मानवीयतत्त्वैः सह) सह समन्वयसम्पादनं च ।
6. नवमीतः द्वादश्यां कक्षायां यावत् अधीयानानां विद्यालयस्य छात्राणां दत्तांशसङ्ग्रहणं कृत्वा पूर्वोत्तरस्तरयोः विषये तत्रत्यैः शिक्षकैः छात्रैः कर्मकरैः सह चर्चां कृत्वा माध्यमिकमध्योच्चस्तराणां पारस्परिकसम्बन्धस्य विज्ञानम् ।
7. अनुभवबलेन विद्यालयीयप्रक्रियायाः अवलोकनं कृत्वा पुनश्च शैक्षिककार्यक्रमस्य निरीक्षणं विधाय प्रतिवेदननिर्माणम्।
8. विद्यालये दश स्यूतरहितदिवसाचरणस्य विषये व्यावसायिकविषयाणां प्रशिक्षुतामुखेन अध्ययनविषये च शिक्षकैः छात्रैश्च सह संवादं कृत्वा प्रतिवेदननिर्माणम्।
9. विद्यालये अन्तःशास्त्रीयविषयाणामधिगमाय विद्यमानानाम् अवसराणाम् अध्ययनम्
10. ग्रन्थालयस्रोतसां सौकर्याणां च उपलब्धेः उपयोगितायाश्च विषये अध्ययनम् । प्रयोगशालानाम् (अटल थिंकरिंग् लैब इत्यस्याः भौतिकरसायनजीवविज्ञानगणितभाषासमाजविज्ञानसंगणकप्रयोगशालानां च) क्रीडासौकर्याणां कलासङ्गीतयोश्च अध्ययनसौकर्याणाम् अध्ययनम् ।
11. निर्देशनपरामर्शयोः NCC, NSS , स्वास्थ्यसंवर्धनकल्याणकार्यक्रमस्य च सौविध्यानाम् अध्ययनम्।

12. विविधविद्यालयीयक्रियाकलापानाम् अवलोकनम् । यथा - कक्षाकेन्द्रितशिक्षणाधिगमप्रक्रियायाः अवलोकनम् , प्रयोगशालाक्रियाः , ग्रन्थालयप्रक्रियाः, क्रीडास्पर्धाः, वादविवादभाषणप्रबन्धाद्याः प्रतियोगिताः इत्यादीनाम् अवलोकनम्।
13. विद्यालयप्रमुखैः विषयविशेषज्ञैः शिक्षकैश्च सह संवादः - छात्राणाम् आकलनप्रक्रियाः कैः मूल्याङ्कनसाधनैः सम्पाद्यन्ते? इति विषये, कथं परीक्षाः सञ्चाल्यन्ते? कथञ्च उत्तराणि परीक्ष्यन्ते? कथम् अभिभावकेभ्यः परीक्षापरिणामः सम्प्रेष्यते? इत्येतेषु विषयेषु न्यूनातिन्यूनं द्विप्रकारकविद्यालयाभ्यां दत्तांशसङ्ग्रहः।

आकलनप्रक्रिया (Mode of Assessment) -

दक्षता/कलाकृतिः	आकलनविधिः	आकलनकर्ता	श्रेयोऽङ्कः
विद्यालयस्य अवलोकनसन्दर्भे सक्रियभागग्रहणं तत्र संलग्नता च ।	अवलोकनानि	शिक्षकप्रशिक्षकः	**0.5**
विद्यालयस्य इतिवृत्तम्	प्रस्तुतिः प्रतिफलितम्	शिक्षकप्रशिक्षकः	**1.5**

अधिगमपरिणामः (Learning Outcomes)

छात्राध्यापकाः /छात्राध्यापिकाः अधोलिखितेषु विषयेषु समर्थाः भविष्यन्ति । यथा -

- विभिन्नविद्यालयप्रणाल्यः विश्लेषयितुम्
- विद्यालयस्य प्रक्रियां परिपाटिं सङ्कलितवातावरणं च विश्लेषयितुम्
- विद्यालयप्रणाल्या सम्बद्धैः मानवीयतत्त्वैः / हितधारकैः समन्वयभावं प्रतिष्ठापयितुम् , विद्यालये विभिन्नक्रियाकलापानाम् आयोजनदशां वर्णयितुम्
- विद्यालयस्य सौकर्याणि व्याख्यातुम् (कक्षाः, ग्रन्थालयाः, प्रयोगशालाः, क्रीडाङ्गणम्, स्वच्छता, जलपानसौकर्यम्, मध्याह्नभोजनव्यवस्था, समावेशात्मकसौकर्यम्, सुरक्षासंरक्षणानि, वृष्टिजलसंरक्षणसौविध्यम् इत्यादीनां विषये)
- विद्यालये उपलभ्यमानानाम् उपयुज्यमानानां च सूचनासम्प्रेषणप्रविध्योः शिक्षणाधिगमप्रबन्धनानां विषये निगदितुम्
- उपलभ्यमानानाम् अभिलेखानां UDISE दत्तांशानां च भौतिकरूपेण वैद्युतिकरूपेण च सङ्कलयितुम्
- हितधारकाणां पारस्परिकसम्बन्धं वर्णयितुम्
- विविधेषु विद्यालयेषु क्रियान्वितानाम् आकलनप्रक्रियाणां विश्लेषणं कर्तुम्
- अवलोकितविद्यालयस्य (कक्षाप्रक्रियाभिः सहैव) विस्तृतम् इतिवृत्तं सज्जीकर्तुं प्रस्तुतीकर्तुं च

विद्यालयावलोकनप्रतिवेदने योज्याः बिन्दवः

- विद्यालयवृत्तम् (इतिहासः , दृष्टिः सृष्टिः , शिक्षासमित्या सह सम्बद्धता)
- विद्यालयस्य भवनसौकर्याणि
- विशिष्टावश्यकतायुक्तानां दिव्याङ्गानां च सौविध्यानि
- सर्वस्तरेषु समावेशात्मकता

- शिक्षकच्छात्रयोः अनुपातः
- शिक्षणाधिगमप्रक्रियाः -
    6. शैक्षणिकयोजना
    7. कक्ष्याक्रियाकलापाः
    8. आकलनम्
- विद्यालयविकासयोजना
- शैक्षणिकदैनन्दिनी
- प्राशासनिकप्रक्रियाः , तत्र
    1. छात्राभिलेखसङ्ग्रहः
    2. शिक्षकाभिलेखसङ्ग्रहः
- सांस्कृतिककार्यक्रमाः
- क्रीडाकार्यक्रमाः
- वार्षिकोत्सवः
- राष्ट्रियाः सामाजिकाश्च कार्यक्रमाः
- विद्यालयस्य प्रबन्धनम्
- विद्यालयस्य अनुशासनम्
- पारस्परिकः सहसम्बन्धः
- विभिन्नप्रकारकाः छात्राः (छात्राणां सामाजिकार्थिकाः दशाः क्षमताश्च) तेषाम् आवश्यकताश्च
- सूचनासम्प्रेषणप्रविध्योः शिक्षणाधिगमप्रबन्धनानां विकासः
- सामाजिकानाम् अभिभावकानां च विद्यालयगतिविधिषु समावेशः
- कार्यालयप्रबन्धः
- आकलनप्रक्रियायाः सौविध्यानुप्रयोगव्यवस्थाः 360 कोणस्य सङ्कलितमाकलनम्
- विद्यालयस्य समग्रप्रगतिः (योजना, सङ्घटना, नियुक्तिः , निर्देशः, अभिप्रेरणम् , नियन्त्रणम्)
- प्रत्याह्वानानि पुरोगतिश्च

6.3 विद्यालयाधारिता शोधपरियोजना

सत्रार्धः – 7 **श्रेयोऽङ्काः – 02**

पाठ्यपरिचयः (About the course)

क्रियात्मकानुसन्धानं शिक्षकान् स्वमत्या अपेक्षानुगुणं नूतनपद्धतीनामाविष्काराय योग्यान् विधत्ते। कक्ष्यानिर्वहणस्य प्रगत्यर्थं ते नियन्त्रितपरिस्थितौ प्रायोगिकपरीक्षणं कुर्वन्ति। क्रियात्मकानुसन्धाने कक्ष्यानुसन्धानस्य तथा व्यक्तिवृत्ताध्ययनस्य च ज्ञानं शैक्षिकसंस्थासु छात्राध्यापकाधिगमपरिस्थितेः वृद्धिं कल्पयति। शैक्षिकसंस्थासु वाससमये अधिगमप्रक्रियायां तेषां सहभागित्वं नितरां सार्थकं भवति। छात्राध्यापकानां मध्ये व्यक्तिशः अथ सहयोगात्मकरूपेण वा इदमनुसन्धानं भवितुमर्हति। क्रियात्मकानुसन्धानं व्यक्तिवृत्ताध्ययनं च विद्यालयस्तरीयमनुसन्धानं भवति यत् शैक्षिकसन्दर्भाणामनुभवानां प्रमाणिकतां वर्धयति। द्वयमिदं समस्यानां समाधानगवेषणं विधाय सिद्धान्तविकासे योगदानं करोति। एतौ द्वौ विधी तार्किकचिन्तनं, समस्यासमाधानं सहभागित्वं नैतिकनिर्णयकरणकौशलञ्च परिपोषयतः। प्रशिक्षुतायै छात्राध्यापकाः विद्यालयान् प्रति प्रेष्यन्ते। प्रशिक्षुता छात्रेभ्यः सैद्धान्तिकज्ञानावगमने, प्रविधीनां विधीनाम् उपागमनाञ्च यथार्थकक्ष्यापरिस्थितौ अनुप्रयोगे वेदिकां कल्पयति। एषा छात्राध्यापकान् गभीरशिक्षणानुभवप्राप्तौ, योजनानिर्माणे सहायसामग्रीनिर्माणे, अन्यविद्यालयीयगतिविधीनां निर्वहणे च (यानि कार्याणि स्थायिशिक्षकाः निर्वहन्ति) योग्यान् करोति। छात्राध्यापकाः व्यावस्थितरूपेण विद्यालयपरिस्थितिगतसमस्यानां प्रत्याह्वानानाञ्च निवारणाय अनुसन्धानं कुर्वन्ति। प्रशिक्षुताकाले छात्राध्यापकाः विद्यालयीयविभिन्नगतिविधिषु निमग्नाः सन्तः विद्यालयानुभवान् प्रत्याह्वानानि च अभिज्ञाय उचितहस्तक्षेपाय योजनां निर्मान्ति, विश्लेषणं कुर्वन्ति, प्रतिवेदनञ्च निर्मान्ति।

अधिगमोद्देश्यानि

छात्राध्यापकाः –

- सान्दर्भिकसमस्यामभिज्ञाय उचितानुसन्धानरूपरेखां निर्मास्यान्ति।
- विद्यालयाधारितानुसन्धानाय एकां कार्ययोजनां सज्जीकरिष्यन्ति।
- उचितदन्तांशसंग्रहणाय उपकरणानि प्रविधीश्च विकासयिष्यन्ति।
- दत्तांशान् संगृह्य विश्लेष्य च कारणानि अभिज्ञास्यान्ति।
- समस्यानां सम्मुखीकरणाय अपेक्षितहस्तक्षेपं विधास्यन्ति।
- हस्तक्षेपस्य प्रभावविषये अध्ययनं विधास्यन्ति।
- विद्यालयाधारितानुसन्धानानुभवान् प्रतिवेदन-प्रस्तुतिद्वारा प्रकाशयिष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	विद्यालयाधारिता शोधपरियोजना	20 hr	0	12 hr.	2

प्रवचनप्रक्रिया (Mode of Transaction)

विद्यालयाधारितानुसन्धानप्रायोजनायामधोनिर्दिष्टरणनीतयः उपयोक्ष्यन्तेः –

- समस्यानामभिज्ञानाय, तत्समाधानाय हस्तक्षेपस्य विकासज्ञानार्थञ्च छात्राध्यापकैः विद्यालयाध्यक्षेण, मार्गदर्शकैः समवयस्कैः च साकं परिचर्चा।
- मार्गदर्शकैः छात्राध्यापकैः च सह चर्चां विधाय विद्यालयाधारितानुसन्धानप्रायोजनाप्रस्तावस्य अन्तिमरूपनिर्माणम्।
- अभिलेखाविश्लेषणं, सम्बद्धैः सह अन्तःक्रिया तथा क्षेत्रसन्दर्शनम्।
- विद्यालयकेन्द्रितानुसन्धानस्य फलितांशस्य प्रस्तुतिः वितरणञ्च।

विषयवस्तु

पूर्वतनसत्रार्धेषु छात्राध्यापकौः विभिन्नपाठ्यक्रमः यथा शिक्षायाः आधाराः, मुख्यशास्त्रीयविषयाः विशिष्टशिक्षाशास्त्रविषयाः कौशलोन्नयनविषयाः मूल्याधारितविषयाः च अपठ्यन्त। क्रियात्मकानुसन्धानस्य व्यक्तिवृत्ताध्ययनस्य च सम्प्रत्ययः महत्त्वञ्च, अनुसन्धानस्य निर्वहणस्य सोपानानि, (उद्देश्यं, विधिः, अनुसन्धानप्रारूपं, प्रारूपोपकरणानि, दत्तांशसंग्रहणं, दत्तांशविश्लेषणञ्च) प्रतिवेदनलेखनञ्च।

अनुसन्धानसमस्या विद्यालयस्य दैनन्दिनशिक्षणाधिगमप्रक्रियातः चेष्यते।
कतिचन प्रमुखक्षेत्राणिः –

- अधिगमप्रगतिः तथा विभिन्नविषयाणां परिणामः।
- विद्यालयाधारिताकलनम्।
- अधिगन्तृवैविध्यं समावेशश्च।
- कलासु क्रीडासु च प्रतिभागित्वम्।

आकलनप्रक्रिया (Mode Assessment)

विद्यालयाधारितानुसन्धानस्य आकलनप्रक्रिया अनुस्यूतं प्रचलिष्यति। छात्राध्यापकाः मार्गदर्शकाश्च आकलनप्रक्रियायां भागभागिनः भविष्यन्ति। छात्राध्यापकान् आकलयितुमधोनिर्दिष्ट स्तरमापन्यः प्रयुज्येरन्।

योग्यता/उपकरणम्	आकलनविधिः	आकलिताः	श्रेयोऽङ्काः
क्रियात्मकानुसन्धानस्य निर्वहणसमये निरीक्षणम्	निरीक्षणम्	छात्राध्यापकाः	0.5
अनुसन्धानप्रतिवेदनम्	प्रतिवेदनप्रस्तुतिः	छात्राध्यापका (त्रयाणां विदग्धानां समूहः)	1.5

अधिगमपरिणामाः (Learning Outcomes)

छात्राध्यापकाः –

- विद्यालयाधारितानुसन्धाननिर्वहणाय छात्राध्यापकाः सन्दर्भोचितसमस्यां, उचितानुसन्धानप्रारूपं, कार्ययोजनाञ्च प्रस्तोष्यन्ति।
- उपयुक्तदत्तांशसंग्रहणाय उपयुज्यमानानि उपकरणानि प्रविधयश्च उपस्थापयिष्यन्ति।

- समस्याकारणानि अभिज्ञातुमुपयुक्तान् विश्लेषितदत्तांशान् क्रोडीकरिष्यन्ति।
- हस्तक्षेपस्य प्रभावं प्रस्तोष्यन्ति।
- प्रतिवेदनद्वारा प्रस्तुतिद्वारा च विद्यालयाधारितानुसन्धानानुभवान् इतरेषु वितरिष्यन्ति।

6.4 शिक्षणप्रशिक्षुता

सत्रार्धः – 7 **श्रेयोङ्कः - 10**

पाठ्यपरिचयः (About the course)

अध्यापकसिद्धताकार्यक्रमः मननशील तथा अनुभवाधारित प्रक्रिया विद्यते। प्रयोगाभ्यासकाले छात्राध्यापकाः विभिन्न प्रकारेण विद्यालयेषु, अध्यापकेषु, छात्रेषु तथा अन्यजनेषु सम्बन्धिताः भवन्ति। सैद्धान्तिकस्य तथा शिक्षणशास्त्रस्य अनुभवानां प्रयोगाय निर्दिष्टं (कल्पितं) कार्यक्षेत्रमस्ति। प्रयोगाभ्यासकाले छात्राध्यापकाः निर्दिष्टेषु विद्यालयेषु समूहेन विद्यालयस्य कार्यक्रमेषु अङ्गभूताः भवन्ति। प्रशिक्षुतासन्दर्भितानुभवेन छात्राध्यापकाः निर्दिष्टविद्यालयाध्यापकानां कक्षावलोकने, स्वयमेव पाठने, छात्रैः सह सम्बद्धस्थापने, विद्यालयकार्यक्रमाणां निर्वहनम् विद्यालयप्रशासनसम्बन्धितअभ्यासादीनां (यथा प्रवेशसम्बन्धितपत्राणि, वार्षिकयोजनाः, मासिककार्यक्रमाः) निर्वहनम् इत्यादि। तेन गहनाभ्यासः शिक्षणे, योजनायाम्, शिक्षणसामग्रीणां निर्माणे, कक्षागतपरामर्शाः आकलने, मननशीलरूपेण स्वीयानुभवानाम् आत्मावलोकने गहनाभ्यासः भवति। छात्राध्यापकाः विविधसन्दर्भानामवगमने, विद्यालयाध्यापकानां भूमिका निर्वहनकौशलानाम् अनुभवप्राप्तिः। प्रशिक्षुताप्राप्त्यनन्तरं छात्राध्यापकाः स्वतन्त्ररूपेण उत्तरदायित्वस्वीकरणे सक्षमाः भविष्यन्ति।

विचारोत्तेजकसंरचना -

एकीकृतशिक्षकशिक्षा (ITEP) पाठ्यक्रमे सप्तमसत्रार्धे प्रशिक्षुताकार्यक्रमे छात्राध्यापकाः विद्यालयेषु प्रयोगाभ्यासाय गमिष्यन्ति। एकीकृतशिक्षकशिक्षापाठ्यक्रमस्य संचालनसंस्थाः स्वेच्छया निर्णीतुं शक्नुवन्ति।

- चत्वारि दिनानि विद्यालयेषु एवं दिनद्वयं यावत् ITEP संस्थायाम् उपस्थिताः भविष्यन्ति।
- षट् सप्ताहाः निर्दिष्टविद्यालये तथा सप्ताहत्रयं ITEP संस्थायाम्, एवं षट् सप्ताहाः अन्यस्मिन् विद्यालये उपस्थिताः भविष्यन्ति। (अधिकांशतः द्वयोः विद्यालययोः चयनं भवतु इति)।
- सप्ताहत्रयं ITEP संस्थाने तथा द्वादशसप्ताहपर्यन्तं द्विविधविद्यालये उपस्थिताः भविष्यन्ति।
- ITEP छात्राः स्वेच्छया स्थानीय परिस्थित्यानुगुणं द्वादशसप्ताहकालं यावत् प्रशिक्षुता कार्यक्रमस्य संचालनं कर्तव्यम् इति।

अधिगमोद्देश्यानि

प्रशिक्षुता कार्यक्रमस्य पूर्त्यनन्तरं छात्राध्यापकाः सक्षमाः भविष्यन्ति –

1. विद्यालयस्य कार्यपद्धतिविषये पूर्णतया व्याख्यातुम्।
2. विद्यालये अध्यापकानां विविध भूमिकानिर्वहनविषये वर्णनितुं प्रोत्साहयितुं च शक्नुवन्ति।
3. प्रभावपूर्णशिक्षणे अध्यापकानाम् अनुभवानाम्, गुरुशिष्यसम्बन्धस्य मुख्यत्वस्य प्रतिपादने।
4. वयानुगुणशिक्षणशास्त्रकौशलानां विकसने।
5. वास्तविक कक्षासन्दर्भे विविधशिक्षणशास्त्रस्य अनुप्रयोगे।
6. उपयुक्त शिक्षणाधिगमसामग्रीणां निर्माणे।
7. आवश्यकयोजना तस्य क्रियान्वयनकौशलानां विकसने। (यथा - प्रार्थनासभा, उत्सवाः, सांस्कृतिक - कार्यक्रमाः)
8. विद्यालय-अध्यापक-अभिभावक-समाजसम्बन्धस्य प्रतिपादने।

9. हितैषिणाम् उत्तमाभिप्रायाणाम् प्राप्तिः, एवं विद्यालये तेषां भूमिकायाः अवगमने।
10. छात्राणां शैक्षिककौशलानां, योग्यतायाः, प्रशिक्षणस्य, अनुभवानां समावेशः (Portfolio) निर्माणे तथा 360° समग्रप्रगतेः प्रतिवेदने।
11. विद्यालयस्य विविधाभिलेखानां मुख्यत्वं तथा संरक्षणविषये चर्चायाम्।
12. शोधकार्ये अभिरूचेः तथा क्षमतायाः विकासः तेन विद्यालये प्रशिक्षुताकार्यक्रमे सक्षमाः भविष्यन्ति। सन्दर्भित/सम्स्याधारित क्रियात्मकानुसन्धाने।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	शिक्षणे प्रशिक्षुता	-	-	160 hr.	10

प्रवचनप्रक्रिया (Suggestive Mode of Transaction)

1. अवलोकनम्।
2. अन्तः क्रिया।
3. चर्चा।
4. कक्षाशिक्षणम्।
5. विश्लेषणं प्रतिवेदनञ्च।
6. सम्बद्धप्रलेखानां तथा आधारसामग्रीणां संग्रहणम्।

विषयवस्तु

1. शिक्षणशास्त्रम्-विविधपद्धतयः-व्यूहरचना।(प्रत्यक्षविधिः,अभिनयविधिः)
2. पाठयोजना।(मध्यस्थ स्तराणां कृते भवेत्)
3. समवयस्कानां पाठसमीक्षणम्।
4. अतिरिक्तकक्षायाः प्रबन्धनम्।
5. शिक्षणाधिगमे विविधशिक्षणाधिगमसामग्रीणाम् (सूचना सम्प्रेषणेन प्रविधेः साकम्) उपयोगः।
6. उपलब्धिपरीक्षा।
7. नैदानिकपरीक्षा।
8. उपलब्धिपरीक्षा परिणामस्य विश्लेषणम्।
9. प्रार्थनासभाक्रियाकलापाः।(नीतिश्लोकानां वाचनम् ,वार्ताः)
10. क्रियात्मकानुसन्धानं व्यक्तिवृत्ताध्ययनञ्च।

क्रियाकलापाः

छात्राध्यापकाः स्तराधारितक्रियाकलापेषु भागग्रहणम्। **विद्यालयकार्यक्रमेषु भागग्रहणम्**

1. प्रशिक्षुताकाले विषयानुसारम् उपदेशकानाम् (Mentors) सान्निध्ये 6,7 तथा 8 कक्षासमयसारिण्याः अनुसारेण पाठयोजनायाः निर्माणं कर्तव्यम्।

2. दिनत्रयात्मकेकाले विद्यालयसन्निवेशेन परिचयेन विद्यालयाध्यापकानां कक्षाशिक्षणस्य अवलोकनं कर्तव्यम्।

3. न्यूनातिन्यूनं 80 पाठयोजनाः (40+40) पाठनीयाः। सामान्यतया (2+2) कमपि विषयमाधारीकृत्य पाठनस्य प्रारम्भः करणीयः, तेन क्रमशः आत्मविश्वासः जायते। अन्तिम पञ्चपाठयोजनाः निर्दिष्टविषयेषु सम्पूर्णतया पाठयोजनानुसारं पाठयेत् -
   - पाठयोजनायां सक्रियचिन्तनस्य, मननशीलचिन्तनस्य, समस्यासमाधानपुरस्मरम्, अधिगमभेदानाधारेण, संश्लेषणेन, वास्तविकजीवने सामान्यीकरणमपि आवश्यकम्।
   - पाठयोजनायां मूलभूतभारतीयज्ञानपरम्परायाः, चरित्रनिर्माणविषये सुस्थिरतायाः, समतायाः साकम्, पर्यावरणाभिज्ञतायाः, विश्वनागरिकतायाः योगदानमपि अपेक्ष्यते।
4. पाठाभ्यासादनन्तरं पर्यवेक्षकानां, सहपाठीनाम् उपदेशकानां साकं चर्चाकरणीया।
5. सहपाठिनां पाठाभ्यासानाम् अवलोकनं तथा समूहे चर्चा अपि करणीया।
6. प्रयोगशाला कार्यक्रमाणामायोजनम् (यथा अटल चिनतनप्रयोगशाला, भौतिक, रसायनविज्ञानम्, जीवविज्ञानम्, गणितम्, भाषाप्रयोगशाला, सामाजिकविज्ञानम्, संङ्गणक) क्रीडा, कला तथा शिल्प क्रियाकलापाः।
7. छात्रसहायतासेवायां नियोजनम्, निर्देशनं तथा उपबोधनम्, (NCC) राष्ट्रिय कैडेट कोर, राष्ट्रिय सेवायोजना (NSS), स्वास्थ्य तथा शरीरेण, मनसा, आत्मना स्वस्थ (Wellness) (कल्याण) कार्यक्रमाः।(योगासनानां शिक्षणं ,सम्भाषणशिबिरम्)
8. शिक्षणशास्त्रपाठ्यक्रमे सूचनासम्प्रेषणप्रविध्याधारितशिक्षणाधिगमसामग्रीणां निर्माणम्।
9. आकलनस्य योजना, रचनात्मकं तथा योगात्मकम् आकलनोपकरणानां निर्माणम्, पालितांशानां विश्लेषणञ्च।
10. अधिगमाधारितकाठिन्यानामवगमनेन निदानात्मकपरीक्षणस्य प्रस्तुतिः एवं प्रदत्तानां विश्लेषणं तथा अधिगमे वृद्ध्यर्थं योजनायाः निर्माणम्।
11. अतिरिक्तकक्षाशिक्षणानुभवः।
12. शैक्षिकक्रियाकलापेषु तथा ग्रन्थालयकार्येषु भागग्रहणम्।
13. अध्यापकविकासकार्यक्रमेषु, प्रशिक्षणक्रियाकलापेषु भागग्रहणम्।
14. विद्यालयप्रार्थनासभायाः सञ्चालनं तथा विभिन्नक्रियाकलापानाम् आयोजनम् (संस्कृत कार्यक्रमः, क्रीड़ा, योग तथा अन्य प्रगतिशीलकार्यक्रमाः)
15. प्रशिक्षुतासन्दर्भे शिक्षकाभिभावक उपवेशने भागग्रहणम्।
16. प्रशिक्षुतासन्दर्भे विद्यालयप्रबन्धनसमितेः उपवेशने भागग्रहणम्।
17. विद्यालयप्रगत्यर्थम् अभिभावकानां तथा सामाजिकव्यस्तथाकार्याणाम् अध्ययनम्।
18. क्रियात्मकानुसन्धानस्य/व्यक्तिवृत्ताध्ययनस्य आयोजनम्।

19. छात्रविवरणस्य (Portfolio) निर्माणम्।

20. मननशीलरूपेण दैनन्दिन्याः लेखनम्। प्रतिवेदन दृशा विशिष्य क्रियाकलापानां प्रतिपादनम्।

आकलनाय प्रस्तावित प्रक्रियाः-

प्रशिक्षुता सन्दर्भे कृतानां क्रियाकलापानाम्/कौशलानाम् आकलनम् एवं योजना सारणीमाध्यमेन दत्तमस्ति –

क्षमता/निरोपित साक्षी	**आकलनपद्धतिः**	**आकलनकर्ता**	**श्रेयोऽङ्कः**
मध्यस्तरे कक्षागताभ्यासस्य अवलोकनम्।	• न्यूनातिन्यूनं षट् कक्षाः (3+3) विद्यालयीयाध्यापकानां कक्षावलोकनं कर्तव्यम्। • न्यूनातिन्यूनं दशकक्षाः सहपाठीनां (5+5) अवलोकनं कर्तव्यम्।	अध्यापकप्रशिक्षकाः	मूल्याङ्कनं नास्ति।
मध्यस्तरे एककानां योजना, पाठयोजना, प्रवचनप्रक्रिया	• 40 पाठाः प्रवचनरूपेण निर्दिष्ट शिक्षणशास्त्रविषये। • एककानां योजना एवं पाठयोजना। • न्यूनातिन्यूनं शिक्षणशास्त्रविषये द्वयोः अन्वेषणात्मक पाठयोजनायाः निर्माणम् (कक्षाश्रावणम्, नाट्कम् कला एवं शिल्पादि प्रविध्याधारेण)	अध्यापकानां प्रशिक्षकाः एवं विद्यालय उपदेशकाः	6.0
आकलनयोजना तथा प्रयोगः	• पाठितप्रत्येकं पाठस्य आकलनयोजनानिर्माणम्। (उदा. पाठयान्तर्गतप्रवचने अन्तिमव्यवहाराणां/क्रियाणाम्) • रूपरेखा निर्माणम् (एकस्य/द्वयोः शिक्षणशास्त्रविषययोः) तथा आकलनोपकस्य निर्माणम्। • द्वयोः शिक्षणशास्त्रविषययोः एककानां परीक्षणं तथा फलितांशानां विश्लेषणम्। • छात्राधिगमे अभिवृध्यर्थं योजना (द्वयोः शिक्षणशास्त्रविषययोः)	अध्यापकनां प्रशिक्षकाः एवं विद्यालय उपदेशकाः	1.5

विद्यालयस्तरे प्रार्थनासभायां योगदानम्/संगठनम् क्रियाकलापाः, यथा शिक्षकाभिभावक - उपवेशनम्/विद्यालय - प्रबन्धनसमितेः उपवेशनम् आदि। विद्यालयस्तरे प्रार्थनासभायां योगदानम्/संगठनम् क्रियाकलापाः यथा	अवलोकनम्/अन्तःक्रिया संस्थापनम्	विद्यालयउपदेशकाः	0.5
कार्यपिञ्चका/अध्यापक दैनन्दिनी निर्माणम् शिक्षणशास्त्रपद्धत्या न्यूनातिन्यूनं पञ्च (5) पाठानां निर्माणम्।	समीक्षणम्	अध्यापकप्रशिक्षकाः एवं विद्यालय उपदेशकाः अध्यापकप्रशिक्षकाः एवं विद्यालयउपदेशकाः	0.5
विद्यालयप्राचार्येण प्रशिक्षुता छात्राध्यापकानां मूलभूत पृष्टपोषणम्	अन्वेषणम् एवम् अन्तःक्रिया संस्थापनम्	विद्यालयप्राचार्याः	0.5
शिक्षणशास्त्रपद्धत्या पाठद्वयस्य परीक्षणम्	प्रस्तुतीकरणम्	अध्यापकप्रशिक्षकाः	1.0

हितैषिणामुत्तरदायित्वम्

एकीकृतशिक्षकशिक्षाकार्यक्रमसंस्थाधिकारिणाम् उत्तरदायित्वम् -

- प्रशिक्षुताकार्यार्थं वाञ्छित (संख्यया) आवश्यकविद्यालयानां चयनम्/अवबोधः।
- विद्यालयेन साकं सहमतिपत्रे हस्ताक्षरम्।
- एकीकृतशिक्षकशिक्षाकार्यक्रमसंस्थायाः तथा विद्यालयेनसाकम् आवश्यकप्रपूर्त्यर्थं चिन्तनम्।
- प्रशिक्षुताकार्यक्रमस्य समन्वयकस्य परिचयः/अवगमनम्।
- समस्तविद्यालयकार्यक्रमानुभवानां प्रगतेः पर्यवेक्षणम्। प्रशिक्षुताकार्यक्रमस्य समन्वयकस्य परिचयः अवगमनम्।
- समस्तविद्यालयकार्यक्रमानुभवानां प्रगतेः पर्यवेक्षणम्।

एकीकृताशिक्षकशिक्षाकार्यक्रमसंस्थाध्यापकप्रशिक्षकानां भूमिका -

- छात्राध्यापकानां पाठयोजनानिर्माणे, क्रियाकलापेषु, आकलने, सहपठिनां पाठानामन्वेषणे, क्रियात्मकानुसन्धाने, विद्यालयकार्यक्रमाणां प्रबन्धे, प्रतिवेदनप्रस्तुतीकरणे, शिक्षणाधिगमसामग्रीणां निर्माणे मार्गदर्शनं कर्तव्यम्।

- प्रतिदिनं पाठनात्पूर्वं तथा पाठनादनन्तरं चिन्तनं कर्तव्यम्।
- शिक्षणप्रगत्यर्थं संस्थया निर्मिता आकलनपत्रे प्रतिदिनं पृष्टपोषणरूपेण/उपदेशात्मकरूपेण कक्षा पाठनसन्दर्भे पूरणीयम्।
- पर्यवेक्षणप्रतिवेदनं संस्थासु समये प्रदेशम्।
- छात्राध्यापकानां प्रगतिविषये उपदेशकानां तथा छात्राध्यापकानां साकं मध्ये मध्ये परिचर्चासत्रस्य आयोजनं कर्तव्यम्। तेन वाञ्छित प्रगतिविषये अवबोधः करणीयः।

विद्यालयप्राचार्याणां भूमिका

- प्रशिक्षुताकार्यक्रमस्य प्रथमदिने प्रार्थनासभायां विद्यालयाध्यापकानां तथा छात्राणां छात्राध्यापकजनानां विषये परिचयः करणीयः।
- छात्राध्यापकानां स्तरानुगुणं कक्षास्वीकरणं व्यवस्थापनम् (मूलभूतम्, प्रारम्भिक, मध्य तथा माध्यमिकस्तरे)
- प्रशिक्षुताकार्यक्रमान्तर्गतेन समयसारिण्याः, पाठयोजनायाः, क्रियाकलापानाम्, प्रदत्तकार्याणाम्, समन्वयः करणीयः।
- उपदेशकानाम् अथवा समूहेनेतुः द्वारा निर्दिष्ट उपस्थिति पञ्जिकायां पर्यवेक्षणदृष्ट्या हस्ताक्षरम्।
- सुगमतया छात्राध्यापकानां पाठाभ्यासस्य, प्रदत्तकार्याणां सम्पादने व्यवस्थायाः सम्पादनम्।
- अत्यावश्यकपरिस्थितिषु छात्राध्यापकानां विरामस्य अवकाशकल्पनम्।
- विद्यालयकार्यक्रमेषु छात्राध्यापकानां समावेशः।
- छात्राध्यापकानां प्रगतेः तथा तेषां काठिन्यानां निवारणार्थं चरणसमाप्तिसन्दर्भे चिन्तनम्/चर्चा।
- प्रशिक्षुताकार्यक्रमान्ते छात्राध्यापकद्वारा निर्मिते प्रतिवेदने, क्रियाकलापेषु, आलेखेषु हस्तक्षरम्।
- छात्राध्यापकानां प्रदर्शविषये अभिप्रायाणां प्रतिपादनम्।
- प्रशिक्षुताकार्यक्रमस्य प्रगतिविषये परामर्शाः एकीकृताशिक्षकशिक्षासंस्थायाः प्रदेयाः।

उपदेशकानां भूमिका

1. छात्राध्यापकानां विस्तृतपाठयोजनायाः, संक्षिप्तपाठयोजनायाः, क्रियाकलापानां योजना, प्रदत्तकार्याणां मार्गदर्शनम्।
2. कक्षाध्यापनात्पूर्वं पाठयोजनायाः समीक्षणम्।
3. छात्राध्यापकानां कक्षाध्यापनस्य निरीक्षणम्।
4. छात्राध्यापकद्वारा प्रदत्तपाठयोजनापुस्तिकायां विशिष्टांशान् उल्लेखनीयम्।
5. सततरूपेण छात्राध्यापकानां प्रगात्यर्थं पाठने तथा क्रियाकलापेषु प्रतिवृष्टिः देया
6. प्रतिदिनं पाठनानन्तरं चिन्तनं कर्तव्यम्।
7. सहपाठीनां कक्षावलोकनानन्तरं निर्दिष्टप्रपत्रे हस्ताक्षरं कर्तव्यम्।
8. छात्राध्यापकानां तथा पर्यवेक्षकानां साकं मध्येमध्ये सभायाः आयोजनम्। तेन छात्राध्यापकानां प्रगतिविषये काठिन्यानां विषये अनुभवानां विषये अवबोधः करणीयः।

छात्राध्यापकानां भूमिका
अतिरिक्तसमये भाषाक्रीडानां प्रयोगः
मध्यस्तरछात्राणां विषये ज्ञानार्जन सर्जनात्मकविकास विषये प्रयासः
भाषाकौशलानां विकासे ध्यानं देयम्

- प्रशिक्षुताकार्यक्रमस्य प्रारम्भात्पूर्वं (न्यूनाति न्यूनं एकदिनात् पूर्वं) विद्यालयप्राचार्याणां सविधे उपस्थित्या निवेदनं कर्तव्यम्।
- प्रशिक्षुताकार्यक्रमस्य प्रथमदिने विद्यालयस्य उपदेशकानां द्वारा प्रदत्तसमयसारिण्याः, स्तरानुगुणविषयस्य (शीर्षकस्य), अनुगुणं कार्यसम्पादनम्।
- विद्यालयपद्धत्यनुगुणम् उपस्थितेः संस्थापनम्।
- पर्यवेक्षकानाम्/उपदेशकानुगुणं प्रदत्तकार्याणां/क्रियाकलापानां योजना कर्तव्या।
- काठिन्यपरिस्थितौ उपदेशकानां/पर्यवेक्षकानां सहयोगः स्वीकरणीयः।
- पाठनात्पूर्वं पाठयोजनायाः समीक्षणं तथा पर्यवेक्षकस्य/उपदेशकस्य अनुमतिः स्वीकरणीयः।
- विद्यालयसमयसारिण्यनुगुणं कक्षाशिक्षणं कर्तव्यम्।
- विद्यालयपक्षतः निर्दिष्टकार्येषु भागग्रहणम्, अतिरिक्तकक्षाध्यापनञ्च।
- विद्यालयेन निर्दिष्ट वेषभूषणस्य तथा अनुशासनस्य च पालनं कर्तव्यम्।
- अत्यावश्यकपरिस्थित्यां विरामविषये पूर्वानुमतिः स्वीकरणीयः।
- नूतनाविष्करणानाम्, आह्वानानां, मननशीलरीत्या प्रगतेः विषये दैनन्दिनि लेखनमावश्यकम्।
- नूतन विशिष्टशैक्षिकक्रियाकलापेषु प्रयोगात्पूर्वम् उपदेशकानां साकं परामर्शः स्वीकरणीयः।
- अनुमतिप्राप्तस्वीयपाठयोजनानुसारं विद्यालयछात्राणां शैक्षिकक्रियाणां सम्पादनं कर्तव्यम्।
- विद्यालयीयाध्यापकानां तथा छात्राणां साकं सौहार्दपूर्ण सम्बन्धस्थापनम्।
- सहपाठीनां साकं वार्तालापसन्दर्भे विद्यालयस्य तथा विद्यालयसम्बन्धितानां विषये नकारात्मकाभिप्रायाणाम् तिरस्कारः करणीयः।
- पर्यवेक्षकाणाम्/उपदेशकानां पार्श्वे एकस्य छात्रस्य पार्श्वचित्रं समर्पणीयम्।
- प्रशिक्षुता कार्यक्रमस्य समाप्तेः पूर्वमेव विद्यालयपाठयपुस्तकानाम्, उपकरणानां विद्यालये प्रत्यर्पणं कर्तव्यम्।

6.5 उत्तरप्रशिक्षुता (समीक्षा विश्लेषणञ्च)

सत्रार्द्धः - 8 **श्रेयाङ्कः - 02**

पाठ्यपरिचयः (About the Course)

सप्तमप्रशिक्षुतोत्तरकार्यक्रमस्य सफलसमाप्त्यनन्तरं छात्राध्यापकाः सहपाठिभिः सह तेषामनुभवानां चर्चा-अनुभवेषु चिन्तन-प्रशिक्षुताकाले विकसितकलाकृतीनां परिष्करणं कृत्वा - अष्टमप्रशिक्षुतोत्तरकाले विस्तृतप्रशिक्षुताप्रतिवेदनादीनां सङ्कलनं कुर्वन्ति।

अधिगमस्य उद्देश्यानि - गतिविधीनां समाप्त्यनन्तरं छात्राध्यापकाः/क्षमाः भवेयुः-

- विद्यालयीयपारिस्थितिकतन्त्रस्य विस्तृतावबोधस्य च विकासज्ञानम्।
- प्रशिक्षुताकाले प्राप्ताधिगमानां वर्णनं सहपाठिभिः समकक्षे शिक्षकप्रशिक्षकाणां पुरतः प्रस्तुतीकरणम्।
- प्रत्येकं गतिविधेः विषये अधिगमानुभवान् एकत्रीकृत्य विद्यालयप्रशिक्षुताविषयकं योग्यतासम्पादनम्।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	उत्तरप्रशिक्षुता (समीक्षा विश्लेषणञ्च)	20 hr	0	12 hr.	2

व्यवहारस्य परामर्शत्मिका पद्धतिः

- चर्चा
- प्रस्तुतिः/ प्रदर्शनी
- प्रतिवेदनलेखनम्

क्रियाकलापाः

अनुभवप्रसारः (प्रतिबिम्बिताधिगमः) चिन्तनात्मकाधिगमः।

- चिन्तनशीलपत्रिकासारांशस्य प्रस्तुतिः।
- प्रत्येकं छात्राशिक्षकद्वारा कृता अधिगमयात्रा।
- प्रदर्शनी TLMs - विद्यालयगतिविधिषु सहभागितायाः प्रदर्शनम् (चित्र-कलादि विषयेषु), छात्रशिक्षकद्वारा प्रशिक्षुताकाले निर्मिताः अन्यकलाकृत्यः।
- उत्तमप्रथानां परम्पराणां प्रसारः (PPT/Videos).
- अभिभावकेभ्यः समुदायेभ्यश्च स्थानीयकथानां कवितानाञ्च सर्वेक्षणं संग्रहणं च। (आधारभूतविषयसन्दर्भे)
- अभिभावकस्य समुदायस्य च कृते एकस्याः प्रशिक्षककार्यशालायाः आयोजनम्।

- स्वयंसेवकरूपेण कार्यकरणाय प्रोत्साहनम्।
- अभिभावकस्य समुदायस्य च कृते FLN (Foundational Literacy and Numeracy) सन्दर्भे जागरूक-अधिमार्गकार्यक्रमव्यवस्थाः- FLN सन्दर्भे विशिष्टक्रियाकलापानां संचालनविषये अभिभावक-समुदायेभ्यः सह भूमिकानिर्वाहः।
- FS (Foundation Stage) प्राथमिकस्तरबालकानां कृते गृहे निर्मितस्य TLM इत्यस्य विषये अभिभावकानां समुदायस्य च एकस्याः मेलायाः आयोजनम्।

प्रशिक्षुताप्रतिवेदनप्रस्तुतिः

- चिन्तनशीलपत्रिका
- पाठयोजना तथा TLMs
- अवलोकनाभिलेखाः (शिक्षकप्रशिक्षकः, पथप्रदर्शकः, विद्यालयप्रमुखाः, शिक्षकाः, अभिभावकाः)
- मूल्याकलनाभिलेखः छात्राणां Portfolio
- क्रियात्मकानुसन्धानस्य प्रतिवेदनम्/व्यक्तिवृताध्ययनम्
- विस्तृतप्रशिक्षुताप्रतिवेदनम्।

मूल्याकलनस्य परामर्शात्मकः प्रकारः

योग्यता (कलाकृतिः)	मूल्याकलनस्य विधिः	मूल्याकलितम् (द्वारा)	श्रेयाङ्कः
प्रशिक्षुतासमये निर्मिताः कलाकृतयः। अधिगमयात्रा	प्रदर्शनी प्रस्तुतिश्च	शिक्षकप्रशिक्षकः	1
विस्तृतप्रशिक्षुताप्रतिवेदनम्	परिशीलनम्	शिक्षकप्रशक्षकः	1

अधिगमपरिणामः (Learning Outcomes) (प्रतिफलम्) छात्राध्यापकाः क्षमाः भवेयुः -

- विद्यालयस्य पारिस्थितिकतन्त्रस्य विस्तृवावबोधे समर्थाः भवेयुः।
- विद्यालयप्रशिक्षुतानुभवविषयकप्रतिवेदनिर्माणे योग्याः स्युः।
- विद्यालयप्रशिक्षुतायाः माध्यमेन अर्जितस्य स्वाधिगमं सहपाठिभिः शिक्षकप्रशिक्षकैः च सह प्रसारं कर्तुं योग्याः भवेयु।

6.6 शिक्षणाधिगमसामग्र्याः निर्माणं कार्यानुभवश्च

सत्रार्द्धः – 7 **श्रेयोङ्काः - 2**

पूर्वस्मिन् अन्तःप्रशिक्षुतायाः शिक्षणावलोकनस्य च प्रत्यक्षानुभवं शिक्षायाः दार्शनिक-सामाजिक-मनोवैज्ञानिकसन्दर्भाणां च अवबोधं प्राप्य प्रशिक्षणार्थिनः शिक्षायाः विषये व्यापकतया सम्प्रत्ययावगमनं प्राप्स्यन्ति। आत्मनः विविधानुभवानाम् अवबोधानां च माध्यमेन प्रशिक्षणार्थिनः विविधप्रकारकाणाम् अधिगमसामग्रीणां (यथाहि अभिक्रमिताधिगमसामग्रीः, शैक्षणिकदृश्यश्रव्यसामग्रीः, शिक्षकपुस्तिका, स्फोरकपत्राणि, क्रीडनकानि, क्रीडासामग्रीः, चित्रकदम्बः, नवाचारितपाठयोजनाः) निर्माणे विकासे च समर्थाः भविष्यन्ति। शिक्षायाः लक्ष्याणि, वाञ्छितज्ञानम्, कौशलम् अभिवृतिविकासः च इत्येतेषां प्राप्तये विद्यालयः व्यवस्थितम् अधिगमवातावरणं प्रस्तौति। कार्यानुभवः कौशलपूर्ण-व्यवसायदक्षशिक्षकरूपेण प्रशिक्षणार्थिनं परिणमितुम् आधारभूतं ज्ञानं रुचिं च प्रवर्धयति। विद्यालयीयविद्यार्थिवर्गं कार्यशिक्षां प्रति प्रवृत्तं कर्तुं प्रशिक्षणार्थिनः चित्रकाराणाम्, शिल्पीनाम् उद्यमिनां च कार्याणां स्रोतसां च प्रत्यक्षानुभवं कर्तुमिच्छन्ति, येन ते आत्मनः व्यावसायिककुशलतायाः क्षमतानां च विकासं कुर्युः। तत्र गुणवत्तापूर्णशिक्षण-अधिगमसामग्रीः, नवाचारितशिक्षणविधयः, आधुनिकप्रौद्योगिकी, स्थानीयसन्दर्भाः न्यूनव्ययसाधकोपकरणानि च प्रशिक्षणार्थिगणं व्यस्तम्, रुचिमन्तं प्रायोगिकाधिगमयोग्यतावन्तं च कर्तुं सहकारकाणि भवन्तीति।

अधिगमानुभवः

अमुं पाठ्यक्रमं पठित्वा प्रशिक्षणार्थी -

1. शिक्षणाधिगमसामग्र्याः आवश्यकतायाः आकलनं कर्तुं शक्ष्यति, तदाधारेण च नवाचाराधारिताम् अधिगमसामग्रीं साधयितुं शक्ष्यति।
2. कार्यानुभवः, स्थानीयोद्यमिता, शिल्पकर्म, चित्रकारिता इत्यादिषु दक्षजनानां क्षमतानां महत्त्वस्य ज्ञानं प्राप्तुं शक्ष्यति।

प्रवचनम्

- कार्यशाला
- समूहचर्चा
- क्षेत्रभ्रमणम् अन्तःक्रिया च
- उपलब्धानां स्थानीयाधिगमस्रोतसां क्रीडनकानां विश्लेषणम्
- शिक्षणाधिगमसामग्रीणां प्रदर्शनी तद्विषये प्रतिवेदननिर्माणं च

पाठ्यवस्तु

- विविधस्तरेषु विद्यार्थिनाम् अधिगमरीतेः अवबोधनम्।
- देशस्य विविधक्षेत्रेषु उपलब्धशिक्षणसामग्रीणां यथाहि क्रीडनकानि, हस्तकलाशिल्पानि अन्यशिक्षणाधिगमसामग्रीणां च विषये अवबोधनम्।
- दिव्याङ्गसमूहानां (दृष्टिबाधित-श्रवणबाधित-चलनबाधितानां) तथा च वैयक्तिकभिन्नतावताम् अधिगमकर्तॄणां कृते उपयुक्तशिक्षणाधिगमसामग्रीणाम् अवबोधनम्।

कर्त्तव्यानि कार्याणि

- अधिगमस्रोतसां विकासाय कार्यशालाः
- स्थानीयकलाकारैः, शिल्पिभिः, उद्यमिभिः च सह अन्तःक्रियार्थं क्षेत्रभ्रमणम्।
- स्थानीयप्रौद्योगिक्याम् विचारेषु च आधारितपारम्परिककार्याभ्यासेषु अन्तःक्रिया कार्यानुभवश्च।
- स्थानीयस्तरे उपलब्धानां विशिष्टस्थानीयाधिगमस्रोतसां क्रीडनकादीनां च शिक्षणाधिगमप्रक्रियायां प्रयोगः।
- स्थानीयसन्दर्भस्य कयोश्चित् द्वयोः अल्पव्ययसाधितानाम् अधिगमस्रोतसाम् (आधारभूत/पूर्वसिद्धता/मध्य/माध्यमिक-स्तरे) विकासः प्रदर्शनं च।
- शिक्षणाधिगमसामग्र्याः निर्माणस्य नियमावलीनिर्माणम्, यत्र उद्देश्यानाम्, प्रयुक्तसामग्रीणाम्, विकासप्रक्रिया, कक्ष्यान्तःक्रिया च इत्यादीनां विषये सम्यक्तया विवरणं स्यात्।

आकलनपद्धतिः

दक्षता	आकलनविधिः	आकलनकर्ता	श्रेयोऽङ्काः
विकसिता शिक्षणाधिगमसामग्री	प्रस्तुतीकरणम् वा प्रदर्शनम्	शिक्षकप्रशिक्षकैः यत्र बाह्यविशेषज्ञैः सह त्रयः शिक्षकप्रशिक्षकाः अपि स्युः	1.5
नियमावली(मैन्यूअल)	प्रस्तुतीकरणम्	शिक्षकप्रशिक्षकः	1.5

अधिगमपरिणामाः (Learning Outcomes)

प्रशिक्षणार्थिनः कर्तुं शक्ष्यन्ति -

- अधिगमसामग्र्याः निर्माणम्।
- अधिगमविकासाय शिक्षणाधिगमसामग्र्याः विकासम्।
- कार्यानुभवस्य महत्त्वस्य स्थानीयशिल्पकाराणां दक्षतायाः व्याख्यानम्।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	शिक्षणाधिगमसामग्र्याः निर्माणं कार्यानुभवश्च	20 hr	0	12 hr.	2

7.1 - A सामुदायिकसेवा

सत्रार्द्धः –8 **श्रेयोऽङ्कः – 2**

पाठ्यपरिचयः (About the Course)

पाठ्यक्रमस्य **सामुदायिककार्यं सेवा** च इत्ययं भागः समाजस्य सामाजिक-आर्थिकविषयैः समुदायाधारितानां विकासकार्यक्रमाणां परिचयं छात्राध्यापकेभ्यः प्रयच्छति । अनेन ते कक्ष्याप्रकोष्ठाधिगमस्य वास्तविकजीवनस्य अनुभवैः सह सम्बन्धं कल्पयित्वा वास्तविकजीवनस्य समस्यानां समाधानान्वेषणं कर्तुं प्रभवन्ति। पाठ्यक्रमस्य अयमंशः छात्राध्यापकेषु समाजस्य प्रकार्याणि, विद्यालयसम्बद्धकार्यक्रमेषु समुदायस्य सहयोगः, समाजे शिक्षायाः महत्त्वस्य जागरूकतायाः संवर्धनम्, विद्यालयसम्बद्धसमस्याः, लैङ्गिकाऽसमानता, बालानां स्वास्थ्यं कल्याणं च, आजीवनं शिक्षायाः उपक्रमः इत्यादिविषयेषु छात्राध्यापकानाम् अन्तर्दृष्टिं विकासयति। सामाजिक-सदस्यानां सहयोगेन सामाजिक-सांस्कृतिक-शैक्षिकसमस्यानां समाधानाय कार्यं कर्तुं छात्राध्यापकान् प्रेरयति तथा च समाजसेवामाध्यमेन सामाजिकनायकत्वकौशलानि विकासयति । एतेषां सामाजिकविकास-उपक्रमाणां विषये छात्राध्यापकेभ्यः परिचयं प्रदाय वीथीनाटकम्, सभा, गृहसम्पर्कः, प्रभातफेरी इत्यादिकार्यक्रमैः विविधविकासोपक्रमेषु सामाजिकानां सहभागितां वर्धयति ।

अयं पाठ्यक्रमघटकः राष्ट्रियसेवायोजना (एन्. एस्. एस्.), राष्ट्रिय कैडेट कोर (एन्.सी. सी.), विथिनाटकम्, ग्रामसर्वेक्षणम्, सामाजिकसमस्याधारितजागरूकता शोभायात्रा (स्वच्छताभियानम्, नशामुक्तिः, भ्रष्टाचार-उन्मूलनम् एवं सततविकासः), रक्तदानम्, वृक्षारोपणम्, वृद्धाश्रम-अनाथालय भ्रमणं च। नवभारतसाक्षरताकार्यक्रमः, छात्रमार्गदर्शनम् इत्यादिषु क्रियाकलापेषु छात्राध्यापकानां सहभागितायाः परिकल्पनां करोति । अत्र केचन क्रियाकलापाः गतिविधयः वा सन्ति । यथा – विभिन्नविद्यालयगतिविधिषु सहभागितायाः सामुदायिकसंसाधनानां सर्वेक्षणम् । विविधस्तरेषु विद्यालयपरित्यागस्य वर्तमानस्थितेः अध्ययनं तस्य कारणान्वेषणञ्च । सामाजिक-आर्थिक-शैक्षिक-स्थितेः अध्ययनार्थं विशिष्टस्य उपग्रामस्य सर्वेक्षणम् । विशिष्टे उपग्रामे निरक्षराणां सर्वेक्षणं, तथा प्रत्येकं छात्राध्यापकः ४-५ प्रौढनिरक्षराणाम् अभिज्ञानं कृत्वा तेषां साक्षरतार्थं साहाय्यं करोति । प्राथमिकचिकित्सायाम् अन्येषु च प्रासंगिककार्यक्रमेषु स्थानीययुवकानां प्रशिक्षणम् । कस्मिंश्चित् स्थाने बालकानां स्वास्थ्यस्य कल्याणस्य च विषये स्थितेः आकलनम् । सततविकासस्य महत्त्वविषये जागरूकतासम्पादनम् । पर्यावरणसंरक्षणस्य महत्त्वविषये समुदायस्य सदस्येषु जागरूकतासम्पादनम् । वृष्टिजलसङ्ग्रहणस्य विषये जागरूकतासम्पादनम् । अधिगमविकृतिमतां विद्यालयच्छात्राणां मार्गदर्शनम् । विद्यालयच्छात्राणां मार्गदर्शनं परामर्शश्च ।

अधिगमनिष्पादनानि -

सामुदायिक सहभागिता सेवाकार्यक्रमस्य सफलतया समाप्तेः अनन्तरं-छात्राध्यापकाः इमानि कार्याणि कर्तुं सक्षमाः भवेयुः -

- समाजे विद्यमानसामाजिकार्थिकसमस्याः अभिज्ञाय तासां समाधानाय उपक्रमाणाम् (अभिज्ञानम्, योग्य संवैधानिकमूल्य-कर्तव्यकार्यक्रमाणां निर्माणम्)
- समाजस्य प्रकार्याणाम् अवगमनम् एवं विद्यालयसम्बद्धकार्यक्रमेषु समाजस्य सहभागितायै अपेक्षितक्रियाकलापानां प्रदर्शनम्।

- शिक्षायाः महत्त्वं, विद्यालयसम्बद्धसमस्याः, लैङ्गिकासमानता, बालानां स्वास्थ्यं कल्याणञ्च, समाजे विद्यमानयूनां प्रौढानां च निरक्षरता इत्यादीनां विषये सामाजिकान् अवबोधयितुं विविधकार्यक्रमाणाम् अयोजनम्।
- समाजे सामाजिक सांस्कृतिक-शैक्षिकसमस्यानां परिष्करणाय सामाजिकानां (समाजे विद्यमानव्यक्तीनां)-सहयोगेन कार्ययोजनानिर्माणम्।
- अभिवृद्धिकार्यक्रमेषु समाजस्य सहभागितायै वीथिनाटकम्, न्यायवाद क्रियाकलापाः (advocacy activities) - गृहसंपर्काभियानं, प्रभातफेरी इत्यादिकार्य-क्रमाणां समायोजनम्।
- समाजसेवया सामाजिकनेतृत्वस्य गुणानां प्रदर्शनम्।
- विद्यालयपरित्यागः (Dropouts) अधिगमविकृतिः इत्यादिसमस्यानां परिष्काराय विद्यालय-स्थानीयसमाजयोः मध्ये परस्परविचार-विमर्शनादिकार्यक्रमाणाम् आयोजनम्।
- अभिभावकशिक्षकसमावेशेषु एवं विद्यालयसम्बद्धेषु कार्यक्रमेषु समाजस्य सहभागितावर्धनाय स्थानीयसंस्थानां सहयोगः।
- समाजे दृश्यमानजातिवाद-सामाजिकनिषेध-अन्धविश्वासादिदोषान् अभिज्ञाय तेषां सामञ्जस्यसम्पादने दूरीकरणे च प्रयासकरणम्।
- स्थानीयसमाजस्योपरि सकारात्मकभावनायाः प्रदर्शनं तथा पारम्परिकज्ञानस्य अभ्यासानां च प्रशंसाकरणम्।
- समाजिकसेवासक्रियनागरिकतायाः च मूल्यानाम् अभिज्ञानम्।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	सामुदायिकसेवा	20 hr	0	12 hr.	2

पाठ्यक्रमस्य क्रियान्वयनस्य दृष्टिकोणः

प्रत्येकं छात्राध्यापकः दशदिनानि यावत् सामुदायिकजीवनेन सह परिचितः भवितुम् अवसरः प्रदीयते। तत्र दिवसद्वयं स्वसंस्थायां सामुदायिकसहभागितायाः सेवाकार्यक्रमस्य च योजनार्थम् , ततः परं समुदायेन सह कार्यं कर्तुं सप्तदिनानि, पुनः अन्तिमदिने स्वसंस्थायां स्वानुभवानाम् आदानप्रदानाय परिणामप्रदर्शनार्थं च अवसरः प्रदीयते। आवश्यकतानुसारं समूहेषु वैयक्तिकरूपेण वा क्रियाकलापानां गतिविधीनां वा आयोजनं कर्तुं शक्यते।

प्रथमं द्वितीयं दिनम् : सामुदायिकसेवकार्यस्य सज्जता (स्वसंस्थायाम्)

१. चर्चाभिः समूहक्रियाकलापैः गतिविधिभिः च छात्राध्यापकानां सामुदायिकसङ्गतेः सेवायाः च उन्मुखीकरणम्।
२. सामुदायिकसेवाकार्यक्रमस्य कालखण्डे विविधक्रियाकलापानां गतिविधीनां सञ्चालनाय आवश्यक-साधनानां विकासाय कार्यशाला।

तृतीयदिनात् नवमदिनम् - सामुदायिकसङ्गतिः (समुदायेन सह तत्स्थाने अनिवार्यतया निवासः)

छात्राध्यापकान् लघुसमूहेषु विभागः करणीयः। ते सप्तदिनानि यावत् नियतभूमिकाभिः सह नियोजितकार्यक्रमेषु परिवर्तनस्य (रोटेशन) आधारेण भागं गृह्णन्ति। एतेषु कार्येषु कानिचन कार्याणि एवं भवन्ति –

NSS समय-प्रतिबद्धता (Time Commitment) -

प्रत्येकस्मिन् शैक्षणिकवर्षे नियमितक्रियाणां १२० घण्टाः अनिवार्याः भवन्ति। एतेषां विभाजनम् एवं भवति—

२० घण्टाः अभिमुखीकरण-कार्यक्रमाय (Orientation)।

३० घण्टाः संस्थागत-परिसरकार्याय (Institutional/Campus Work)

७० घण्टाः सामुदायिक-सेवायै (Community Service)

विशेष-शिबिराणि (Special Camps)-

एन्.एस्.एस्. कार्यक्रमस्य एकं प्रमुखं वैशिष्ट्यं सप्त-दिवसीयम् आवासीयं विशेष-शिबिरम्, यत् दत्तकगृहीते ग्रामे अथवा नगरीय-मलिनवसती। (Urban Slum) आयोजितं भवति।

१. राष्ट्रीय-सेवा-योजना (एन्. एस्. एस्.), नवभारत-साक्षरता-कार्यक्रमः, छात्र-परामर्श-केन्द्रम् इत्यादिषु गतिविधिषु छात्राध्यापकानां सहभागिता भवेत्।
२. विद्यालयकार्यकलापेषु सहायतार्थं सामुदायिकसंसाधनानां सर्वेक्षणम्।
३. विविधस्तरेषु विद्यालयपरित्यागस्य वर्तमानस्थितेः कारणानां च अध्ययनम्।
४. उपग्रामेषु निरक्षराणां स्थितेः मूल्याङ्कनार्थं विशिष्टोपग्रामाणां सर्वेक्षणम्। प्रत्येकं छात्राध्यापकः ४-५ युव-निरक्षराणाम् अथवा प्रौढ-निरक्षराणाम् अभिज्ञानं कृत्वा तेषां साक्षरतार्थं साहाय्यं करोति।
५. प्राथमिकचिकित्सायां तथा च अन्येषु प्रासंगिककार्येषु स्थानीययुवकानां प्रशिक्षणम्।
६. कस्मिंश्चित् क्षेत्रे प्रदेशे वा बालकानां स्वास्थ्य-कल्याणयोः विषये स्थितेः आकलनम्।
७. सततविकासस्य महत्त्वविषये जागरूकतासम्पादनम्। पर्यावरणसंरक्षणम् , वृष्टिजलसङ्ग्रहणम् , अधिगमविकृतिबालानां मार्गदर्शनम् , विद्यालयच्छात्रेभ्यः मार्गदर्शनं परामर्शश्च इत्यादि उपक्रमाणां समर्थनस्य आवश्यकतायाः विषये समुदायसदस्येषु जागरूकतासम्पादनम्।
८. स्थानीयशिल्पिभिः शिल्पकारैः च सह मिलित्वा संवादः करणीयः।
९. **राष्ट्रियसेवायोजनायाः परिचयः तथा सामाजिकदायित्वम्** – एन्.एस्.एस्. उद्देश्यानाम् अध्ययनं तथा सामुदायिकसेवायां सक्रियसहभागिता।
१०. **स्वच्छता तथा स्वास्थ्यजागरूकता कार्यक्रमः** – स्वच्छतासिद्धान्तानाम् अध्ययनं तथा स्वच्छताभियानस्य, शोभायात्रायाः (जनजागरणयात्रायाः) एवं जनजागरूकताकार्यक्रमाणाम् आयोजनम्।
११. **पर्यावरणसंरक्षणं तथा वृक्षारोपणम्** – पर्यावरणीयसमस्यानाम् अध्ययनं तथा वृक्षारोपणं, पादपानां पालनपोषणम् एवं पर्यावरणसंरक्षणसम्बद्धक्रियाकलापेषु सहभागिता।
१२. **रक्तदानं तथा स्वास्थ्यसिबिरम्** – रक्तदानस्य, स्वास्थ्यस्य तथा पोषणसम्बद्धज्ञानस्य अर्जनं तथा स्वास्थ्यसिबिरेषु सहयोगः।
१३. **आपदाप्रबन्धनं तथा उपशमनकार्यम्** – आपदाप्रबन्धनसिद्धान्तानाम् अध्ययनं तथा अभ्यासप्रदर्शनेषु (Mock Drill) एवं उपशमनकार्येषु सहभागिता।
१४. **साक्षरता तथा शिक्षाप्रसारकार्यक्रमः** – शिक्षायाः महत्त्वस्य अध्ययनं तथा निरक्षराणां वञ्चितबालकानां च शिक्षणसहयोगप्रदानम्।
१५. **मतदातृजागरूकता तथा नागरिककर्तव्याणि** – लोकतन्त्रस्य नागरिकाधिकाराणां च अध्ययनं तथा मतदातृजागरूकताभियानस्य सञ्चालनम्।

१६. **महिलासशक्तीकरणं तथा लैङ्गिकसमता** – लैङ्गिकसमतासिद्धान्तानाम् अध्ययनं तथा जागरूकताकार्यक्रमाणां, संगोष्ठीनां संवादानां च आयोजनम्।

१७. **ग्रामीणविकासः तथा सामुदायिकसेवा** – ग्रामीणसमस्यानाम् अध्ययनं तथा ग्रामसर्वेक्षणे, श्रमदाने एवं विकासकार्येषु सहभागिता।

१८. **योगः, व्यक्तित्वविकासः तथा नेतृत्त्वप्रशिक्षणम्** – नेतृत्वस्य, अनुशासनस्य तथा व्यक्तित्वविकासस्य सिद्धान्तानाम् अध्ययनं तथा योगाभ्यासे, समूहकार्येषु एवं नेतृत्वसम्बद्धक्रियाकलापेषु सहभागिता।

पूर्वेक्तक्रियाकलापेषु समुदायेन सह कार्यकरणम्, दत्तांशसङ्ग्रहणम्, स्थानीयक्रीडाः, वीथिनाटक-सभा-माध्यमेन समुदायस्य जागरूकताकार्यक्रमाः, समुदायस्य सदस्यैः सह सांस्कृतिककार्यक्रमाणाम् आयोजनं भागग्रहणं च इत्यादयः प्रमुखकार्यक्रमाः सन्ति ।

छात्राध्यापकाः आदिनं विविधानि पूर्वनिर्धारितानि कार्याणि कुर्वन्ति । प्रातःकालीनसत्रे सामुदायिकगतिविधयः, दत्तांशसङ्ग्रहणञ्च भवितुमर्हति। अपराह्णे दत्तांशविश्लेषणं, प्रतिवेदननिर्माणम् क्रीडागतिविधिषु सहभागिता च भवितुमर्हन्ति। । सायङ्कालीनसत्रे समुदायस्य सदस्यैः सह सांस्कृतिकगतिविधयः भविष्यन्ति।

दशमदिनम् - प्रतिपुष्टिसत्रं चिन्तनं च (स्वसंस्थायाम्)

- सामुदायिकसेवाकार्यक्रमे कृतानां कार्याणां विषये चर्चा अनुभकथनं च।
- सामुदायिकसेवाकार्यक्रमे कृतानां कार्याणां विषये उपस्थापनं प्रतिवेदनसमर्पणञ्च ।
- संरक्षकाः (Mentors) छात्राध्यापकाः च अभियानस्य प्रभावशीलतायाः प्रतिक्रियाः सङ्गृह्य क्रियाकलापानां गतिविधीनां च मूल्याङ्कनं कुर्वन्ति ।
- सामुदायिकसेवायाः आयोजने अनुभवस्य (वैयक्तिकम्/सामूहिकम्) समुपस्थापनं परावर्तनं (Reflection) च ।

आकलनस्य अंशाः –

प्रतिवेदनसंरचना, परियोजनाकार्यम्, मौखिकपरिक्षा अथवा पोर्टफोलिओ, दृश्यनिर्माणम्(Video Making) इत्यादि।

सन्दर्भग्रन्थाः

1. एन. सी. सी पुस्तकम्.
2. NSS Handbook & Action Plan.
3. NSS Manual revised 2006.
4. NSS Book Sem 1 PDF on Academia.edu
5. NSS Service Scheme Downloads.

7.1-B, भारतीयज्ञानपरम्परामाधृत्य स्वशास्त्रीयवैज्ञानिकपरियोजना

सत्रार्द्धः - 6 **श्रेयोऽङ्काः - 2**

पाठ्यपरिचयः(About the course)

राष्ट्रियशिक्षानीतिः 2020 सङ्कल्पनां करोति यत् स्नातकस्तरीयेषु छात्रेषु शोधाभियोग्यतायाः संवर्धनं स्यात् इति। अनेन परियोजनाकार्येण स्वविजयस्य शोधपरकदृष्टेः अध्ययनस्य सामर्थ्यस्य च विकासः भविष्यति। संस्कृतवाङ्मये प्रभूतवैज्ञानिकतत्त्वानि विद्यन्ते। भारतीयज्ञानपरम्परामाधृत्य आधुनिकविषयैः सह स्वशास्त्रस्य संयोजनाय परियोजनेयं सहकरोति।

अधिगमपरिणामाः (Learning Outcomes)

परियोजनाकार्यमिदं समाप्य छात्राध्यापकाः समर्थाः भविष्यन्ति -

- स्वशास्त्रस्य वैज्ञानिकदृष्ट्या प्रतिपादनम्।
- आधुनिकविषयैः सह स्वशास्त्रस्य समन्वयस्थापनम्।
- शोधात्मकदृष्ट्या स्वशास्त्रस्य गवेषणम्।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	भारतीयज्ञानपरम्परामाधृत्य स्वशास्त्रीयवैज्ञानिकपरियोजना	20 hr	0	12 hr.	2

परियोजनाप्रक्रिया

भारतीयज्ञानपरम्परामाश्रित्य छात्राध्यापकैः साहित्य-व्याकरण-दर्शनादिषु स्वकीयस्य चितस्य शास्त्रस्य आधुनिकविषयैः सहसम्बन्धं स्थापयितुं परियोजनाकार्यं सम्पादनीयम्। तदर्थं प्रक्रिया निम्नानुसारिणी भविष्यति -

- प्रत्येकं छात्राय परियोजनाकार्याय कश्चन प्राध्यापकः पर्यवेक्षकत्वेन प्रदास्यते।
- विभागीयशोधसमितेः समक्षं छात्राध्यापकाः स्वकीयं परियोजनाशीर्षकं प्रस्तोष्यन्ति। तत्परामर्शेण शीर्षकनिश्चयः भविष्यति।
- पर्यवेक्षकस्य निर्देशने स्वीकृतशीर्षकानुसारं परियोजनाप्रस्तावं विनिर्माय अनुमतये विकासीयशोधसमितये समर्पणीयम्।
- स्वीकृतेः अनन्तरं पर्यवेक्षकस्य मार्गदर्शने यथाविधिः परियोजनाकार्यम् अनुसन्धानकार्यं च मासत्रये समापनीयम्। परियोजनायां निम्नांशाः अवश्यं भवेयुः।
- स्वीकृतसमस्या।

- संक्रियात्मकपरिभाषीकरणम्।
- परियोजनायाः उद्देश्यानि।
- परियोजनायाः आवश्यकता। औचित्यम्।
- सीमाङ्कनम्।
- सम्बद्धसाहित्यसमीक्षणम्।
- प्राक्कल्पनाः/शोधप्रश्नाः।

- शोधविधिः
    - जनसंख्या, न्यादर्शः (संख्यात्मककार्यस्य)
    - उपकरणम्/अध्ययनसामग्री।
    - दत्तांशसंकलनम्।
    - प्राक्कल्पनापरीक्षणम्/शोधप्रश्नसमीक्षणम्।
- निष्कर्षप्रतिपादनम्।
- शैक्षिकनिहितार्थः।
- सन्दर्भग्रन्थसूची।
- परियोजनाविषयस्य प्रकृतेः अनुसारम् उपर्युक्तांशाः समावेशनीयाः।
- परियोजनाकार्यस्य सम्पूर्तौ तस्य प्लेगेरिज्म परीक्षणम् अनिवार्यतया करणीयम्। तदनु विभागीयशोधसमितेः।
- पुरतः प्राक्समर्पणं करणीयम्।
- विभागीयशोधसमितेः स्वीकृतेः अनन्तरं परियोजनाकार्यं टंकितरूपेण समर्पयितुं शक्यते।
- परियोजनाकार्येऽस्मिन् विश्वविद्यालयस्य शोधनीतेः अनुसरणं करणीयम्।

7.1 C – वाग्वर्धिनी – (संस्कृतम्, आंग्लम्)

उद्देश्यम् -

छात्राध्यापकानां वाक्कौशलविकासाय प्रतिसप्ताहं वाग्वर्धिनीसभायाः आयोजनम् ।

अधिगमपरिणामः –

1. **सर्वे छात्राः सभायाम् वक्तुं समर्थाः भविष्यन्ति।**
2. **सर्वे छात्राः सभाभीतिं दूरीकुर्वन्ति।**
3. **सर्वे छात्राः संस्कृताङ्ग्लयोः विविधान् विषयान् ज्ञास्यन्ति।**

कार्ययोजना –

सप्तमसत्रार्धं विहाय सर्वेषु सत्रार्धेषु छात्राः मार्गदर्शकस्य निर्देशानुसारं स्वनिर्मितसमितिद्वारा प्रतिसप्ताहं सभायाः आयोजनं कुर्युः। प्रतिसप्ताहं एकैकः संयोजकः/ संचालकः भवेत्। सर्वेषां भागग्रहणम् अनिवार्यम्।

शोधच्छात्रेभ्यः (Research)

7.2 – A अनुसन्धानपद्धतिशास्त्रम्

(Research Methodology)

सत्रार्द्धः – 7 **श्रेयोऽङ्काः 4**

पाठ्यपरिचयः (About the Course)

अनुसन्धानम् एकः व्यवस्थितः अन्वेषणप्रक्रियाविशेषः अस्ति, यस्य उद्देश्यं नवीनज्ञानस्य सृजनम्, समस्यासमाधानं तथा वैज्ञानिकान्वेषणस्य माध्यमेन व्यवहाराणां परिष्कारः इति अस्ति। स्नातकस्तरे विद्यार्थिनः अनुसन्धानस्य मूलभूतसंकल्पनानां, प्रक्रियाणां तथा कौशलानां सम्यगवगमनं प्राप्नुयुः, येन ते स्वतन्त्ररूपेण शैक्षिका-नुसन्धानकार्यं कर्तुं समर्थाः भविष्यन्ति।

अयं पाठ्यक्रमः विद्यार्थिभ्यः अनुसन्धानपद्धतेः मूलतत्त्वानि परिचाययति। अस्मिन् अनुसन्धानस्य अर्थः, स्वरूपं, क्षेत्रं, महत्त्वम्, अनुसन्धानसम्बद्धपारिभाषिकशब्दावली, अनुसन्धानसमस्यायाः परिचयः, अनुसन्धानस्य प्रकाराः, अनुसन्धानोद्देश्यानां निर्माणम्, अनुसन्धानस्य मूलचरणानि इत्यादीनि समाविष्टानि सन्ति।

अयं पाठ्यक्रमः अध्यापकस्य मार्गदर्शनेन लघु-शोधप्रबन्धस्य सम्पादनस्य व्यावहारिकानुभवम् अपि प्रददाति, यः अन्ते मौखिकपरीक्षया (Viva Voce) सम्पन्नः भवति।

अधिगमप्रतिफलानि (Learning Outcomes)

अस्य पाठ्यक्रमस्य सफलसमापनानन्तरं विद्यार्थिनः -

1. अनुसन्धानस्य अर्थं, स्वरूपं, क्षेत्रं तथा महत्त्वं व्याख्यातुं समर्थाः भविष्यन्ति।
2. अनुसन्धानसम्बद्धां मूलपारिभाषिकशब्दावलीं सम्यक् अवगन्तुं प्रयोजयितुं च शक्नुवन्ति।
3. अनुसन्धानस्य विविधप्रकारान् तथा उपागमान् पृथक्कर्तुं शक्नुवन्ति।
4. अनुसन्धानसमस्याः तथा अनुसन्धानप्रश्नान् परिचेतुं निर्मातुं च समर्थाः भविष्यन्ति।
5. अनुसन्धानसम्पादनस्य मूलप्रक्रियाः प्रयोजयितुं शक्नुवन्ति।
6. अनुसन्धानप्रस्तावं निर्माय लघुशोधप्रबन्धं सम्पादयितुं शक्नुवन्ति।
7. प्राप्तनिष्कर्षाणां व्यवस्थितविश्लेषणं व्याख्यां च कर्तुं शक्नुवन्ति।
8. लिखितप्रतिवेदनस्य मौखिकपरीक्षायाः च माध्यमेन स्वकीयमनुसन्धानकार्यं प्रस्तोतुं समर्थयितुं च शक्नुवन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	अनुसन्धानपद्धतिशास्त्रम्	40 hr	0	24 hr.	4

प्रथमपाठ्यांशः (UNIT I): अनुसन्धानस्य आधारभूततत्त्वानि

- अनुसन्धानस्य अर्थः, स्वरूपं महत्त्वञ्च।
- अनुसन्धानस्य उद्देश्यानि आवश्यकता च।

- अनुसन्धानस्य विशेषताः।
- अनुसन्धानस्य नीतिशास्त्रं शैक्षिकनिष्ठा च।
- मूलभूता अनुसन्धानपारिभाषिकशब्दावली।
    - अनुसन्धानसमस्या
    - चराः (Variables)
    - परिकल्पना (Hypothesis)
    - उद्देश्यानि
    - अनुसन्धानप्रश्नाः
    - जनसंख्या (Population) तथा निदर्शनम् (Sample)
    - शोधोपकरणम् (Research Tool)
- विभिन्नविषयेषु अनुसन्धानस्य क्षेत्राणि

द्वितीयपाठ्यांशः (UNIT II): अनुसन्धानस्य प्रकाराः प्रक्रिया च

- अनुसन्धानस्य प्रकाराः।
    - मूलभूतम् अनुसन्धानम्, अनुप्रयुक्तम् अनुसन्धानञ्च।
    - परिमाणात्मकम् अनुसन्धानम्, गुणात्मकम् अनुसन्धानञ्च।
    - वर्णनात्मकं, विश्लेषणात्मकं, प्रायोगिकञ्च अनुसन्धानम्।
    - क्रियात्मकानुसन्धानं व्यक्तिवृत्ताध्ययनम् (Case Study)।
- अनुसन्धानक्षेत्राणां परिचयः चयनं च।
- अनुसन्धानसमस्यायाः चयनम्।
- सम्बन्धसाहित्यस्य अवलोकनम् (Review of Literature)।
- अनुसन्धानरचना (Research Design): अर्थः अङ्गानि च।
- दत्तांशसंग्रहणस्य विधयः।
    - निरीक्षणम् (Observation)
    - साक्षात्कारः (Interview)
    - प्रश्नावली (Questionnaire)
    - सर्वेक्षणम् (Survey)
    - परीक्षणम् (Test)
- न्यादर्शप्रविधीनां (Sampling Techniques) मूलपरिचयः।

तृतीयैककम् (UNIT III): शोधप्रबन्धस्य निर्माणम् तथा अनुसन्धानप्रतिवेदनलेखनम्

- अनुसन्धानविषयस्य चयनम्।
- अनुसन्धानप्रस्तावस्य निर्माणम्।
- लघु-अनुसन्धान-अध्ययनस्य सम्पादनम्।
- दत्तांशसंग्रहणम् तथा प्राथमिकविश्लेषणम्।

- लघुशोधप्रबन्धलेखने अवधेयाः अंशाः – भाषा, शैली, क्रमः, उपक्रमोपसंहारौ अध्यायविभागः च ।
- लघुशोधप्रबन्धस्य / प्रतिवेदनस्य स्वरूपम्
  - परिचयः
  - सम्बन्धितसाहित्यस्य पुनरवलोकनम्
  - अनुसन्धानपद्धतिः
  - निष्कर्षाः चर्चाश्च
  - उपसंहारः सन्दर्भग्रन्थसूची च
- शोधप्रबन्धप्रतिवेदनस्य समर्पणम्

(UNIT IV): शिक्षणपद्धतिः (Methodology)

अयं पाठ्यक्रमः शिक्षार्थिकेन्द्रितं क्रियाकलापाधारितम् उपागमं चाश्रितः वर्तते । शिक्षणाधिगमविधिषु निम्नलिखिताः समावेश्यन्ते -

- सहभागितापूर्णव्याख्यानानि
- समूहचर्चाः
- व्यक्तिवृत्ताध्ययनानि (Case Studies)
- अनुसन्धानलेखसमीक्षा
- अनुसन्धानकौशल-कार्यशालाः
- अनुसंधानोपकरणानां प्रदर्शनम्
- ग्रन्थालयस्य तथा अन्तर्जालदत्तांशभण्डारस्य परिचयः
- परिसंवाद-प्रस्तुतयः (Seminar Presentations)
- शोधप्रबन्धार्थं वैयक्तिकमार्गदर्शनम्
- सहपाठीसमीक्षा तथा प्रतिपुष्टिसत्राणि

मूल्याङ्कनप्रक्रिया (Evaluation Process)

सैद्धान्तिकभागः (२ श्रेयाङ्काः) – ५० अङ्काः

घटकः	अङ्काः
आन्तरिकमूल्याङ्कनम् (कार्यपत्राणि, परिसंवादः, प्रश्नोत्तरी)	२०
सत्रान्तपरीक्षा	३०
आहत्य	५०

शोधप्रबन्धभागः (१ श्रेयाङ्कः) – २५ अङ्काः

घटकः	अङ्काः
विषयचयनं प्रस्तावश्च	५
अनुसन्धानस्य सम्पादनम्	१०
शोधप्रबन्धप्रतिवेदनम्	१०

घटकः	अङ्काः
आहत्य	२५

मौखिकपरीक्षाभागः (१ श्रेयाङ्कः) – २५ अङ्काः

घटकः	अङ्काः
शोधप्रबन्धस्य प्रस्तुतीकरणम्	१०
विषयज्ञानम् तथा प्रतिपादनम्	१०
सम्प्रेषणकौशलम्	५
आहत्य	२५

समग्रयोगः : १०० अङ्काः

7.2 – B लघुशोध-प्रबन्धलेखनसरणिः

(Dissertation & Viva)

सत्रार्द्धः – 8 **श्रेयोऽङ्काः 6**

लघुशोधप्रबन्धः (Dissertation) **श्रेयोऽङ्कः 04**

मौखिकपरीक्षा (Viva) **श्रेयोऽङ्कः 02**

पाठ्यपरिचयः (About the Course)

राष्ट्रियशिक्षानीतेः (NEP-2020) संस्तुतेः प्रकाशनात्परम् एकीकृतशिक्षकशिक्षायाः द्रुतगत्या विकासः समजनि। तदनु शिक्षकशिक्षायाम् अनुसन्धान नवाचारयोः प्रोत्साहनाय लघुशोधप्रबन्धस्य शोधपरियोजनानाञ्च परिचयात्मकः पाठ्यक्रमः समागतः। अनेन उपक्रमेण छात्राध्यापकाः शैक्षिकसमस्यानाम् अभिज्ञानाय वैज्ञानिकदृष्टेः विकासाय च समर्थाः भवन्ति। पुनश्च छात्राध्यापकाः लघुशोधप्रबन्धलेखनसरणिम् अवगम्य दत्तांशसङ्कलने तद्विश्लेषणे निष्कर्षप्रस्तुतौ च कुशलाः प्रभवन्ति।

लघुशोधप्रबन्धमाध्यमेन छात्राध्यापकाः विद्यालयस्य समाजस्य शिक्षणाधिगमप्रक्रियायाः भारतीयज्ञान-परम्परायाः स्थानीयविशेषतायाः सामयिक-शैक्षिकसमस्यायाश्च अध्ययने दक्षाः सम्भवन्ति। एषः पाठ्यक्रमः छात्राध्यापकेषु स्वतन्त्रानुसन्धानप्रवृत्तेः आलोचनात्मकचिन्तनस्य शोधलेखनस्य शोधनैतिकतायाः व्यावहारिक-अनुभवस्य च विकासाय नितरामोपकरोति।

अधिगमपरिणामाः (Learning Outcomes)

पाठस्य अस्य अध्ययनोत्तरं छात्राध्यापकाः –

- शिक्षाविद्यालयोः सम्बद्धाः समस्याः अवगच्छन्ति।
- शोधशीर्षकस्य/शोधसमस्यायाः चयने एवं शोधप्रस्तावस्य सज्जीकरणे समर्थाः भवन्ति।
- लघुशोधप्रबन्धस्य उपक्रमान् उपकरणानि दत्तांशसङ्ग्रहविधीन् च अनुप्रयोक्तुं सक्षमाः भवन्ति।
- प्राप्तनिष्कर्षाणाम् आधारेण शोधप्रबन्धस्य निर्माणे उत्सुकाः जायन्ते।
- शोधनैतिकताः विज्ञाय शोधमानकानाम् आधारेण लघुशोधप्रबन्धान् आरचयितुं क्षमन्ते।
- शिक्षाक्षेत्रे शोधलेख-लघुशोधप्रबन्ध-शोधप्रबन्धरचनाकौशलानि अर्जयन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	लघुशोध-प्रबन्धलेखनसरणिः	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) 01 – शोधप्रवृत्तिः

- शोधसंस्कृतिः - जिज्ञासा, समस्यान्वेषणक्षमता, विमर्शात्मकचिन्तनम्, वैज्ञानिकदृष्टिः, सर्जनात्मकता, निष्पक्षता।

- शोधलेखः – परिचयः, महत्त्वम्, स्वरूपम्, आवश्यकताश्च।
- लघुशोधप्रबन्धः/शोधप्रबन्धः – परिचयः, महत्त्वम्, स्वरूपम्, आवश्यकताश्च।
- शोधप्रस्तावः एवं शोधसंक्षिप्तिका – परिचयः, महत्त्वम्, स्वरूपम्, आवश्यकताश्च।

पाठ्यांशः(Unit) 02 – लघुशोधप्रबन्धस्य सोपानानि

- शोधक्षेत्रम् – शोधविषयस्य समस्यायाश्च चयनम्, शीर्षकनिर्धारणम्, औचित्यप्रतिपादनम्।
- शोधोद्देश्यम् – सम्बद्धसाहित्यम्, शोधोद्देश्यानि, शोधप्रश्नाः/परिकल्पनाश्च।
- शोधाभिकल्पः – प्रविधिनिर्धारणम्, न्यादर्शचयनम्, चरविश्लेषणञ्च।
- शोधविधिः - दत्तांशसङ्कलनम्, दत्तांशविश्लेषणम्, निष्कर्षप्रतिपादनञ्च।

पाठ्यांशः(Unit) 03 – लघुशोधप्रबन्धनिर्मितिः (प्रत्यक्षविधिः)

- आद्यः भागः – मुखपृष्ठम्, प्रमाणपत्रम्, प्रतिज्ञा, कृतज्ञताज्ञापनम्, अनुक्रमणिका च।
- शोधभूमिकाप्रस्तुतिः – प्रस्तावना, शोधसमस्याप्रतिपादनम्, आवश्यकता, औचित्यम्, उद्देश्यानि, सम्बद्धसाहित्यसमीक्षा च।
- शोधप्रविधिप्रस्तुतिः - संरचना, न्यादर्शः, उपकरणानि, विश्लेषणम्, व्याख्या च।
- परिसमाप्तिः – निष्कर्षप्रस्तुतिः, शैक्षिकसूचनाः, भाव्यनुसन्धानसूचनाः, सन्दर्भसूचीनिर्माणम्, परिशिष्टञ्च।

प्रायोगिकम् (Practicum) –

- 8,000–10,000 शब्देषु अभिनवलघुशोधप्रबन्धस्य प्रस्तुतिः।
- PPT माध्यमेन मौखिकप्रस्तुतीकरणम् ।
- मौखिकपरीक्षा।
- शोधसङ्गोष्ठ्यां शोधकार्यशालायाञ्च भागग्रहणम्।

आकलनप्रक्रिया (100 अङ्काः)

वर्गः	अङ्कः
शोधप्रस्तावः कार्यप्रगतिश्च	20
लघुशोधप्रबन्धस्य गुणवत्ता	50
प्रस्तुतीकरणम्	15
मौखिकपरीक्षा	15
आहत्य	100

प्रायोगिकप्रक्रिया –

पत्रमिदं प्रायोगिककार्यभूयिष्ठं वर्तते। शिक्षकः आदर्शलघुशोधप्रबन्धं प्रदर्श्य लेखनकर्मणि छात्राध्यापकान् अभिप्रेरयेत्। तत्पूर्वं शोधलेख-लघुशोधप्रबन्ध-शोधप्रबन्धानां परस्परसम्बन्धं भेदं वैशिष्ट्यं च विभिन्नैः उदाहरणैः सह प्रवचनमुखेन स्पष्टीकुर्यात्। छात्राध्यापकेभ्यः व्यक्तिशः अनुदेशनं लघुशोधप्रबन्धकर्मणि महत्त्वपूर्णं वर्तते। अतः साधनसम्पन्नः प्रशिक्षकः सीमितावधौ इदं कार्यं चातुर्येण सम्पादयेत्। अभिनवदीक्षासरणेः तृतीयचतुर्थपञ्चमदीक्षापुस्तकेषु उल्लिखितानां स्वाध्यायसामग्रीणां प्रभावस्य अध्ययनं कर्तुं मार्गदर्शनं कुर्यात्। सन्धि-समास-कारक-छन्दोलङ्काराणां प्रत्ययानां च विषये विद्यालयस्तरीयाणां छात्राणाम् अभिक्षमतायाः परीक्षणाय (प्राक्परीक्षण-उत्तरपरीक्षणनिमित्तम्) अपि स्वाध्यायसामग्री साहाय्यमाचरति। शोधकर्मणि सम्भावित-क्षेत्राणाम् उल्लेखः विश्वविद्यालयस्य जालपुटे उपारोपितः वर्तते। CSU Thurst Areas एतस्यापि अवलोकनं कर्तुं शक्यते।

स्वाध्यायसामग्री –

अनुसन्धान संदर्शिका	-	गुप्ता एस्. पी., शारदा पुस्तक भवन, इलाहबाद, उ.प्र।
प्रभावी प्रस्ताव लेखन	-	मूर्ति वासुदेव, सेज प्रकाशन, नई दिल्ली।
शोध प्रबन्ध कार्य	-	BAHI (N) – D-304, उत्तराखण्ड मुक्त विश्वविद्यालय https://uou.ac.in/sites/default/files/slm/BAHI(N)-D-304.pdf
How to Write a Ph.D Thesis in India	-	Dr. Sahil Roy, Insurance Scholar Pubications.
Thesis Writing – A complete Guide to Research	-	Dr. Parul Gandhi, The Readers Paradise.
Research Synopsis Format	-	CSU Synopsis Format, Central Sanskrit University
तृतीय-चतुर्थ-पञ्चमदीक्षा पुस्तकानि	-	केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

शोधेतरच्छात्रेभ्यः (Non Research)

7.2 – A भारतियज्ञानपरम्परामाधृत्य वैज्ञानिकशिक्षाशास्त्रीयपरियोजना (Theory)

सत्रार्द्धः – 8 **श्रेयोऽङ्काः 2**

पाठ्यपरिचयः (About the course)

राष्ट्रियशिक्षानीतेः (NEP-2020) संस्तुतेः प्रकाशनात्परम् एकीकृतशिक्षकशिक्षायाः द्रुतगत्या विकासः समजनि। तदनु शिक्षकशिक्षायाम् अनुसन्धान-नवाचारयोः प्रोत्साहनाय लघुशोधप्रबन्धस्य शोधपरियोजनानाञ्च परिचयात्मकः पाठ्यक्रमः समागतः। अनेन उपक्रमेण छात्राध्यापकाः शैक्षिकसमस्यानाम् अभिज्ञानाय वैज्ञानिकदृष्टेः विकासाय च समर्थाः भवन्ति। पुनश्च छात्राध्यापकाः भारतियज्ञानपरम्परामाधृत्य वैज्ञानिकशिक्षाशास्त्रीयपरियोजनाम् अवगम्य दत्तांशसङ्कलने तद्विश्लेषणे निष्कर्षप्रस्तुतौ च कुशलाः प्रभवन्ति।

भारतियज्ञानपरम्परामाधृत्य वैज्ञानिकशिक्षाशास्त्रीयपरियोजनाम् अधीत्य छात्राध्यापकाः विद्यालयस्य समाजस्य शिक्षणाधिगमप्रक्रियायाः भारतीयज्ञान-परम्परायाः स्थानीयविशेषतायाः सामयिक-शैक्षिकसमस्यायाश्च अध्ययने दक्षाः सम्भवन्ति। एषः पाठ्यक्रमः छात्राध्यापकेषु स्वतन्त्रानुसन्धानप्रवृत्तेः आलोचनात्मकचिन्तनस्य शोधलेखनस्य शोधनैतिकतायाः व्यावहारिक- अनुभवस्य च विकासाय नितराम् उपकरोति।

अधिगमपरिणामाः (Learning Outcomes)

पाठस्य अस्य अध्ययनोत्तरं छात्राध्यापकाः –

- शिक्षाविद्यालयोः सम्बद्धाः समस्याः अवगच्छन्ति।
- शोधशीर्षकस्य/शोधसमस्यायाः चयने एवं शोधप्रस्तावस्य सज्जीकरणे समर्थाः भवन्ति।
- परियोजनायाः उपक्रमान् उपकरणानि दत्तांशसङ्ग्रहविधीन् च अनुप्रयोक्तुं सक्षमाः भवन्ति।
- प्राप्तनिष्कर्षाणाम् आधारेण शोधप्रबन्धस्य निर्माणे उत्सुकाः जायन्ते।
- शोधनैतिकताः विज्ञाय शोधमानकानाम् आधारेण परियोजनायाः आरचयितुं क्षमन्ते।
- शिक्षाक्षेत्रे शोधलेख- परियोजनायाः-शोधप्रबन्धरचनाकौशलानि अर्जयन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	भारतियज्ञानपरम्परामाधृत्य वैज्ञानिकशिक्षाशास्त्रीयपरियोजना	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) 01 – परियोजनादक्षता

1. परियोजनासंस्कृतिः - जिज्ञासा, समस्यान्वेषणक्षमता, विमर्शात्मकचिन्तनम्, वैज्ञानिकदृष्टिः, सर्जनात्मकता, निष्पक्षता।
2. परियोजनालेखः – परिचयः, महत्त्वम्, स्वरूपम्, आवश्यकताश्च।
3. लघुशोधप्रबन्धः/परियोजनाप्रबन्धः – परिचयः, महत्त्वम्, स्वरूपम्, आवश्यकताश्च।
4. परियोजनाप्रस्तावः एवं परियोजनासंक्षिप्तिका – परिचयः, महत्त्वम्, स्वरूपम्, आवश्यकताश्च।

पाठ्यांशः(Unit) 02 – लघुशोधप्रबन्धस्य सोपानानि

1. शोधक्षेत्रम् – शोधविषयस्य समस्यायाश्च चयनम्, शीर्षकनिर्धारणम्, औचित्यप्रतिपादनम्।
2. शोधोद्देश्यम् – सम्बद्धसाहित्यम्, शोधोद्देश्यानि, शोधप्रश्नाः/परिकल्पनाश्च।
3. शोधाभिकल्पः – प्रविधिनिर्धारणम्, न्यादर्शचयनम्, चरविश्लेषणञ्च।
4. शोधविधिः - दत्तांशसङ्कलनम्, दत्तांशविश्लेषणम्, निष्कर्षप्रतिपादनञ्च।

पाठ्यांशः(Unit) 03 – लघुशोधप्रबन्धनिर्मितिः (प्रत्यक्षविधिः)

1. आद्यः भागः – मुखपृष्ठम्, प्रमाणपत्रम्, प्रतिज्ञा, कृतज्ञताज्ञापनम्, अनुक्रमणिका च।
2. शोधभूमिकाप्रस्तुतिः – प्रस्तावना, शोधसमस्याप्रतिपादनम्, आवश्यकता, औचित्यम्, उद्देश्यानि, सम्बद्धसाहित्यसमीक्षा च।
3. शोधप्रविधिप्रस्तुतिः - संरचना, न्यादर्शः, उपकरणानि, विश्लेषणम्, व्याख्या च।
4. परिसमाप्तिः – निष्कर्षप्रस्तुतिः, शैक्षिकसूचनाः, भाव्यनुसन्धानसूचनाः, सन्दर्भसूचीनिर्माणम्, परिशिष्टञ्च।

प्रायोगिकम् (Practicum) –

- 4,000–5,000 शब्देषु अभिनवलघुशोधप्रबन्धस्य प्रस्तुतिः।
- PPT माध्यमेन मौखिकप्रस्तुतीकरणम् ।
- मौखिकपरीक्षा।
- शोधसङ्गोष्ठ्यां शोधकार्यशालायाञ्च भागग्रहणम्।

आकलनप्रक्रिया (50 अङ्काः)

वर्गः	अङ्कः
शोधप्रस्तावः कार्यप्रगतिश्च	10
लघुशोधप्रबन्धस्य गुणवत्ता	20
प्रस्तुतीकरणम्	10
मौखिकपरीक्षा	10
आहत्य	50

प्रायोगिकप्रक्रिया –

पत्रमिदं प्रायोगिककार्यभूयिष्ठं वर्तते। शिक्षकः आदर्शलघुशोधप्रबन्धं प्रदर्श्य लेखनकर्मणि छात्राध्यापकान् अभिप्रेरयेत्। तत्पूर्वं शोधलेख-लघुशोधप्रबन्ध-शोधप्रबन्धानां परस्परसम्बन्धं भेदं वैशिष्ट्यं च विभिन्नैः उदाहरणैः सह प्रवचनमुखेन स्पष्टीकुर्यात्। छात्राध्यापकेभ्यः व्यक्तिशः अनुदेशनं लघुशोधप्रबन्धकर्मणि महत्त्वपूर्णं वर्तते। अतः साधनसम्पन्नः प्रशिक्षकः सीमितावधौ इदं कार्यं चातुर्येण सम्पादयेत्। अभिनवदीक्षासरणेः तृतीयचतुर्थपञ्चमदीक्षापुस्तकेषु उल्लिखितानां स्वाध्यायसामग्रीणां प्रभावस्य अध्ययनं कर्तुं मार्गदर्शनं कुर्यात्। सन्धि-समास-कारक-छन्दोलङ्काराणां प्रत्ययानां च विषये विद्यालयस्तरीयाणां छात्राणाम् अभिक्षमतायाः परीक्षणाय (प्राक्परीक्षण-उत्तरपरीक्षणनिमित्तम्) अपि स्वाध्यायसामग्री साहाय्यमाचरति। शोधकर्मणि सम्भावित-क्षेत्राणाम् उल्लेखः विश्वविद्यालयस्य जालपुटे उपारोपितः वर्तते। CSU Thurst Areas एतस्यापि अवलोकनं कर्तुं शक्यते।

सन्दर्भग्रन्थाः (Reference Books) –

अनुसन्धान संदर्शिका - गुप्ता एस्. पी., शारदा पुस्तक भवन, इलाहबाद, उ.प्र।

प्रभावी प्रस्ताव लेखन - मूर्ति वासुदेव, सेज प्रकाशन, नई दिल्ली।

शोध प्रबन्ध कार्य - BAHI (N) – D-304, उत्तराखण्ड मुक्त विश्वविद्यालय https://uou.ac.in/sites/default/files/slm/BAHI(N)-D-304.pdf

How to Write a Ph.D Thesis in India - Dr. Sahil Roy, Insurance Scholar Pubications.

Thesis Writing – A complete-Guide to Research Dr. Parul Gandhi, The Readers Paradise.

Research Synopsis Format - CSU Synopsis Format, Central Sanskrit University

तृतीय-चतुर्थ-पञ्चमदीक्षा पुस्तकानि- केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

7.2 B – शास्त्रार्थः

सत्रार्द्धः – 8 **श्रेयोऽङ्काः 4**

स्वशास्त्रेषु परम्परागतरित्या शास्त्रार्थसम्पादनम्

छात्राः विद्याशाखायाः निर्देशानुसारं शास्त्रार्थस्य प्रदर्शनम् भागग्रहणञ्च कृत्वा स्वकौशलं प्रदर्शयेयुः। तदर्थम् अधोलिखित कार्ययोजना अनुसरणीया -

1. अनिवार्योऽपस्थितिः प्रस्तुतिकरणञ्च - 1 Credit
2. YouTube Live – 1 Credit
3. शास्त्रार्थस्य शोधप्रबन्धं परिसरीयवार्षिकपत्रिकायां मुद्रणम् – 2 Credits

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	स्वशास्त्रेषु परम्परागतरित्या शास्त्रार्थसम्पादनम्	40 hr	0	24 hr.	4